

2845

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]





2845

३३ वर्षे
१-२ अङ्कौ

ज्येष्ठ-भाद्रपदपूर्णिमे
मई-सितम्बर, १९७८ ई०

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

अभिनवप्रकाशनानि

ग्रन्थनाम मूल्यम्

१. योगिनीहृदयम्—[तन्त्रशास्त्रम्] तृतीयं संस्करणम्। तन्त्रशास्त्रीयोऽयं ग्रन्थोऽम्बिकानन्दयोगिकृतदीपिकाख्यया भास्कररायकृतसेतुबन्धाख्यया च टीकया समलङ्कृत्य प्रकाशितः— ३३-४०

२. तत्त्वचिन्तामणिः—अनुमानखण्डात्मकः [न्यायदर्शनम्] ग्रन्थरत्नमिदं श्रीयज्ञपति-उपाध्यायकृतया 'प्रभाख्यया' व्याख्यया तथा च विद्वन्मूर्धन्येन न्यायशास्त्रस्य स्वतःप्रमाणभूतेन कुलपतिवरेण च विशिष्टैः टिप्पण-भूमिका-परिशिष्टादिभिः सम्पाद्य प्रकाश्यते—

३. यन्त्रराजविचारविंशाध्यायी [ज्योतिषशास्त्रम्] आचार्यनयनसुखोपाध्याय-विरचितेऽस्मिन् ग्रन्थे ज्योतिषशास्त्रीयोपयोगिनां वेधादियन्त्राणां सैद्धान्तिकं प्रायोगिकञ्च समालोचनमत्र विहितम्— ११-००

४. भारतीयविचारदर्शनम्—द्वितीयो भागः [आचारशास्त्रम्] ग्रन्थेऽस्मिन् लेखकेन डॉ॰ हरिहरनाथत्रिपाठिना भारतीयविचाराचाणाम् ऐतिहासिकं तुला-बोधकञ्च विवेचनं कृतम्— १०५-६०

५. पालितिपिटकसद्दानुक्कमणिका—[कोशः] पालित्रिपिटकान्तर्गतानां शब्दानां सान्दर्भिकः समावेशोऽत्र द्रष्टुं शक्यते— १००-६०

६. पुराणेतिहासयोः सांख्ययोगदर्शनविमर्शः [दर्शनशास्त्रम्] अनुसन्धान-प्रबन्धेऽस्मिन् लेखकेन सम्पादकेन च डॉ॰ श्रीकृष्णमणित्रिपाठिना महता प्रयासेन पौराणिका महाभारतीयाश्च सांख्य-योगपदार्था विवेचिताः— ३२-८०

७. वैशेषिकसिद्धान्तानां गणितीयपद्धत्या विमर्शः [गणितशास्त्रम्] गवेषणा-प्रबन्धेऽस्मिन् वैशेषिकसिद्धान्तानां गणितीयसिद्धान्तमूलकं विश्लेषणं विहितम्— २४-६०

८. उषारागोदया [नाटिका]—श्रीमद्रुद्रचन्द्रदेवविरचितेयम् उषारागोदया विदुषा डॉ॰ गौरीनाथशास्त्रिणा पाठभेदादिनिर्धारणपुरःसरं सम्पाद्य प्रकाशिता— २-००

९. स्तोत्रवल्लरी [स्तोत्रसंग्रहः] श्रीरघुनाथशर्ममहोदयेन विरचितेयं स्तोत्र-वल्लरी ध्रुवं संस्कृतवाङ्मयस्य श्रियं समेधयति— ३-५०

१०. चिद्गगनचन्द्रिका [तन्त्रशास्त्रम्] महाकविकालिदासविरचितोऽयं काव्यमयो ग्रन्थः श्रीरघुनाथमिश्रविरचितया क्रमप्रकाशिकाख्यया व्याख्यया प्रकाशितः— ६०-००

११. संस्कृत आयोग का प्रतिवेदन—भारत सरकार ने सन् १९५६ ई॰ में डॉ॰ सुनीतिकुमार चटर्जी की अध्यक्षता में 'संस्कृत आयोग' का गठन किया था। इस आयोग की मौलिक संस्तुति १९५८ ई॰ में ही अंग्रेजी में प्रकाशित हो गयी थी, जिसका राष्ट्रभाषा हिन्दी में सर्वप्रथम प्रकाशन किया गया है। यह ग्रन्थ संस्कृत-भाषा के चतुरस्र विकास की दिशा में रचनात्मक समाधान प्रस्तुत करता है— ३२-००

प्राप्तिस्थानम्—प्रकाशनविभागः, अनुसन्धानसंस्थानम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी-२२१००२

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

मुख्यसम्पादकः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

उपसम्पादकः

डॉ० हरिश्चन्द्रमणित्रिपाठी



३३ वर्षे
१-२ अङ्कौ

वार्षिकमूल्यम् १० रूप्यकाणि
संयुक्ताङ्कयोः ६ रूप्यकाणि

सम्पादकीयम्

द्वात्रिंशं वत्सरं परिपूर्य त्रयस्त्रिंशे हायने पदमर्पयन्तीयं समेधते सुषमा सरस्वत्या भवल्लालिता ललितललिताऽनुसन्धानलतिकेति विभावयामि सतर्षं हर्षवर्षैः सुषमानुरागिणो बुधवरान् महानुभावान्। अङ्कयुगलेऽस्मिन् वेद-वेदान्त-न्याय-तन्त्रागम-व्याकरण-पुराणेतिहास-नाट्यालङ्कार-धर्मशास्त्रप्रभृतीन् विषयाननुसन्धानदृशाऽनुशीलयतां तद्विषयाधिकारिसूरिजनानां निबन्धैर्नूनमात्मतोषमनुभवेयुरध्येतारः।

परम्परागतविदुषामैतिहासिक्यास्तुलनात्मिकाया गुणदोषविवेचनात्मिकायाश्च दृशो वर्धनाय मुख्यतोऽसौ प्रवर्तते त्रैमासिकी गवेषणापत्रिका। समुत्तरदाचार्यपरीक्षाणामाचार्यकल्पानां विद्याभिलाषुकाणां समीक्षादृगुन्मीलनार्थं महते लाभाय कल्पते सारस्वती सुषमा। एवं ज्ञाततत्त्वाः संस्कृतस्य भूयांसो विद्यालया महाविद्यालयाश्च पत्रिकाया अस्या ग्राहकतामङ्गीकृतवन्तः, केचित् तदर्थमनुरुन्धाना आसते साम्प्रतम्। आधुनिकविद्याविश्वविद्यालयास्तदनुगामिनो गुणलुब्धा महाविद्यालयाः सन्ति जाग्रद्रुचयः सुषमां प्रति।

इह प्रत्यङ्कं प्रकाश्यमानो लघुग्रन्थोऽर्वाचीनप्राचीनेत्युभयविधविद्याप्रकाण्डानां विपश्चितां गाढमाकर्षणं जनयतीति हर्षावहम्। महाभारतयुद्धकालविषये प्राचीनं वैमत्यं प्रवर्तते। तिथीनामनैक्यात् पाश्चात्यविद्यानुगामिनो भारतीया दोषज्ञा महाभारतयुद्धमेव काल्पनिकं घोषयितुं प्रवृत्ताः सन्तीत्याश्चर्यम्। विषयमिममङ्गीकृत्य केचिन्निबन्धा ग्रन्थाश्च प्रकाशमानीता दृश्यन्ते। बहुत्र संगोष्ठ्योऽपि समायोजिता विश्वविद्यालयैः स्वतन्त्रसंस्थाभिश्च। इहाङ्के 'महाभारतयुद्धकालनिर्णयः' इति लघुग्रन्थोऽनुसन्धानसंस्थानस्यान्यतमेनानुसन्धानाधिकारिणा डॉ० जानकीप्रसादद्विवेदिना सम्यक् सम्पादितः प्रकाशमानीयते। कृतेऽपि प्रयत्ने रचयितुर्नामधामादिकं न विचेतुमपारि सम्पादकेन। महाभारतयुद्धकालनिर्णयविषयिण्याः प्रकाशितायाः सामग्र्या यथाशक्ति समुपयोगो व्यधायि सम्पादकेनेति भूमिकावलोकनेन प्रतीयते। ग्रन्थान्ते ज्ञानवर्धकपरिशिष्टयोजनेन लघुग्रन्थस्यास्योपयोगिता सातिशयं समेधिता। ग्रन्थस्यास्य प्रकाशनेन विदुषां जिज्ञासूनां च नूनं प्रीणनं ज्ञानोदयश्च स्यातामिति मे ध्रुवं प्रत्ययः।

पण्डितप्रकाण्डानां श्रीबदरीनाथशुक्लमहाभागानामभिनन्दनम्

प्रथमोऽयमवसरः समुपतिष्ठते यदा कस्यचिद् विश्वविद्यालयस्य महनीयं कुलपतिपदं केनचित् पण्डितप्रकाण्डेन मनीषिणा समलङ्कृतं स्यात्। उत्तरप्रदेशस्य महामहिमानो राज्यपालाः सभाज्यन्ते यैः सुश्लाघ्योऽयं निर्णयो व्यधायि। संस्कृतजगदम्बुधौ काचिदनिर्वचनीया व्याप्ता हर्षलहरीसन्ततिः। न्यायशास्त्रनदीष्णाः श्रीशुक्लमहाभागा बहूनि वर्षाणि काशिकराजकीयसंस्कृतमहाविद्यालये प्रधानाचार्यपदमलङ्कुर्वते स्मेति

संस्कृतविद्यायाः संस्कृतविद्यालयानां च समुन्नयनाय प्राप्तानुभवैस्तैस्तदानीमेव मनसि दिङ् निर्धारिता; मध्ये मध्ये स्वपरामर्शैः क्रियाभिश्च तस्यां दिशि तदानीन्तना अधिकारिणः संप्रेरिताः। राजकीयमहाविद्यालयस्य विश्वविद्यालयत्वेन परिणतौ सत्यां श्रीशुक्लमहाभागानां संस्कृतोत्थानविधौ ज्यायसी भूमिका दृष्टिपथमवतरति। विद्यानुशासने प्रशासने च समानगतयः श्रीशुक्लमहोदया अनितरसाधारणप्रतिभासंपदं बिभ्राणाः संस्कृतलोकस्य कामप्यपूर्वामुन्नतिं विधास्यन्तीति प्रतीक्षन्ते संस्कृतज्ञा उद्ग्रीवा मेघान् चातकवन्मुदा। सारस्वती सुषमेयं महामनीषिणस्तानिमान् सानन्दमभिनन्दतीति विज्ञापयति

भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

निदेशकः

अनुसन्धानसंस्थानस्य

विषयसूची

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

३३ वर्षः | ज्येष्ठभाद्रपदपूर्णिमे, वि० सं० २०३८ | १-२ अङ्कौ

श्रीवैष्णववेदान्तानुसारेण जीवपरमात्ममायास्वरूपविमर्शः[1]

श्रीरामवदनशुक्लः

प्रधानाचार्यचरः

श्रीरामदेशिकसंस्कृतमहाविद्यालयः, प्रयागः

● ● ●

कपर्दिमतमर्दनं कपिलकल्पनावागुरां
दरत्ययमतीत्य तद्द्रुहिणतन्त्रयन्त्रोदरम् ।
कुदृष्टिकुहना मुखे निपततः परब्रह्मणः
करग्रहविचक्षणो जयति लक्ष्मणोऽयं मुनिः ॥

१. जीवस्वरूपम्

वैष्णवपदस्य 'तदस्य भक्तिः' इत्यनुशासनोपबृंहणेन विष्णुरेव भक्तिः, भज्यमानः, सेव्यमानः यस्याऽसाविति व्युत्पत्त्याऽनन्यभावेन विष्णुभक्तिपरायणः श्रीवैष्णवो विशिष्टाद्वैतसिद्धान्तवादी प्रोच्यते । तत्र विशिष्टाद्वैतसिद्धान्तो नाम सूक्ष्मचिदचिद्विशिष्टब्रह्मस्थूलचिदचिद्विशिष्टब्रह्मणोऽद्वैतमभेदः । तत्र द्वयोर्भावो द्विता, द्वितैव द्वैतम्, न द्वैतमद्वैतं विशिष्टश्च विशिष्टश्च विशिष्टे, विशिष्टयोरद्वैतं विशिष्टाद्वैतमिति, चिदचितोः सूक्ष्मत्वं नामरूपविभागानर्हत्वम्, स्थूलत्वञ्च नामरूपविभागार्हत्वम्, न तु स्वरूपके सूक्ष्मत्वस्थूलत्वे । यथा पशुशरीरविशिष्टो जीवो नामरूपविभागार्हत्वात् स्थूलो व्यवह्रियते । सूक्ष्मत्वञ्च जीवे 'सदेव सोम्येदमग्र आसीत्'[2] इत्यत्र सृष्टेः प्राक्प्रलयावस्थायां चिदचिद्विशिष्टब्रह्मघटकतया सच्छब्देन प्रोच्यते । इत्थं सूक्ष्मचिदचिन्निष्ठप्रकारतानिरूपितविशेष्यताशालिस्थूलचिदचिन्निष्ठप्रकारतानिरूपितविशेष्यताशालिब्रह्मणोरद्वैतमभेदः ।

अद्वैतमित्यत्र 'रक्षोहागमलघ्वसन्देहाः'[2] इत्यत्रासन्देहपदवन्नञा तत्पुरुषो ब्रह्मण एकत्वेऽपि 'तत्त्वमसि'[3] इति वाक्ये सूक्ष्मचिदचिद्विशिष्टस्थूलचिदचिद्विशिष्टब्रह्मणोरभेदप्रतिपादनात्

---

१. निबन्धोऽयं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य विंशतितमे स्थापनोत्सवावसरे समायोजितायां डॉ० गङ्गानाथझाप्रवचनमालायां पठितः ।

२. छान्दोग्योपनिषद् ६।२।१. ३. छा० उ० ६।८।७

सूक्ष्मत्वस्य नामरूपविभागानर्हत्वस्य विशेषणतावच्छेदकतावच्छेदकस्य स्थूलस्य नामरूपविभागार्हत्वरूपस्य विशेष्यतावच्छेदकतावच्छेदकस्य भेदात् तद्भेदस्य विशेष्यांशे ब्रह्मणि समारोपात् प्रतीतानामनेकपदार्थानां परस्पराभेदेनानन्वितानामेकधर्मावच्छिन्नानामेकधर्मावच्छिन्नसंसर्गेणैकधर्मावच्छिन्नेऽन्वय इति भेदघटितसाहित्यनिमित्तलाभात् द्वन्द्वापवादैकशेषः ।

विशिष्टश्च विशिष्टश्च विशिष्टे इत्येकशेषः सम्पन्नः, चिदचितोस्तु भेद एव, स च भेदः चितां परस्परभेदः, ब्रह्मसकाशाद्भेदः, अचित्सकाशाद्भेदश्च । तथा चितोऽपि प्रकृतिविकारपशुपक्षिमृगतिर्यक्सरीसृपस्वरूपप्राकृतभागानां परस्परं भेदः, ब्रह्मणश्च जीवाद्भेदः । जीवस्वरूपमण्वात्मक एषोऽणुरात्माचेतसा वेद्यः 'बालाग्रशतभागस्य शतधा कल्पितस्य च । जीवभाग. स विज्ञेयः स चानन्ताय कल्पते ॥' 'आराग्रमात्रो ह्यवरोऽपि दृष्टः' इत्यादिश्रुतिवचनेभ्यो जीवस्य पश्वादिमरणकाले उत्क्रान्तिश्रुतेस्तदुत्पत्तिकाले आगमश्रुतेश्चाणुत्वं सिद्धयति । नित्यत्वञ्च 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां विदधाति कामान्' इति वचनेन सिद्धम् ।

तत्रैव श्रुतौ नित्यानामिति बहुवचनोपादानेन परस्परं भेदोऽपि सिद्धयति । तेन 'सदा पश्यन्ति सूरयः' इति नित्यजीवस्य । 'अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः' इति श्रुतिवलेन मुक्तजीवस्य । 'अजोह्येको जुषमाणोऽनुशेते' इति श्रुतिभागेन जीवस्य बद्धत्वञ्च प्रमेयं भवति । तस्य जीवस्य स्वरूपं ज्ञानमेव 'विज्ञानं यज्ञं तनुते' इति ब्राह्मणभागात् । स च ज्ञानाश्रयोऽपि भोक्ता भोग्यमिति श्रुतेः । एकं स्वरूपभूतं ज्ञानं द्वितीयं धर्मभूतं ज्ञानञ्च । स्वरूपभूतज्ञाने स्वरूपमात्रमेव भासते । धर्मभूतज्ञाने घटपटादिगोमनुष्यादिविषया भासन्ते । इन्द्रियद्वारा ज्ञानस्य विषयेषु प्रसारो भवति, तदा ज्ञानस्य विकाशो ज्ञानमुत्पन्नमिति व्यपदेशो जायते । यदा विषयैर्ज्ञानस्य सम्बन्धो न भवति, तदा ज्ञानं सङ्कुचितं तिष्ठति । स्वरूपे धर्मरूपेण तिष्ठति । तदा ज्ञानस्य सङ्कुचितत्वाद् ज्ञानमनुत्पन्नमिति व्यवह्रियते ।

वस्तुतो ज्ञानं न तार्किकवदुत्पादविनाशशालि । धर्मभूतज्ञानञ्च जीवस्य स्वभावश्चैतन्यरूपः । स्वभावश्च स्वाश्रयसत्ताकालपर्यन्तं तिष्ठति । एवं सति ज्ञानाश्रयस्य चेतनस्य 'नित्यो नित्याना'मिति श्रुतिबलेन नित्यत्वात् । तद्धर्मस्वरूपस्य जीवस्वभावस्य चैतन्यस्य ज्ञानस्वरूपस्य नित्यत्वमकामेनायातम् । तस्य जीवस्य ब्रह्मणा सहैक्यं न श्रुतिन्यायसिद्धम् । जीवब्रह्मैक्यप्रतिपादकत्वेन भासमानानां श्रुतीनाम् । 'आत्मैवेदं सर्वम्', 'ऐतदात्म्यमिदं सर्वम्', 'सर्वं खल्विदं ब्रह्म' 'तत्त्वमसी'त्यादीनामिदंपदवाच्यप्रपञ्चेन सह शरीरशरीरिभावकृतविशिष्टविशेषणभावेन सामानाधिकरण्यप्रतिपादनात् । प्राकृतविकारस्याचितो नित्यविभूतेश्च शुद्धसत्त्वस्य यथा ब्रह्मशरीरत्वम्, तथा चितोऽपि जीवस्य ब्रह्मशरीरत्वम् ।

'यस्यात्मा शरीरम्, य आत्मनोऽन्तरः, यमात्मानं वेद' इत्यन्तर्यामिब्राह्मणेन जीवस्यापि शरीरत्वप्रतिपादनात् । सामानाधिकरण्यञ्चाभेदकृतविशेष्यविशेषणभावसम्बन्धेन यथा भवति, तथा शरीरशरीरिभावकृतविशेषणभावेनाऽपि भवति । 'जीवः पुण्यविशेषाद्देवो जातः' इत्यत्र शरीरशरीरिभावकृतविशेष्यविशेषणभावेन सामानाधिकरण्यानुभवात् । सामानाधिकरण्यञ्च मिथ्यावादिनये अधिष्ठानाधिष्ठेयभावकृतविशेष्यविशेषणभावेन । अथ चाभेदसम्बन्धकृतविशेष्यविशेषणभावेन च यथा भवति, तथा शरीरशरीरिभावकृतविशेष्यविशेषणभावेनापि ।

अश्वत्थामा बलिर्व्यासः हनूमांश्च विभीषणः।
कृपः परशुरामश्च सप्तैते चिरजीविनः॥

'बलिवैर्यासकिर्वयम्' इत्यत्र जीवात्मनां शरीरेण सामानाधिकरण्यानुभवाच्च।

एवञ्च जीवोऽयं मनुष्य इत्यत्र शरीरशरीरिभावसम्बन्धावच्छिन्नमनुष्यत्वावच्छिन्नप्रकारतानिरूपितजीवत्वावच्छिन्नविशेष्यताशाली बोधोऽभ्युपेयः। जीवस्य ज्ञानाश्रयज्ञानस्वरूपत्वं प्रभाप्रभावत् सूर्यदृष्टान्तसिद्धम्। यथा सूर्यः स्वरूपेण तेजो धर्मेण प्रभयापि तेजः। सूर्यः धर्मस्वरूपप्रभा तेजसो घटादीन् यथा प्रकाशयति, तथा जीवोऽपि धर्मभूतज्ञानेन इन्द्रियादिद्वारा विषयान् प्रकाशयति। सूर्यो मेघेन पिहितः सन् प्रभासत्त्वेऽपि घटादिप्रकाशनाक्षमः। तथा जीवोऽपि धर्मस्वरूपस्य ज्ञानस्य सत्त्वेऽपि चक्षुरादीनामुन्मीलनाद्यभावे प्रकाशात्मकज्ञानधर्मवानपि विषयान् प्रकाशयितुमक्षमस्तिष्ठति। जीवस्य परब्रह्माभिन्नत्वे प्रमाणञ्च—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषष्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति[1]॥

अथ च 'क्षरात्मानावीशते देव एकः' इत्यादि श्रुतिः। अत्र क्षरस्य प्रकृतेरात्मनो जीवस्य ईशतः परमात्मनो भेदनिर्देशपूर्वकमीश्वरस्य परमात्मन ईशितृत्वेन शासनकर्तृत्वेन जीवात्परमात्मनः, परमात्मनो जीवस्य च भेदो व्यक्तीक्रियते। अस्यां श्रुतौ क्षरपदेन प्रकृतिरुच्यते। 'व्यक्ताव्यक्तं क्षरमक्षरञ्च' इत्यत्र अक्षरपदेन जीवः प्रोच्यते। 'क्षरं प्रधानममृताक्षरं हरः' इति श्रुतौ अक्षरस्य अमृतजीवरूपेण विवरणात्। 'प्रधानक्षेत्रज्ञपतिर्गुणेषः' इति श्रुत्या च प्रधानपदेन प्रकृतिः क्षेत्रज्ञपदेन जीवो गुणेशपदेन परमात्मा च प्रोच्यन्ते। 'भोक्ता भोग्यं प्रेरितारञ्च मत्वा' 'पृथगात्मानं प्रेरितारञ्च मत्वा' इति श्रुत्योः परमात्मनः पृथक्त्वेन आत्मनो जीवात् ज्ञानमुपासनात्मकं विधीयते, तेनापि जीवस्य परमात्मनो भेदः सिद्ध्यति। उक्तश्रुतौ गुणेशपदेन सत्त्वरजस्तमोगुणानां परमात्मा स्वामी प्रोच्यते। परमात्मा प्रसन्नो यं जीवं मोचयितुमिच्छति तं सत्त्वगुणेन योजयति। यं तथा नेच्छति तं तमोरजोभ्यां योजयति।

इत्थं परमात्मनो मोक्षप्रदत्वं जीवस्य मोक्षाधिकारित्वं सुव्यक्तं भवति। तेन परमात्मजीवयोर्भेदः साधीयान् प्रोच्यते। 'नहि विज्ञातुर्विज्ञातेर्विपरिलोपो दृश्यते'[3] इति श्रुतौ विज्ञातुर्जीवस्य विज्ञातेर्ज्ञानस्य लोपाभावस्य अर्थाद्विनाशाभावस्योक्तेरपि जीवज्ञानस्य नित्यत्वं प्रमीयते। इत्थं जीवस्य ब्रह्मणः सकाशादकचित्तत्त्वसकाशाच्च भेदः साधितः। इत्थं जीवमीमांसा।

२. ब्रह्मस्वरूपम्

ब्रह्मशब्देन निखिलहेयप्रत्यनीककल्याणगुणैकतान् सत्यकामसत्यसङ्कल्पो ज्ञानस्वरूपः सत्यस्वरूपोऽनन्तरूप आनन्दरूपश्च पुरुषोत्तमः समाभ्यधिकशून्यः श्रीमन्नारायणोऽभिधीयते। 'सदेव

---

१. मुण्डकोपनिषद्—३।१।१।
२. श्वेताश्वतरोपनिषद्—१।१२। ३. बृ० उ० ४।३।३०।

सोम्येदमग्र आसीत्'[1] इति श्रुत्या सच्छब्देनोच्यमानं तत्त्वं किमिति जिज्ञासायाम् 'सर्वं खल्विदं ब्रह्म ब्रह्मैवेदमग्र आसीत्'[2] इति श्रुतिभ्यां सच्छब्दवाच्यस्य ब्रह्मरूपता निर्णीता। ब्रह्मशब्दस्यापि प्रकृत्यादिसाधारणत्वात्, ब्रह्मशब्देन को विशेषोऽर्थो विवक्षित इति जिज्ञासायाम् 'आत्मैवेदं सर्वम्'[3], 'ऐतदात्म्यमिदं सर्वम्' इति श्रुतिभ्यामात्मरूपता निर्णीता।

अनन्तरं जगत्कारणनिरूपणप्रसङ्गे 'नारायणाद् ब्रह्मा जायते, नारायणाद्रुद्रो जायते, नारायणः परब्रह्म' इत्यादिश्रुतिभिः पशुच्छागन्यायेन सच्छब्दवाच्यस्य जगत्कारणस्य नारायणपरदेवतारूपता निर्णीयते। पशुच्छागन्यायश्चेत्थं पशुना यजेदिति श्रुत्यैकत्वविशिष्टलोमवल्लाङ्गूलादिमत्करणकयागो विधीयते। लोमवल्लाङ्गूलादिमान् कः पशुविशेषो विधित्सित इति जिज्ञासायां तस्मिन् प्रकरणे छागस्य वपाया मेदसः प्रेष्यानुब्रूहि इति पशुविशेषच्छागस्य मन्त्रेण वर्णनादेकप्रकरणाम्नातयोः सामान्यविशेषवाचकशब्दयोर्विशेषार्थपरत्वमिति सिद्धान्तात् छागपरत्वपशुशब्दस्य निर्णीयते। तथा कारणवाक्ये सद्ब्रह्मादिपदैर्वाच्यस्य कारणनिरूपणप्रकरणाम्नातनारायणदेवविशेषरूपता स्वीकर्तव्या। परब्रह्मणो निखिलहेयप्रत्यनीकत्वञ्च—'निर्गुणं निरञ्जनमनिष्क्रियं विरजो विमृत्युः अपिपासोऽविजिघत्सः' इति श्रुतिभिः साधितमस्ति। कल्याणगुणैकतानत्वञ्च 'यः सर्वज्ञः स सर्ववित्', 'सत्यं ज्ञानमनन्तं ब्रह्म',[4] 'नित्यं विज्ञानमानन्दं ब्रह्म' इत्यादि श्रुतिप्रमितम्। सर्वशक्तित्वञ्च 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकीज्ञानबलक्रिया च' इति श्रुत्या सिद्धमस्ति। 'सदेव सोम्येदमग्र आसीत्' इति श्रुत्या परिदृश्यमानविविधविचित्रजगत्कारणत्वस्य ब्रह्मणि प्रतिपादनात् कार्यानुकूलधर्मवतः कारणत्वस्वीकाराद् विविधकार्यजनकत्वेन जनकत्वस्य च विविधशक्तिस्वीकारमन्तराऽनुपपत्त्या अनन्तशक्तिमत्त्वमपि ब्रह्मणि अङ्गीक्रियते।

'परास्य शक्तिर्विविधैव श्रूयते' इति श्रुतिबलात् परब्रह्मणि कल्याणगुणस्वरूपज्ञानस्य नित्यता स्वाभाविकीपदेन निर्णीयते। नारायणस्य परब्रह्मणः 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतावनन्तपदेन नित्यत्वावधारणाद् नित्यस्वभावस्वरूपस्य ज्ञानस्यापि शक्तेरपि नित्यत्वमभ्युपेयम्। ज्ञानशक्त्यादीनां नित्यत्वे सति प्रमाविषयत्वेन तत्त्वकोटौ प्रवेशात् 'तमेव विदित्वाऽतिमृत्युमेति' इति तत्त्वज्ञानस्य मोक्षहेतुताप्रकरणे गुणविशिष्टस्य गुणिनो नारायणस्य ज्ञानं तत्त्वज्ञानमङ्गीकार्यमिति ज्ञानशक्त्यादिगुणविशिष्टस्य नारायणस्य 'ज्ञानस्वरूपात्तत्त्वज्ञानान्मोक्ष' इति शास्त्रार्थः पर्यवसन्नः।

तेन निर्विशेषस्य गुणविरहिणः परब्रह्मस्वरूपस्य तत्त्वतावादिनो मोक्षोपायानुष्ठानमङ्गविकलमापद्येत। अत्र पशुच्छागन्यायेन सदादिशब्दानां नारायणपरत्वेऽङ्गीकृते नराणां समूहो नारः=जीवसमूहः, तस्यायनमथवा नार अयनं यस्येति तत्पुरुषबहुव्रीहिभ्यां नारायणशब्दस्य व्युत्पन्नतया देवव्यक्तिविशेषरूढ्यर्थपर्यवसन्नोक्तावयवार्थबोधकनारायणशब्दे पूर्वपदात्संज्ञायामग इति णत्वविधानान्नारायणशब्देन अपरेषां रुद्रादिदेवानां परिग्रहो न सम्भवेत्। रूढ्यर्थबोधकशब्देऽपि तथा संज्ञाशब्देऽपि पूर्वपदोत्तरपदभावो नोच्छिद्यते। गौरखररथन्तरादिशब्देष्वपि पूर्वपदोत्तरपदघटितत्वस्वीकारेण पूर्वपदोत्तरपदोद्देश्यकस्वरविधानानुगुण्यात्। अतो नारायणपदस्य

---

१. छा० उ० ६।२।१; २. बृ० उ०—१।४।१०;
३. बृ० उ०—१।४।१। ४. तै० उ०—२।१।१;

व्यक्तिविशेषपरतया संज्ञाशब्दत्वेऽपि पूर्वपदघटितत्वानपायात् 'पूर्वपदात्संज्ञायामगः'[1] इति इति सूत्रेण पूर्वपदोद्देश्यकं णत्वरूपकार्यं न विपद्यते ।

संज्ञाशब्दश्च द्विविधो भवति । एको हि यदृच्छाशब्दः शब्दमात्रप्रवृत्तिनिमित्तकः, द्वितीयोऽवयवार्थविशिष्टव्यक्तिविशेषपरः । नारायणशब्दश्च न यदृच्छाशब्दः, अपि तु व्यक्तिविशेषपर्यवसन्नावयवार्थपरः श्रुतिसमुद्घोषितः । 'रषाभ्यां णो नः समानपदे'[2] इत्यत्र श्रुतं समानपदं पूर्वपदात्संज्ञायामगः प्रातिपदिकान्तनुम्विभक्तिष्वित्यादिणत्वविधायकसूत्रेषु नानुवर्तते । तेन नारायणपदस्य समानपदत्वाभावेऽपि णत्वं न विपद्यते । समानपदत्वञ्च निमित्तानधिकरणनिमित्तिमत्पदाघटितत्वम् । नारायणपदस्य निमित्तानधिकरणनिमित्तिमदयन् पदघटितत्वेन समानपदत्वाभावः । प्रातिपदिकान्तनुम्विभक्तिषु 'पूर्वपदात्संज्ञायामगः' इत्यादिषु समानपदत्वानुवर्तनाङ्गीकारे 'माषवापिणौ' इत्यत्र पाक्षिकणत्वं 'खुरणसः खरणसः' इत्यादौ णत्वानापत्तिः स्यात् । कारणवाक्यप्रतिपाद्यस्य ब्रह्मणः सजातीयविजातीयस्वगतभेदशून्यनिर्विशेषरूपता न संभवति । 'उपक्रमोपसंहारापूर्वता अभ्यासार्थवादोपपत्तिभिः षड्भिर्लिङ्गैः सूक्ष्मचिदचिद्विशिष्टब्रह्मणि श्रुत्युक्तकारणवाक्यानां तात्पर्यविधारणात् ।

उपक्रमे गुरुकुलादधीतवेदवेदाङ्गं श्वेतकेतुं विद्यापरिपूरणं मन्यं स्तब्धमुद्दालकस्तदितरतां प्राह—'तमादेशं अप्राक्ष्यः' इति । येन श्रुतेन मतेन विज्ञातेनाश्रुतममतमविज्ञातं श्रुतं मतं विज्ञातं भवतीति । अत्रादेशपदेन आदिश्यते अनेन इति बाहुलकत्वकृतकरणे घञा व्युत्पन्नेन शासनकरणं प्रोच्यते । 'यस्य शासने सूर्याचन्द्रमसौ गार्गि तिष्ठतः'[3] इति श्रुत्यानुगुण्यात् । अत्र शासनकर्तुः परमात्मनः साक्षात् शासनसाधनत्वेन कर्तुः करणत्वविवक्षायां करणे घञ् विधीयते । तेनैव शासनकर्त्रा श्रुतेन ज्ञातेन मतेन च निखिलं जगत्कार्यभूतं श्रुतं विज्ञातं मतं श्रुतत्वाद्यभावेऽपि भवति । यथा मृदा ज्ञातेन श्रुतेन मतेन च तद्विकारभूतं घटसरावादिश्रुतत्वाद्यभावेऽपि श्रुतादिसंपद्यते । 'एवंभूतं शासनकर्तारं परमात्मानं किं त्वं पृष्टवानसि' इति उद्दालकः श्वेतकेतुं पप्रच्छ । तदुपरि सा विद्यागुरो नास्तीति कृतावधारणः पितरमुद्दालकं पृच्छति—'कथं नु भगवः ! एकेन ज्ञातेन विविधविचित्ररूपञ्जगद् ज्ञातं स्यात्' इति सन्दिहानं श्वेतकेतुं तमादेशपदवाच्यं शासनकर्त्तारं 'सदेव सोम्येदमग्र आसीद्' इति जगत्कारणवाक्येन श्वेतकेतुमुपदिदेश ।

इदं परिदृश्यमानं स्थावरजङ्गमात्मकं जगत् सृष्टेः पूर्वं नाम सृष्टेः प्राक्काले जगत् सच्छब्दवाच्यं सूक्ष्मचिदचिद्विशिष्टं द्रव्यम् आसीत् । तेन परिदृश्यमानस्य जगतस्ततः प्राक् सूक्ष्मचिदचिद्विशिष्टद्रव्याकारेण पूर्वकालवृत्तितया सत्ता प्रतिपादिता । तथा सच्छब्दवाच्यस्योक्तद्रव्यस्य विविधविचित्रजगदाकारता रूपसत्ताऽपि प्रतिपादिता भवति, तेनासत्कार्यवादो निरस्तो भवति । सच्छब्दवाच्ये द्रव्ये पूर्वकालसम्बन्धः सूक्ष्मचिदचिद्विशिष्टद्रव्याकारता । अथ च सृष्टेरनन्तरं विविधविचित्रजगदाकारतापत्तिश्च प्रतिपाद्यन्ते ।

एकमेवेति पदेन सृष्टिसमये यथा सच्छब्दवाच्यं पृथिव्यप्तेजोवाय्वाकाशाद्यनेकरूपेण भासमानं न, वस्तुतोऽनेकरूपम्, अपि तु एकरूपमेव, अर्थात् सच्छब्दवाच्यस्य द्रव्यस्य यथैकं रूपं तदेवरूपमेकं सृष्टिकाले भासमानपृथिव्यादीनामपि शास्त्रार्थः । एतेन सत्कार्यता सच्छब्द-

---

१. अष्टाध्यायी—८।४।३; २. तदेव—८।४।१; ३. बृ० उ० ३।८।९ ।

वाच्यस्य जगदुपादानता च प्रतिपाद्येते। उपादानस्य लोके कार्योपादानविषयकापरोक्षज्ञान-चिकीर्षाकृतिमतः कश्चित्कर्तुर्निमित्तकारणस्योपादानातिरिक्तस्यापेक्षमाणता प्रसिद्धा। अतो जगदुपादानविषयकोऽपरोक्षज्ञानचिकीर्षाकृतिमाननिमित्तकारणभूत उपादानातिरिक्तः कश्चिद् भवेदिति सन्देहनिवृत्तय उक्तश्रुतावद्वितीयपदोपादानम्। अद्वितीयत्वञ्च सच्छब्दवाच्ये तत्समाभ्यधिकशून्यत्वम्।

यथा लोकेऽद्वितीयोऽयं विद्वानित्युक्तावद्वितीयपदेनेदं पदवाच्यसमाभ्यधिकनिवृत्तिरेव प्रतीयते, न तु इदंपदवाच्यविदुषोऽतिरिक्तव्यक्तिसत्ताऽद्वितीयपदेन निषिध्यते। इत्थञ्च सच्छब्द-वाच्यस्योपादानकारणत्वोक्त्या विविधविचित्रकार्यंजनकत्वाय विविधशक्तिमत्त्वमकामेनाभ्युपगमं भवेत्। सच्छब्दवाच्यस्य निमित्तकारणत्वोक्त्या सत्यकामत्वं सत्यसङ्कल्पत्वं विलक्षणज्ञानवत्त्वं सच्छब्दवाच्येऽकामेन स्वीकृतमस्ति। इत्थमुपक्रमे सच्छब्देन पूर्वकालासम्बन्धित्वसूक्ष्मचिदचिद्वि-शिष्टद्रव्याकारता सृष्टौ विविधविचित्रकार्याकारता समाभ्यधिकशून्यत्वमादेशपदस्वारस्येन शासन-कर्तृत्वञ्चोपक्रमे उच्यन्ते।

इत्थमुपक्रमतात्पर्यंलिङ्गेन जगत्कारणस्य ब्रह्मण उक्तभेदविशिष्टस्य श्रुतितात्पर्यंविषयतो-पपद्यते। इत्थं सच्छब्दवाच्यस्योक्तभेदविशिष्टस्य सूक्ष्मचिदचिद्विशिष्टस्य ब्रह्मणः कारणत्वोक्त्या जगतः सच्छब्दवाच्यं ब्रह्मात्मकत्वं प्रतिपादितं भवति। मृद्दृष्टान्तबलेन यथा—'सोम्यैकेन मृत्पिण्डेन ज्ञातेन मतेन च सर्वं घटसरावादिविविधरूपं ज्ञातं मतं श्रुतं भवति' इति। अत्र मृत्पिण्डेन ज्ञातेन घटसरावादिकेन रूपेण श्रुतादि भवतीति जिज्ञासायां मिथ्यात्वेन ज्ञातं भवतीति न शब्दस्वारस्यं लब्धम्।

३. मायास्वरूपम्

लोके सुवर्णेन निर्मितकटककुण्डलादेरिदं सर्वं सुवर्णमित्युक्तौ कटककुण्डलादीनां मिथ्या-त्वाप्रतीतेः, अपि तु सुवर्णात्मकत्वेन कुण्डलादीनां प्रतीतिः सुवर्णाकारकुण्डलाकारविशिष्टतया शुद्धसुवर्णापेक्षयोभयाकारविशिष्टस्य मूल्याधिक्यं प्रतीयते इति यावत्। तथा ज्ञातेन मृत्पिण्डेन घटसरावादिमृदात्मकमिति ज्ञाने सति मृदाकारता घटाद्याकारताविशिष्टस्य केवलं मृदपेक्षयो-भयाभावविशिष्टस्य घटसरावादेर्विशिष्टव्यवहारप्रयोजकत्वञ्च सम्पद्यते।

इत्थं निर्णये प्राप्ते 'सदेव सोम्येदमग्र आसीत्' इत्यत्रापि सति सूक्ष्मचिदचिद्विशिष्टे ब्रह्मणि ज्ञाते तत्परिणामभूतस्य विविधविचित्रजगतो ब्रह्मात्मकत्वं ज्ञातं श्रुतं मतं भवति इति दृष्टान्तदार्ष्टान्तिकबलेन 'सदेव सोम्येदमग्र आसीद्' इति श्रुत्या जगतो ब्रह्मात्मकत्वमुपदिष्टम्। ब्रह्मात्मकस्य जगतो विविधभेदभिन्नस्य प्रत्यक्षादिप्रमाणागोचरतया अपूर्वत्वाद्वेदान्तशास्त्रतात्पर्यं-विषयतोपपद्यते। इत्थम् 'आत्मैवेदं सर्वम्, 'ऐतदात्म्यमिदं सर्वम्, सर्वं खल्विदं ब्रह्म' इत्यादि-ब्रह्मोपदेशवाक्यैर्जगतां ब्रह्मात्मकत्वाभ्यासादपि उक्तश्रुतीनां जगतो ब्रह्मात्मकत्वं तात्पर्यंविषयताऽऽ-याति। इत्थमुपपत्त्युपसंहारादिना तत्त्वमस्यादिस्वरूपेण विविधविचित्रजगतां ब्रह्मात्मकता-वेदान्तशास्त्रतात्पर्यविषयतया निर्णीयते। यथा ब्रह्मणो जीवस्य च तयोर्ज्ञानस्वरूपताया ज्ञान-वत्त्वस्वरूपतायाश्च वेदप्रमेयत्वम्, तथाऽचितोऽपि वेदजन्यप्रमाविषयत्वमस्ति। तथा हि—अचि-त्त्वन्नाम परिणामाश्रयत्वम्। परिणामो नाम अवस्थान्तरापत्तिः। अवस्था नाम आगन्तुकोऽपृथक् सिद्धधर्मस्वरूपः।

मिश्रसत्त्वप्रकृतिशुद्धसत्त्वभेदेनाचितो द्वैविध्यम्। मिश्रसत्त्वं नाम रजस्तमोभ्यां मिलितं सत्त्वम्, शुद्धसत्त्वं नाम केवलसत्त्वात्मकम्, मिश्रसत्त्वं चतुर्विंशतिपरिणामात्मकम्, तत्प्रकृतिपदेनोच्यते। शुद्धसत्त्वञ्च नित्यविभूतिधर्मभूतज्ञानभेदेन द्विविधम्। धर्मभूतज्ञानस्य नित्यविभूतेश्च स्वयंप्रकाशमानत्वेऽपि परस्मै प्रकाशमानत्वात् पराक्त्वम्। ज्ञाताहमिति ज्ञानस्य जीवाश्रयतया प्रकाशमानत्वेन परस्मै प्रकाशमानत्वं जीवधर्मभूतज्ञानस्य सर्वसाक्षी परमात्मा इति सर्वसाक्षात्कारस्य परमात्माश्रयत्वेन भासमानत्वात्। सर्वसाक्षात्काररूपस्य परमात्माधर्मभूतज्ञानस्य पराक्त्वम्।

एवं नित्यविभूतित्रिपादरूपा परस्मै परमात्मने नित्यमुक्तजीवेभ्यश्च जीवब्रह्मसङ्कल्पानुसारेण ब्रह्मसङ्कल्पायत्तजीवसङ्कल्पानुसारेण तदनुकूलतया भासमानत्वात् पराक्त्वम्। अचिद्भेदे प्रकृतौ प्रमाणञ्च—'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः'[1] इति श्रुतिवचनम्। अत्र लोहितपदेन रजोगुणः, शुक्लपदेन सत्त्वम्, कृष्णपदेन तमोगुणाश्च प्रोच्यन्ते।

इत्थं सत्त्वरजस्तमःस्वरूपा प्रकृतिर्महद्रूपेण परिणमति। महत्त्वमहङ्काररूपेण, अहङ्कारश्च सात्त्विकाहङ्कार–राजसाहङ्कार–तामसाहङ्कारभेदेन त्रिविधः। सात्त्विकाहङ्कारो हि वैकारिकपदेन दर्शने प्रोच्यते। तत्र राजसाहङ्कारसहकृतसात्त्विकाहङ्कारेण पञ्च ज्ञानेन्द्रियाणि बाह्यानि मनश्चान्तरेन्द्रियम्। बाह्येन्द्रियाणि श्रोत्रत्वक्चक्षुरसनघ्राणरूपाणि, कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थरूपाणि। इत्थमेकादशेन्द्रियाणि जायन्ते। राजसाहङ्कारसहकृततामसाहङ्कारेण महाभूतसूक्ष्मावस्थारूपाः शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्ररसतन्मात्रगन्धतन्मात्ररूपाः पञ्चतन्मात्रा जायन्ते। इत्थं पञ्चतन्मात्रेभ्य आकाशादीनि पञ्चमहाभूतानि उत्तरोत्तरं शब्दाद्यधिकगुणाधारभूतानि जायन्ते। शुद्धसत्त्वं प्रमाणञ्च 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः' इति श्रुतिः, 'तमसः पराके रजसः पराके' इत्यादिश्रुतिवचने चात्र विष्णोः पदमिति पदेन विलक्षणो देशविशेषः, नित्यमुक्तश्रीदेवी-भूदेवी-नीलादेवी-विशिष्टशङ्ख-चक्र-गदा-पद्मादिदिव्यायुध-कूर्मादिदिव्यलोक-तदनु मणिमयमण्डपशेषधर्मादिपीठ-कमलचामरग्राहिणीप्रभृतिदिव्यविष्णुपरिजन-परिवाराधारभूतः प्रोच्यते। 'तमसः पराके' इति श्रुतौ तमःपदं सत्त्वरजसोरुपलक्षणम्। 'रजसः पराके' इत्यत्र रजःपदं सत्त्वतमसोरुपलक्षणम्। तेन मिश्रसत्त्वात् पराके ऊर्ध्वं वर्तमानदेशविशेषे दिव्ये परदेवतानारायणः सकलदिव्यपरिवारविशिष्टो राजत इति शास्त्रार्थः। तेन नित्यविभूतिर्वेदवाक्यजन्यप्रतीतिविषयतया प्रमेयतामश्नुते। जीवस्यापि क्वचिच्छ्रुतौ च प्रकृतित्वेनोपादानं तु ब्रह्मशरीरत्वेनान्तर्यामिब्राह्मणसिद्धेन मिश्रसत्त्ववत् प्रकृतित्वोपचारात्। इत्थम् अचित्तत्त्वमीमांसासङ्क्षेपः।

• • •

---

१. श्वेताश्वतरोपनिषद्—४।५।

तर्कामृतचषकाख्यग्रन्थसन्दर्भविमर्शः

श्रीकेदारनाथोझाः
सम्मानितप्राध्यापकः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

शारदा शारदा भूयात् सन्दर्भस्य विशुद्धये ।
निरुद्धये प्रमादानां दीप्तयेऽत्र विराजताम् ।।

विभज्य मेरुर्न यदर्थिसात्कृतो न सिन्धुरुत्सर्गजलव्ययैर्मरुः ।
अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराः शिरःस्थितम् ।।[1]

नाद्यावधि मुद्रितस्य सरस्वतीभवनपुस्तकालये चिरात्सुरक्षितस्य तात्पर्यटीकासहितस्य तर्कामृतचषकस्य स्थालीपुलाकन्यायेन स्वरूपं परिचिन्वतां शास्त्ररसिका इति समीहमानो, नैषधीयं पद्यमिदं पुरस्कृत्य प्रवृत्तं ग्रन्थसन्दर्भं पुरःप्रसारयामि । शब्दखण्डे प्रकृतिविकृतिकर्मनिरूपणावसानस्येदं तर्कामृतचषकम् ।

कथं तर्हि 'अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराः शिरःस्थितम्' इति चेत्, तच्च 'विभज्य मेरुर्न यदर्थिसात्कृतो न सिन्धुरुत्सर्गजलव्ययैर्मरुः' इति पूर्वार्धसमर्थितायशोयुगस्य वास्तवत्वेन चिकुरफालद्वयस्य राज्ञाऽऽरोप्यत्वेन च कवेरुत्प्रेक्षितत्वाद् आख्यातार्थविशेष्यत्वान्वयविशेष्यत्वेनायशोयुगस्यैव विवक्षितत्वात्; अन्यथाऽविमृष्टविधेयांशतादोषप्रसरात् । तदुक्तम्—अनुवाद्यमनुक्त्वैव नाभिधेयम् उदीरयेदिति ।

एतावतस्तात्पर्यटीका—तत्कर्तृकस्वकीयायशोयुगाभेदारोपविशेष्यीभूताश्चिकुरा इति बोधाभिप्रायेण शङ्कते कथं तर्हि इति । तर्हि प्रकृतिसमानवचनकत्वस्याख्यातेऽभिप्रेते सति । कथं विकृतिभूतायशोयुगसमानवचनम् अमानि इति न अमानिषत इति कथम् ?

अस्य सरलार्थः

संशयः—द्विफालबद्धाश्चिकुराः शिरःस्थितमयशोयुगम् = तादृशचिकुरविशेष्यकं तादृशायशोयुगप्रकारकम् । मन्‌धात्वर्थं आरोपज्ञानम् उत अयशोयुगविशेष्यकं तादृशचिकुरप्रकारकम् । आलङ्कारिकभाषया विषयी चिकुराः, अयशोयुगं वा ? विषयः चिकुरा अयशोयुगम् वा ?

पूर्वपक्षः—चिकुरेष्वयशोयुगस्य = चिकुरविशेष्यकोऽयशोयुगप्रकारक आरोपः=अयशोयुगं विषयी चिकुराः विषय इति ।

पूर्वपक्षयुक्तिः—सिद्धे वस्तुनि असिद्धम् आरोप्यते । इदं रजतम् इति भ्रमस्थले भ्रमात् प्राक् पश्चाच्च वर्तमाना शुक्तिरिदमर्थः सिद्धः । तत्र भ्रमकालावस्थायां रजतपदार्थोऽसिद्धः कल्प्यते विषयी भवति, तथा प्रकृते आरोपात् प्राक् पश्चाच्च वर्तमानाः शोभासम्पादकाः केशसन्निवेशविशेषाः सिद्धाः, अयशोयुगञ्च कल्पनाप्रसूतं राज्ञा आरोप्यमाणं विषयि भवति ।

---

१. नैषधीयम्—१।१६ ।

पूर्वपक्षे आपत्तिः='एको द्वौ ज्ञायते द्वावेको ज्ञायते' इति वाक्याभ्याम् आरोपौ अभिलप्येते। प्रथमेन द्वित्वप्रकारक एकविशेष्यक आरोपः, द्वितीयेन द्विविशेष्यक एकत्वप्रकारक आरोपः। दृश्यते चोभयत्रारोपविशेष्येण सह समानवचनता आख्यातस्य तथा च निगरणाभावे विषयिविषययोर्द्वयोरुपादाने कर्मत्वे च आख्यातेन विशेष्यनिष्ठमेव कर्मत्वमुच्यते न आरोपप्रकारविषयिनिष्ठम्, यत्र भावनान्वयस्तत्रैवाख्यातार्थसंख्यान्वय इति नियमेन विषयेण साकमेव समानवचनता न विषयिणेति नियमेन विषयचिकुरबहुवचनानुसारि अमानिषतेति बहुवचनं क्रियापदं युज्यते, न अमानीत्येकवचनं विषयिणमयशोयुगमनुसरत्।

इदमवधेयम्—अन्यत्रारोपदाढर्याय विषयविषयिवाचकपदयोः समानालिङ्गवचनताऽवश्यमपेक्ष्यते अन्यथा तु दोष इति परम् आरोपस्य व्यङ्ग्यतायाम्, प्रकृते तु मन्धात्वर्थ आरोपः, अत्र न तस्य दूषकता।

इदन्तु चिन्त्यते—यथा मया पूर्वपक्षयुक्तिर्वर्णिता तथा व्युत्पत्तिवादे वर्तते। अत्रापि इतः प्रागेव चषके आरोपस्थले व्युत्पत्तिवादव्युत्पादितो नियम आरोपविशेष्यसमानवचनतारूपो वर्णितो वर्तते। परमत्र प्रसङ्गे आरोपस्थलीयं नियममुपेक्ष्य तात्पर्यटीकास्वोपज्ञाऽपि कथं प्रकृतिविकृतिकर्मस्थलीयं नियममतिदिशति? प्रकृतिविकृतिभावस्यात्राप्रसराद् विशेष्यसाम्याद् दृष्टान्तता त्ववश्यम्।

'काष्ठानि भस्मराशिः क्रियन्ते' इत्यादौ प्रकृतिकाष्ठगतं कर्मत्वमेवाख्यातेनोच्यते, तेनैव आख्यातस्य समानवचनता, न तु विकृतिभस्मराशिनिष्ठं तेन तत्र प्रातिपदिकार्थमात्रे प्रथमा, द्वयोश्च कर्मणोर्धात्वर्थेऽन्वयः। विकारार्थकक्रुधात्वर्थे काष्ठानां भस्मराशेश्चान्वयः, भस्मराश्युत्पत्तिप्रयोजकनाशप्रतियोगीनि काष्ठानीति बोधः। 'गृह्णाति संख्यां प्रकृतेर्विकृतेर्नहि' इत्याद्यनुशासनञ्च तत्रत्यं प्रसिद्धम्। तथैव इदं रजतं ज्ञायते इत्याद्यारोपस्थले रजतत्वं प्रकारितया धात्वर्थे ज्ञाने ज्ञानञ्चाख्यातार्थविशेष्यत्वे तच्चेदमर्थेऽन्वेति, रजतनिरूपितप्रकारिताविशिष्टज्ञाननिरूपितविशेष्यताश्रय इदमर्थ इति बोधः। यथा तत्र काष्ठानि भस्मराशिं करोति द्वे कर्मणी तथाऽत्रेदं रजतं जानातीति द्वे कर्मणी। अत्रापि 'आख्यातम् आरोपविशेष्यस्य विषयस्य संख्यां गृह्णाति, आरोपप्रकारस्य विषयिणः संख्यां न गृह्णाति' इति नियमोऽनुशासनतां बिभर्तीति। तथापि यथाकथञ्चित् समाधातुमनोभिरित्थं विचारणीयम्, सिद्धं भ्रमाधिष्ठानं प्रकृतिः, आरोप्यमाणमध्यस्तं विषयिविकृतिः, वेदान्तपरिभाषादिषु रजतादेरधिष्ठानचैतन्यापेक्षयैव विवर्तः, रजतत्वप्रकारिकाऽविद्या तु रजततदाकारवृत्त्याकारेण परिणमते इत्यादि वर्णितमेवेति आरोपस्थले प्रकारविशेष्ययोः प्रकृतिविकृतिभावो न दुर्लभः। परमत्र न लिखितमित्येव नूतनम्।

उत्तरपक्षः—राज्ञा स्वशिरःस्थितमयशोयुगलं द्विफालबद्धादिचकुरा अमानि=अयशोयुगलविशेष्यको द्विफालबद्धचिकुरप्रकारको राजकर्तृक आरोप इति अयशोयुगानुसार्येकवचनक्रियापदं प्रयुञ्जतः कवेरुत्प्रेक्षा। अयशोयुगस्य वास्तवत्वं सिद्धत्वम् आरोपविशेष्यत्वार्थं पूर्वार्धेन समर्थ्यते। तथा चारोपविशेष्यानुसारि अत्रैकवचनक्रियापदं युज्यत एव।

अत एव चिकुरेषु प्रसिद्धस्यापि शिरःस्थितत्वस्य लोकोक्त्यनुसारेणात्रापि प्रसिद्धि दर्शयितुं शिरःस्थितमिति क्लीबतयाऽयशोयुगविशेषणत्वमाविष्कृतम्। तथा च प्रकारत्वेन

चिकुरसम्बन्धिनस्तन्निष्ठाभेदारोपस्य विशेष्यीभूतं निजायशोयुगमित्येव शाब्दबोधस्य रीतिं विदाङ्कुर्वन्तु।

तात्पर्यटीका च—अत एवायशोयुगस्योद्देश्यत्वादेव। तदारोपे तद्धर्मारोपस्य न्याय्यत्वादुपसृज्यसंगतिः। लोकोक्त्यनुसारेणेति—

शिरोभिरुह्यते यस्य शासनं सर्वपार्थिवैः।
सहस्व कतिचिन्मासान् मीलयित्वा विलोचने॥ इत्यादिवत्।

अत्रापि अयशोयुगेऽपि। आविष्कृतम् तेनाभेदारोपो निष्प्रत्यूह इत्यसूचि। रीतिमित्यनेनान्यत्राप्युद्देश्यविधेयभावसंदेहप्रसक्तावित्थमुपक्रमोपसंहाराभ्यां निर्णयः कार्य इति सामान्येनोक्तमर्थं विशदयितुमाह-यत्तु, इति।

आरोपमाणस्य विषयिणोऽपि समर्थनमपेक्ष्यते क्रियते च तथाकविभिर्न केवलं विषयस्य, तव शिरसि अयश एव लिखितमित्यादिव्यवहारेषु लोकेऽपि अयशोधारणं प्रसिद्धमिति च मम प्रतिभानं न ग्रन्थसम्बद्धमिति तत्रन्यत्।

टीकया यत्तु' इत्यनेनावतारितोऽग्रिमश्चषकग्रन्थः—यत्तु 'पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाऽऽकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः' इति महाभाष्यविरोधमुद्भाव्य गृह्णातीत्यनुशासनस्य च्विप्रत्ययमात्रविषयतामनुमन्यन्ते। अत्र 'अनुशासनस्य अनुशासनस्येव संग्रहवाक्यस्य' एतावती एव टीका। प्राक्प्रकृतिविकृतिवाचकपदसमभिव्याहारे आख्यातस्य समानवचनता प्रकृतिमेव कर्तारं कर्म वानुसरति, न विकृतिं कर्तारं कर्म वा इति सिद्धान्तितम्। अत्र महाभाष्ये 'सुवर्णं खदिराङ्गारसवर्णे कुण्डले भवतः[1]' इत्यत्र क्रियापदं विकृतिकर्तृकुण्डलसमशीलं न प्रकृतिकर्तृसुवर्णानुसारीति भाष्यविरोधः, 'गृह्णाति संख्यां प्रकृतेर्विकृतेर्नहि' इत्यनुशासनं 'भस्मीभवन्ति काष्ठानि' इत्यादौ च्विप्रत्ययप्रकृत्यर्थविकृतेरेव संख्याग्रहणं निषेधति नान्यस्या विकृतेः।

तथा च लक्ष्यानुसारिणी व्याख्या, क्वचिद् विकृतेः संख्याग्रहणं यथा भाष्ये इति यत्तु मतं पर्यवसितम्। तत्खण्डनन्तु अग्रिमे ग्रन्थे, यथा चषकम्—अत्र वदन्ति—खदिराङ्गारसवर्णे इति हि विशेषणं कुण्डलयोः प्रकृतित्वं गमयति, सिद्धाया विकृतेः पाकानपेक्षणात्। पुनरपरयाऽऽकृत्या युक्त इति विशेषणं सुवर्णपिण्डस्य विकृतित्वं गमयति। आकृत्यन्तरयोगस्य प्रकृतित्वाप्रयोजकत्वात्। युज्यते चैतत्—मृत्तिकेत्येव सत्यमितिवत् संहृतिमुखेन पुनरावृत इति विशेषणेनापि सुवर्णपिण्डस्य विकृतित्वं गम्यते। तथा हि सति पिण्डीभूतसुवर्णोपक्रान्ताकृतिपरम्परायास्तत्पर्यवसायित्वेन सिषाधयिषितसुवर्णनित्यत्वस्य सिद्धेः। तस्मात्पूर्वनिर्दिष्टकिञ्चिदाकृतिविशिष्टसुवर्णस्य कुण्डलादिप्रकृतेरप्यपरिनिर्दिष्टापराकृतिविशिष्टस्य तत्पिण्डस्य विकृतित्वमेवात्र भवतो महाभाष्यकारस्याभिप्रेतमित्यस्यापि वक्तुं शक्यत्वाद् इत्यास्तां यथायथास्थितमेव। इत्थञ्च—

अवस्थान्तरतापत्तिरेकस्य परिणामिता।
स्यात्क्षीरं दधिमृत्कुम्भो सुवर्णं कुण्डले यथा॥

इत्यत्रापि स्यादित्यस्य यथास्थितस्यैवावृतिर्न तु वचनविपरिणतस्य तृतीये इत्यत्र साधकेन।

---

1. म० भा० पस्प० पृ० ६३।

अथास्य तात्पर्यटीका—युज्यते चैतद् इति। अन्यथा सुवर्णनित्यतासाधनोपक्रमभङ्गापत्तेः। नन्वित्यस्यापि वक्तुं शक्यत्वादित्यधिकमिति चेत्, न, वाक्यान्तरस्थितं सुवर्णपदं कटकाः क्रियन्ते इति वाक्यसाकाङ्क्षं मत्वाऽऽख्यातस्य विकृतिसमानवचनत्वमापाततो विजानतामभिमानस्य दुरुच्छेद्यतामवगमयितुमित्यस्यापीत्युक्तेः। समानवाक्यश्रुत्या पुनःपुनरावृत इत्यादिविशेषणैः सुवर्णपिण्डस्य विकृतित्वमेवाध्यवसीयते इत्यभिप्रेत्याहास्तां तदिति गृह्णातीत्यादिरर्थः। यथास्थितमेवासङ्कुचितमेव तत्सामान्यादितरस्यापि तथात्वमिति न्यायादित्याशयः।

इत्थञ्च पूर्वनिर्दिष्टसुवर्णस्य प्रकृतित्वसंभवे च। उक्तरीत्यैव सकलग्रन्थसामञ्जस्येन गृह्णातीत्यनुशासनस्यासंकोचेनैवोपपत्तौ संकोचे मानाभावादुक्तमलमधिकेनेति। अशाब्दसंकोचेनेत्यर्थः।

एतावता पुनर्यत्तु मतविमर्दनेन विकृतिकर्मानभिधानम् आख्यातेनेति व्यवस्थापितम्। अतः परमपि प्रकृतिविकृतिभावविचिन्तनमेव। यथा चषकम्—कथं तर्हि किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवदित्यादि, सुवर्णस्य प्रकृतित्वानिर्णयेन प्रकृतिकर्मासंग्रहप्रसङ्गादिति चेद्, अवयवावयविसाधारणसुवर्णत्वजातेस्तु प्रकृतित्वप्रयोजकत्वादित्यस्मत् पैतृकी पद्धतिः।

यदुक्तवन्तः—सुवर्णं पिण्डीभवतीति प्रयुञ्जाना एव पिण्डः सुवर्णीभवतीति न प्रयुञ्जते इत्यभूततद्भावपर्यन्तम्। अभूततद्भावश्च पूर्वकालिकभेदसमानाधिकरणतादात्म्यसम्पन्नत्वम्। न च शक्त्यानन्त्यम्, प्रकृत्यर्थतावच्छेदकधर्मे धर्मत्वेन प्रत्ययवाच्ये प्रकृत्यर्थस्य पूर्वकालावच्छिन्नतन्निष्ठभेदप्रतियोगितावच्छेदकत्वतन्निरूपितप्रकृत्यतावच्छेदकनिष्ठाधेयताविशेषोभयसम्बन्धेनान्वयोपगमेनैव सर्वसामञ्जस्यात्। प्रथमसम्बन्धेन पिण्डः सुवर्णीभवतीति प्रयोगस्य, द्वितीयसम्बन्धेन द्रवीभवति तस्मिन् पिण्डीभवति सुवर्णमिति प्रयोगस्य च वारणासंभवादित्यलं प्रसक्तानुप्रसक्तचिन्तया।

अत्र तात्पर्यटीका—तर्हि सुवर्णस्य विकारत्वावश्यंभावे। अस्मत् पैतृकी पद्धतिरिति—

प्रभाकरतनूजेन यथा पाणिनिभाषितम्।
नारायणेन जडिना कृतेयं पदपद्धतिः॥ इति।

कृतपदसंकेतःऽस्मत् पितृविरचितो ग्रन्थ इत्यर्थः। अभूततद्भावं निर्वक्ति अभूततद्भावश्चेति। पूर्वकालिकभेदेति। भेदस्याव्याप्यवृत्तित्वमभिप्रेत्य, अन्यथा पूर्वकालावच्छिन्नावृत्तिधर्म एवाभूततद्भावो बोध्यः। तादात्म्यसम्बन्धत्वमिति।

यद्यपि 'संघीभवन्ति ब्राह्मणाः' इत्यादौ ब्राह्मणेषु तथा सम्पत्तिर्वास्तविकी तथापि भस्मीभवन्ति काष्ठानीत्यादिसाधारण्याय तादात्म्यसम्बन्धावच्छिन्नविशेष्यतारूपा सात्र विवक्षिता, कथमन्यथा मशकीकृतराक्षसमित्यादि। अत एव भस्मीभवन्ति काष्ठ नीत्यादौ काष्ठपदस्य काष्ठारम्भकावयवलक्षणाभ्युपगमेऽपि न निस्तारः, पक्वापक्वयोर्भस्मकाष्ठारम्भकावयवयोरपि तादात्म्यासंभवादित्यवधेयम्। अत्र सुवर्णं पिण्डीभवतीत्यतः सुवर्णत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकपिण्डत्वावच्छिन्नतादात्म्यापन्नं सुवर्णमिति शाब्दबोधसरणिरन्यत्रापि ऊह्या। समासे तु राक्षसत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकमशकत्वावच्छिन्नतादात्म्यप्रकारकराक्षसविशेष्यकारोपकर्तारमित्यादिः।

एतावतः प्रकृतिविकृतिभावविवेचनस्य सारग्रहणम्। अभूततद्भावपर्यन्तम्, इत्यनेन यः पूर्वं नास्ति भवति च पश्चात् स विकृतिः, यथा सुवर्णस्य पिण्डीभावः। अत एव सुवर्णं पिण्डी-भवतीति व्यवह्रियते। सुवर्णञ्च पूर्वमपि पिण्डदशायां कुण्डलादिदशायाञ्च, ततो न विकृतिः, अत एव पिण्डः सुवर्णीभवतीति न व्यवह्रियते। प्रकृतिविकृत्योस्तादात्म्यमपि सुवर्णस्य तद्विकारेषु, न तु काष्ठानां भस्मादिषु। अतो वास्तवं तादात्म्यं न ग्रहीतुं शक्यते, किन्तु यथा कथञ्चिदारोपितमपि। श्रीरामबाणेन राक्षसा मशकीकृता इत्यादावारोप एव गतिः। तथा च आरोपस्थलीय-कर्माण्यपि प्रकृतिविकृतिकर्मभ्यां संगृहीतानि, आरोपप्रकारो विकृतिः, विशेष्यश्च प्रकृतिः। अतो यन्मया प्रागवतरणे चिन्तितं तदत्रावसाने पर्यवसितम्।

अन्ये नैयायिकाः प्रकृतिविकृतिभावात् पृथगेवारोपस्थलीयकर्मद्वये आरोपविशेष्य-समशीलम् आख्यातक्रियापदमिति व्यवस्थापयन्ति। अस्मिंश्चैतदनुकूलं यत् प्रकृतिविकृतिकर्म-स्थलीयेन प्रसिद्धेनैवानुशासनेन व्यवस्था निर्वहति, आरोपस्थलीयनियमान्तरकल्पना नापतति।

शब्दार्थव्यवस्थापनकुशलानामुपरि एषा समस्या। दुह्यादयो ये द्विकर्मकाः परिगणिताः, तेषाम् आख्यातेन किं कर्माभिधेयं किञ्चानभिधेयमित्यपि अनुशिष्टं वर्तते। परं प्रकृतिविकृतभावम् आरोपञ्चादाय अन्यान्यपि बहूनि भवन्ति द्विकर्मकाणि क्रियापदानि, कर्तृप्रत्ययसमभिव्याहारे तु द्वितीयामात्रस्य प्रश्नः, उभे अपि कर्मणी विभूषयतु द्वितीया, परं कर्माख्यातसमभिव्याहारे उक्तानुक्तव्यवस्था कथं सम्पद्यताम्? उभयत्रैकैव कर्मत्वशक्तिराख्यातेनोच्यते। तेनोभयमुक्त-मित्यपि न व्यवतिष्ठते दुह्यादिकर्मणोरपि उभयोरुक्तत्वापातात्। तत्र विभागे क्षरणे च विभिन्न-धात्वंशेऽन्वयात् कर्मत्वशक्तिर्विभिन्नेति न विनिगमकं संभवति। काष्ठानि भस्मराशिः क्रियन्ते इत्यादौ भस्मराशेरुत्पादे काष्ठानाञ्च नाशेऽन्वयात्। उभयोरुक्तत्वेऽपि संख्याभिधानं नियमयति गृह्णाति संख्याम् इत्याद्यनुशासनम्।

तावताऽपि न शान्तो व्याधिः—प्रकृतिकर्मण आख्यातार्थेऽन्वयः, आख्यातार्थे च धात्वर्थस्य, विकृतिकर्मणश्च साक्षाद् भेदेनैव धात्वर्थेऽन्वय आपतति। निपातातिरिक्तनामार्थ-धात्वर्थयोः साक्षाद्भेदसम्बन्धेनान्वयं न कोप्यङ्गीकरोति।

एवं समस्यायां नैयायिका अगत्या विकृतिकर्मणः साक्षाद् भेदेन धात्वर्थे एवान्वयं रोचयन्ते, उक्तं नियमञ्च संकोचयन्ति, कर्मत्वान्तरविशेषणतापन्नधात्वर्थे एव कर्मत्वस्य विकृतिकर्मणः संसर्गतया भानं न कर्मत्वान्तरविशेषणतानापन्नधात्वर्थे इति नियमेन अतिप्रसङ्गं निवारयन्ति। अत्र च ग्रन्थे इतः प्रागेवास्मिन् विषये भूयसा विचारेण साकं कार्यकारणभावप्रतिबध्यप्रतिबन्धक-भावप्रदर्शनमुखेन कर्तृकर्मणोः साक्षाद्धात्वर्थनियमा निर्मिताः, पद्येषु गुम्फिताः पुनर्व्याख्याताश्चेति सूचनयैव विदुषां समुत्सुकता समेधताम्, ग्रन्थोद्धरणन्तु विरसतां लेखस्य विपुलताञ्च समर्जये-दिति परिह्रीयते।

प्रकृत्यनुसारिणी क्रियेति प्रसङ्गे वृक्षः पञ्च नौका भवति, एक एव त्रय इव भाति कन्दुकोऽयम् इति कविप्रयोगञ्च कतिपये समुदाहरन्ति। लघुविभक्त्यर्थनिर्णयस्तु न प्रकृतिविकृति-भावमनुरुन्धे, किन्तु उद्देश्यविधेयभावम्। उद्देश्यानुसारिणी क्रिया, यथा शास्त्राणि चेत् प्रमाणं स्युरित्यादीति निर्णयते। प्रकृतपद्ये तु उभयथाऽपि निर्वाहः।

पद्यमुखेन ग्रन्थस्वरूपं प्रदर्शयतो ममेदमपि समीहितं यद्बहवो ग्राहका भवन्तु, नैयायिका वैयाकरणा आलङ्कारिकाश्च समेऽत्र विचिन्तयन्तु स्वीयां सहृदयतां भावनाञ्चोपयोजयन्तु क्वाचित्के एतादृशे प्रयोगे साधुत्वस्य अनुशासनस्य च चिन्तां विहाय कवेस्तात्पर्यविषयः कीदृश आरोप इति गवेषयन्तु ।

मेरो विभजनं वितरणञ्च सिन्धोरुत्सर्गजलव्ययैर्मरुविधानञ्च न कृतमिति अयशोद्वयं सत्यं शिरसि स्थितम् । परं द्विकालवद्धाचिकुराणां तत्र किं प्रयोजनम् ? अयशोऽमूर्तं वस्तु लोके शिरसि व्यवह्रियमाणमपि तस्य मूर्तं किं रूपमिति जिज्ञासासंभवेन कालकस्यायशसः कालकान् चिकुरान् स्थानमकल्पयदिति चिन्त्यते, चेत्, राजा चिकुरान् अयशोद्वयम् अमन्यते इति कवेरभिप्रायश्चेत् चिकुराणाम् अधिष्ठानता विषयतां अयशोद्वयस्य आरोप्यमाणता विषयिता आयाति ।

एतदपि विचारणीयं यद्राजविषयरतिं पोषयितुकामः कविरयशसः स्थितिं कामयतेऽभावं वा ? रतिपोषणे कीदृश उपयोगोऽयशःस्थितेः ? अयशस उपपादकं पूर्वार्थं तु मेरुखण्डनवितरणे समुद्रस्य जलराहित्यसम्पादनं मनुष्यस्य कस्यापि राज्ञोऽशक्यं न केनापि कृतं करिष्यते वा, दातुं शक्यं सर्वं दत्तं कर्तव्यं सर्वमनुष्ठितम् । अनेन महती कीर्तिरर्जिता । मेरोः समुद्रस्य चाधिपत्यं वहतोऽस्य महती उदारता, कलुषस्यायशसः किं स्थानं सर्वं शुक्लं जातम्, अयशसः सवर्णा अपि एतादृशाश्चिकुरा एवावशिष्यन्ते, इत्यादि व्यञ्जनया अयशोयुगस्यारोप एवामानि राज्ञा न स्थितिरिति कथन्न व्यज्यते ?

शब्दानुशासनं व्यवस्थापयन्तोऽपि विद्वांसोऽयशोयुगस्यारोपेणैव पद्यमिदं पश्यन्ति । पश्चादनुशासनविरोधमसहमाना एव अयशोयुगस्य आरोपाधिष्ठानतां समर्थयन्तः प्रतिमान्ति । तथा च अयशोयुगस्य आरोप्यमाणतायां विकृतिकर्मतां गतायामपि अनुशासनव्यवस्थापनम् आधुनिकानां विपश्चितां शिरसि स्थितमित्यपि कथं न कस्यचिन्मनसि आयातु ?

अत्रापि ग्रन्थे व्याकरणमतमालोचितम् । परं सिद्धान्तो व्युत्पत्तिवादादिरीत्यैव वर्णितः । विकृतिकर्मणो धात्वर्थे साक्षादेवक र्मता सम्बन्धेनान्वयः, संसर्गतया भाने न द्वितीयादेरावश्यकता । अयन्तु न प्रकाशितो ग्रन्थः परं प्रकाशिते ग्रन्थद्वये न्यायव्याकरणमतालोचनापरे व्याकरणपक्षपातिनि विषयोऽयमुपलभ्यते । प्रथमोऽविदितकर्तृकः १९१५ ईशाब्दे बम्बईगुजरातीमुद्रणालये वादार्थसंग्रहे मुद्रितो लघुविभक्त्यर्थनिर्णयः । द्वितीयो न्यायव्याकरणालोचनापरः प्रसिद्धो वैयाकरणभूषणसारस्य दर्पणग्रन्थः । कदाचन तेन प्रभावितोऽपि चषकग्रन्थो भवेत् । अमुद्रितस्यापि तदानीं लेखबन्धस्य प्रचारोऽनुमातुं शक्यते । अध्ययनाध्यवसायिनः पश्यन्तु । ऊहापोहपटवः कल्पनाशोलाः समर्थनीयप्रयोगानुसारिविकृतिकर्मणोऽपि क्वचिदाख्यातसमानवचनत्वं समर्थयितुं प्रभविष्यन्तीति विस्तराद्बिभ्यद्विरमामि ।

● ● ●

श्रीचक्रं तदधिष्ठात्री च

प० पट्टाभिरामशास्त्री, विद्यासागरः

साहित्य-योगतन्त्रविभागाध्यक्षचरः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी

संसारयात्राशकटस्य द्वे चक्रे—दैवं पुरुषकारश्च। मिथस्सापेक्षयोरप्यनयोः क्वचिद्दैवं प्रबलं भवति, क्वचिच्च पुरुषकारस्य प्राबल्यम्। यथा हि शब्दशक्त्युद्भवध्वनिस्थलेऽर्थस्य, अर्थशक्त्युद्भवस्थले च शब्दस्य सहकारित्वमङ्गीकुर्वन्त आलङ्कारिका उभयत्रान्यतरस्य प्राबल्यमास्थिषत, तादृगेवेदम्। शब्दे यथा शक्तिस्तथाऽर्थेऽपि काचन शक्तिरेष्टव्यैव। शक्तिद्वयमिदं दैवं पुरुषकारश्चेति चक्रद्वयम्। अर्थाभिधानानुकूला शक्तिश्शब्दे सर्वैश्शास्त्रकारैरङ्गीक्रियते; किन्त्वर्थे तादृशी शक्तिः कतिपयैरेव स्वीक्रियते। भट्टपादाः 'सामर्थ्यं सर्वभावानां शक्तिरित्यभिधीयते' इत्यभिदधिरे। अत्र 'सर्वभावानां' इत्यभिदधानास्ते शब्द-तदर्थमयेषु भावेषु तां बोधयन्ति। अर्थगतशक्तेरपि कश्चन महिमा यथा शब्दगतशक्तेः। आलङ्कारिका इममर्थं साधु समर्थयन्ते। तन्त्रशास्त्रकारा अपि गच्छन्त्यस्मिन्नेव पथि क्वचिच्छब्दस्य शक्तिमवलम्ब्य, क्वचिदर्थस्य शक्तिमवलम्ब्य। अत एव वेदे यथा ज्ञानकाण्डं कर्मकाण्डमिति प्रविभागः, तथा तन्त्रशास्त्रेऽपि ज्ञानकाण्डम्, चर्याकाण्डमिति। ज्ञानकाण्डे शब्दशक्तिः, चर्याकाण्डे चार्थशक्तिराश्रीयते। ज्ञानकाण्डेन दैवं बोध्यते, चर्याकाण्डेन च पुरुषकारः।

ज्ञानकाण्डं तु 'आचार्यवान् पुरुषो वेद' इत्युपदिशदपसरति। उपदेशस्तु विशिष्टमुच्चारणम्, उच्चारणञ्च शब्दस्यैव। आचार्योपदिष्टस्य शब्दस्यासकृदुच्चारणेन पुरुषश्शक्तिमान् सम्पद्यते। एवमवाप्तशक्तिः पुरुषश्चर्याकाण्डे प्रवेष्टुमर्हति। अत एव गुरूपदेशक्रमेण सिद्धमन्त्रस्साधकस्तच्चर्यया साफल्यमश्नुते।

मीमांसकसम्मतेयं सरणिः। विश्वस्य जगतो गुरुर्वेदाभिधानश्शब्दराशिरपौरुषेयः। स प्रथमं स्वयमुपदिशति—'स्वाध्यायाध्ययनमाचर' इति। अध्ययनञ्च गुरुमुखोच्चारणानूच्चारणम्। एवमवाप्तवेदविद्यो गार्हस्थ्यं प्रविश्य वेदोपदिष्टानि कर्माणि, ऐहिकामुष्मिकापवर्गपर्यन्तानि फलानि दातुं समर्थानि यथायथं कुर्यादिति। तत्रावाप्तविद्यस्यैव क्रतुष्वधिकारः, यतो हि कर्मानुष्ठानावसरे शब्दजनितशक्तिसम्पन्नस्याप्यर्थज्ञानरहितस्य न कर्मस्वधिकार इति सिद्धान्तात्, कर्मानुष्ठानसामान्यं प्रति तदर्थज्ञानस्याङ्गत्वात्। विनाङ्गेनाङ्गी कथं फलदो भवेत्? अतः कर्मानुष्ठाता, अर्थज्ञानजन्यशक्तिसम्पन्नो भवेदित्यायाति। इयं सरणिर्याज्ञिकमीमांसकानाम्। सैव तन्त्रशास्त्रसिद्धचर्याकाण्डस्यापि। यथा हि याज्ञिककर्मकाण्डे वेदाध्ययनावसरे शब्दानामर्थे सत्यपि शब्दस्यैव प्राधान्यम्, शब्दशक्तिरेव च प्राप्या; तथा कर्मानुष्ठानावसरे चार्थस्यैव प्राधान्यम्, अर्थशक्तिरेव प्राप्या। मन्त्रशब्दस्यार्थस्तु यज्ञिकानां देवतारूपः।

याज्ञिकमीमांसकानां दार्शनिकमीमांसकानाञ्चास्ति मिथो भूयान् भेदः। याज्ञिका देवतारूपार्थशक्तेः क्रतुषु प्राधान्यमभ्युपयन्ति, दार्शनिकास्तु शब्दशक्तेरेव प्राधान्यम्। इदं तेषामत्र

तात्पर्यम्—यत्कर्मानुष्ठानावसरेऽध्ययनविधिगृहीतशब्दमया एव मन्त्राः पठ्यन्ते, न त्वर्थावबोधकब्राह्मणवाक्यानि, तानि क्रतोर्बहिरेवार्थमवबोध्य चारितार्थानि, क्रत्वनुष्ठानावसरे न तेषां प्रसरः। यद्यपि कर्मसमवेतार्थस्मारकतया मन्त्राः प्रसिद्धाः शब्दमात्रस्य न तत्रोपयोगः, तथापि तत्स्मारणम् अध्ययनविधिगृहीतानुपूर्वीघटितमन्त्रद्वारैवेति नियमाश्रयणाच्छब्दस्य प्राधान्यमिति स्वीकारान्न दोषः। अतोऽत्र शब्दस्यैव प्राधान्यमित्याशयः।

तान्त्रिकचर्याकाण्डेऽपीदं समानम्। गुरुमुखेन गृहीतमन्त्रस्य निर्दिष्टसंख्यया जपः, पुरश्चरणम्, दशांशहोमः, तद्दशांशतर्पणम् मार्जनञ्चेत्यादीनि मन्त्रसिद्धये कर्तव्यानि भवन्ति। तदनन्तरं पूजनविधानानुसारेण पूजनम्, तत्रापि होमस्तर्पणमित्यादीनि भवन्ति कर्तव्यानि। पूजनावसरे शब्दजनितशक्तेरर्थजनितशक्तेश्चैक्यानुसन्धानम्। इदञ्चैक्यानुसन्धानमन्तर्यागपदेनाभिधीयते। साधकस्येदमत्यावश्यकम्। अर्थाद् यो बहिर्यागः करिष्यते तस्यैवान्तर्यागरूपेणानुष्ठानम्। एवं कृते चेतसः स्थिरीभावः, तेन च बहिर्यागः सुसम्पद्येत। बहिर्यागस्तु पूर्वाभ्यासरूपः, यथा हि—सुशिक्षितस्य टङ्कणकर्तुर्वीणावादकस्य वाङ्गुलयः स्वाभ्यस्ताक्षरतत्तदक्षरतन्त्र्यादिविन्यासे स्वयञ्चेष्टन्ते, तथैव बहिर्यागे स्वाभ्यस्तेऽन्तर्यागस्सुकरो भवति। हस्तिन्या वशीकाराय हस्तिन एव सामर्थ्यम्, हस्तिनो वा हस्तिन्या इति यथा तथैवान्तर्यागसाधनाय बहिर्यागः, बहिर्यागसाधनाय चान्तर्यागस्साधनम्। सापेक्षावेवेमौ भवतः। सिद्धेऽन्तर्यागे बहिर्यागो लोककल्याणाय लोकानां प्रवृत्तिसिद्धये वानुष्ठीयते। एवमेव निर्गुणनिराकारनिरुपाधिकानन्तब्रह्मसाक्षात्काराय सगुणसाकारसोपाधिकब्रह्मोपासनापेक्षा। विविधसांसारिकविषयासक्तं मानवानां भवति चेतः, विषयाणां वशीकरणाय विषयी वशीकर्तव्यः। साधूक्तं नीलकण्ठदीक्षितेन—'विषयाननुकूलयितुं विषयिणि हृदये विधीयतां यत्नः' इति।

एतेनेदं सिध्यति—यद्दैवं नाम किञ्चिदस्तीत्यवधार्य तदधिगमाय पुरुषकारः। पुरुषस्य यथायथमुद्यमे सम्पन्ने दैवं फलति इति। पुरुषकारेणैव सर्वं साधयितुं शक्तौ विद्यमानायाम् अजागलस्तनवद्दैवस्य काऽवश्यकतेति प्रष्टारः प्रश्नान् कुर्युः। नेमे प्रत्नाः प्रश्नाः। रामायणकालादेव प्रवृत्ता अमी, समाहिताश्च। रामानुजो लक्ष्मणो भ्रातू रामस्य विपिननिवासाय पितुरादेशं निशम्य सङ्क्रुद्धः—

> दैवं पुरुषकारेण यस्समर्थः प्रबाधितुम्।
> न दैवेन विपन्नार्थः पुरुषस्सोऽवसीदति॥
>
> द्रक्ष्यन्ति त्वद्य दैवस्य पौरुषं पुरुषस्य च।
> दैवमानुषयोरद्य व्यक्ता व्यक्तिर्भविष्यति॥ (वा० रा० अयो० का०)

इति त्रिविष्टपस्यैव भागधेयस्य श्रीरामस्य समक्षमेवं कथयति। रामश्च दैवं लक्ष्मणस्य पौरुषं जानन्नुत्तरयति—

> कश्च दैवेन सौमित्रे योद्धुमुत्सहते पुमान्।
> यस्य न ग्रहणं किञ्चित् कर्मणोऽन्यन्न दृश्यते॥ इति।

तदेव दैवं रामरूपमेकदा पौरुषमाश्रित्य रत्नाकरं शोषयितुं प्रवृत्तं सद्युद्धकाण्डे वदति—'निर्मर्यादं करिष्यामि सायकैर्वरुणालयम्' इति। तदा मूर्त्या पौरुषं लक्ष्मणाख्यं धनुरालम्ब्य

श्रीरामस्य 'भवद्विधाः कोपवशं न यान्ति दीर्घं भवान् पश्यतु साधुवृत्तम्' इति सान्त्वयति, तथापि रामाख्यं दैवमाणविकमस्त्रं धनुषि सन्धाय प्रयोक्तुमारभत । समुद्रराजस्समागतः । तदुपरितनं सेतुबन्धनादिकं निर्वृत्तमिति कथांशं वयं जानीमः ।

अत्रत्यप्रकरणेनेदमधिगन्तव्यं भवति यत्क्वचिद्दैवं प्रबलं भवति, प्राबल्यञ्च तस्य पौरुषमाश्रित्यैव । क्वचिच्च पौरुषं प्रबलं प्राबल्यञ्च तस्य दैवीं शक्ति समाश्रित्यैवेति । एवमुभयोर्दैवपुरुषकारयोर्मिथस्सापेक्षता वर्तते । तत्र शब्दशक्तिर्दैवम्, अर्थशक्तिश्च पौरुषमिति प्रागभ्यधाम ।

सम्प्रति पूर्वमुक्तस्यार्थस्य 'श्रीचक्रे' समन्वयाय श्रीचक्रस्वरूपं किञ्चिदिव निरूपयिषामः । 'श्रीचक्रं शिवयोर्वपुः' इति तन्त्राण्युद्घोषयन्ति । शिवा च शिवश्च शिवौ तयोर्वपुश्शरीरं श्रीचक्रमित्युक्तं भवति । संख्याशास्त्रानुसारेण शकारस्य ५ संख्या, वकारस्य च ४ संख्या । द्वन्द्वान्तर्गतयोरुभयोश्शिवशब्दयोः प्रत्येकमियं संख्याऽवबुध्यते । तत्र द्वयोस्संख्ययोर्मेलनेन ९ संख्या प्राप्ता भवति । एवमन्यत्रापि । एवं प्राप्तनवसंख्यया किमधिगन्तव्यं भवतीति पर्यालोचने श्रीचक्रान्तर्गतानि ९ चक्राणि संख्येयं प्रदिपादयतीति ज्ञायते । नवचक्राण्येव नवावरणानि व्यवह्रियन्ते । तत्र शिवचक्राणि चत्वारि, शिवाचक्राणि च पञ्चेति नवचक्रात्मकं श्रीचक्रं शिवयोर्वपुः—

चतुर्भिश्शिवचक्रैश्च शक्तिचक्रैश्च पञ्चभिः ।
नव चक्रैश्च संसिद्धं श्रीचक्रं शिवयोर्वपुः ॥

इत्यागमः । शिवं तच्छक्तिश्चाभेदभावनया पश्येदित्युपदेष्टुमेव 'शिवयोः' इति पदे नवसंख्या द्वयमित्यूहनीयम् । किञ्च 'श्रीचक्रम्' इत्यत्र संख्याशास्त्रेण २ + ६ + २ इत्यङ्काः । एतेषां योजनेन १० संख्या निष्पद्यते । अङ्कानां वामतो गतिरित्याश्रीयमाणे एक अङ्कोऽवशिष्यते । तेन श्रीचक्रमिति पदं तदाराधकं साधकमुपदिशति—यच्छिवशक्त्योर्भेदं न मन्येथाः, किन्तूभयोरैक्यं भावयेति ।

श्रीचक्रस्य श्रीयन्त्रनाम्नाऽप्यस्ति व्यवहारः । 'श्रीयन्त्रपदम्' २१२ संख्याया बोधकम्, तिसृणां संख्यानां योजनेन ५ संख्या निष्पद्यते । शक्तिचक्रावद्योतिकेयं ५ संख्या । वैश्वानराधिकरणसिद्धशतेपञ्चाशन्न्यायेन संख्यापञ्चके चतुस्संख्याया अन्तर्भाव इति पदमप्युभयोरैक्यमुपदिशति । अथवा नात्र न्यूनाधिकांशजनितोत्कर्षापकर्षभावशङ्काया अवसरः । श्रीचक्रम् अर्धनारीश्वरस्वरूपप्रतीकमिति स्वीकारे शङ्का समाधीयेत । शिवचक्रेषु चतुर्षु चक्रद्वयमर्धो भागः, एवं शक्तिचक्रेषु पञ्चसु अर्धो भागः सार्धद्वयम् । उभयोरर्धयोर्मेलनेन सार्धचतुष्टयसंख्या । या च नव संख्याया अर्धोभाग इति न न्यूनाधिकभागः । नाप्यैक्ये किञ्चिद् बाधकम् । एवमन्तर्भावः कटपयादिसंख्याशास्त्रेणैक्यानुसन्धानायैव भवति ।

किञ्च वक्ष्यमाणश्रीचक्रस्वरूपे त्रयश्चत्वारिंशत् त्रिकोणाः, चतुर्विंशतिः सन्धयः, अष्टादश मर्माणि इत्येवमवयवाः प्रदर्शयिष्यन्ते । तत्र श्रीचक्रं श्रीविद्यया समाराध्यते । 'श्रीविद्या' पदम् २-८-१ संख्याबोधकम् । अङ्कानां वामतो गतिरिति रीत्या १४२ संख्या भवति । चतुर्दशसंख्यायाः संख्याद्वयेन योजने क्रियमाणे १६ संख्या निष्पद्यते । इयं षोडशाक्षरी श्रीविद्या । एवं द्विचत्वारिंशत्संख्याया एकसंख्यया योजनेन त्रयश्चत्वारिंशत्संख्या (४३) जायते । संख्येयं श्रीचक्र-

गतत्रिकोणानां परिचायिका। श्रीचक्राधिष्ठात्र्या भगवत्या आराधनावसरे देव्या दक्षवामभागयोः श्वेतवर्तिकं घृतदीपं रक्तवर्तिकञ्च तैलदीपं प्रज्ज्वालयन्ति। तत्र घृतपदेन ४६ अंका उच्यन्ते। अंकानां वामगतिन्यायेन चतुष्षष्ट्या कलाभिरभिसंवृतत्वं देव्या अभिव्यज्यते। एवं तैलशब्देन ६३ संख्योच्यते। अत्राप्यङ्कानां वामगतिन्यायेन षट्त्रिंशत् संख्या तत्त्वानां बोधिका। घृतदीपो शिवस्य तैलदीपश्च देव्या अभिव्यञ्जकः। भगवान् शिवो भस्मोद्धूलितविग्रहः, देवी च कुङ्कुमाङ्किता। अत एव घृतदीपे श्वेतवर्तिका तैलदीपे च रक्तवर्तिका। साधकश्चोभयोरैक्यं भावयन् भस्मकुङ्कुमञ्चेत्युभयं धारयेत्। श्रीचक्रपूजासम्बध्यैकैकं पदार्थमादाय कटपयादिशास्त्रानुसारेण तत्त्वान्वेषणे कुशलाः साधकाः श्रीस्वामिशास्त्रिणो मद्रपुरीवास्तव्या नैकप्रकारान् लेखान् प्रकाशयामासुरिति नितान्तं तेऽनुकरणीयाः। प्राप्तेऽवसरे लेखान्तरे तानि प्रस्तोष्यामः।

नवसु चक्रेषु प्रथमं त्रैलोक्यमोहननाम्ना सङ्कीर्त्यते। चतुरस्राकारमिदं चतुर्द्वारसमन्वितं त्रिरेखाढ्यं चक्रं भवति। तिसृषु रेखासु क्रमेणाणिमासिध्यादयो दश, ब्राह्म्यादयोऽष्टौ, सर्वसंक्षोभिण्यादयो दश च देवताः पूजनीया भवन्ति। इदं प्रथमावरणम्।

द्वितीयं षोडशदलसयुतं वर्तुलाकारं सर्वाशापरिपूरकनाम्ना व्यवह्रियते। अत्र कामाकर्षिण्यादयो नित्यकलाः षोडश पूज्यन्ते। तृतीयमष्टदलकमलम्, नाम्ना सर्वसंक्षोभणं बध्यते। अनङ्गकुसुमादयोऽष्टौ देवता अत्र पूज्यन्ते। चतुर्थं चतुर्दशारं सर्वसौभाग्यदायकं चक्रम्। सर्वसंक्षोभिण्यादयो देवता अत्र पूज्यन्ते। पञ्चमं बहिर्दशारं सर्वार्थसाधकं चक्रम्। अत्र सर्वसिद्धिप्रदादयो देवताः पूजनीयाः। षष्ठमन्तर्दशारम्। सर्वरक्षाकरनाम्ना चक्रमिदं व्यवह्रियते। सर्वज्ञादयो दशदेवताः पूज्यन्ते। अष्टारं सर्वरोगहरं चक्रं सप्तमम्। वशिन्यादयोऽष्टौ देवता अत्र पूज्यन्ते। त्र्यस्रं त्रिकोणमष्टमं चक्रं सर्वसिद्धिप्रदनामकम्। बाणिन्यादयश्चतस्र आयुधदेवताः त्रिकोणे बिन्दौ च कामेश्वरादयश्च पूज्यन्ते। बिन्दुचक्रं नवमम्। सर्वानन्दमयम् इत्यस्य नाम। अत्रैव श्रीमहाभट्टारिकायाः श्रीराजराजेश्वर्या ललितामहात्रिपुरसुन्दर्याः पूजनम्। इदं नवमावरणम्। तत्तच्चक्रे या देवता पूज्यन्ते ताः प्रधानदेवताशक्तिसम्पन्नाः। अङ्गदेवता इत्येवं न ता उदासितुं शक्यन्ते। एतेन साङ्गस्य प्रधानस्य यथावदनुष्ठानेनैव यागः फलदो भवतीति यथा कर्मकाण्डन्यायः चर्याकाण्डेऽप्यस्मिंस्तथैवेति सिध्यति। तत्तदावरणपूजान्ते तत्तदावरणौपयिकमुद्रास्तद्बीजाक्षराणि च सन्ति विविधानि।

बीजाक्षराणां विषये कश्चनाद्यजातो यथाजातो लोकवञ्चनाय कैश्चन निरर्थकानि प्रवर्तितानीति वदति लिखति च। स एतावतोऽपि नोपरमते—वेदेषु मन्त्रान् प्रणय्य संयोज्य तदुपयोगाय पाशुकानि सौमिकानि च कर्माणि प्रवर्तयित्वा तत्रामीषां निर्मितानां मन्त्राणां विनियोगः कृत इत्यपि स्वैरं वदति लिखति च। तं शिशासिषामि। लक्ष्यानुसारेणैव लक्षणानि क्रियन्त इति लोकविदितः पन्थाः। कोशग्रन्था अपि तथैव। तान्त्रिकसम्प्रदायसिद्धार्थकबीजाक्षराणां निघण्टवः। एकाक्षरकोशाश्च तत्सम्प्रदायविद्भिः प्रणीता उच्चावचा उपलभ्यन्ते। तत्र तन्त्राभिधानकोशनामा सुप्रसिद्धो ग्रन्थ उपलभ्यते। तस्मिंश्च 'ह्रीं क्लीं द्रां द्रूं' इत्यादीनां निर्वचनपुरस्सरं स्पष्टमर्था निरूपिताः। बिडालाक्षणोर्निमीलनेन जगत आन्ध्यं न सिध्येत। कोशनिर्माणानन्तरमेव तान्त्रिकचर्याकाण्डं प्रवृत्तमिति कथनं सर्वप्रपञ्चोपप्लवाय स्यात्।

तान्त्रिकप्रक्रिया तु चिरन्तनी। अनया प्रक्रियया सिद्धा महात्मानस्संख्यातीता अभवन्, सन्ति चेदानीमपि। चमत्कारप्रदर्शनेनैव तेषां सत्त्वं तदप्रदर्शनेन च तेषामभाव इति निश्चयो

न समीचीनः। यश्च नाम यथाजातो वेदेष्वेव निरर्गलं प्रलपति, स तन्त्रविषये किमिव न ब्रूयात्? न तस्य रसनायां शिरास्सन्तीति मन्ये। किमनेन यथाजातेन? प्रकृतमनुसरामः। ज्ञानार्णवे—

वाच्यवाचकरूपेण सर्वे मन्त्रा व्यवस्थिताः।
यद्देवताया यो मन्त्रस्तस्या मन्त्रस्स वाचकः॥

इति सामान्यतोऽभिधाय विशेषतस्तत्र तत्र तन्त्रेषु शब्दानामर्था निरूपिताः। अतो जपद्वारा मन्त्रसिद्धौ सत्यां साधकोऽर्थसिद्धये चर्यायां प्रवर्तेत इति यो वैदिकः क्रमः, स एव तन्त्रेऽपि। अर्थशब्देन देवतारूपोऽभिप्रेयते। तदर्थमेव चर्याकाण्डम्। तत्रोपदिष्टं शक्तेराराधनाय श्रीचक्रम्।

अत्र नवसु चक्रेषु सन्ति त्रयश्चत्वारिंशत् त्रिकोणाः, अष्टादश मर्माणि, चतुर्विंशतिसन्धयश्च।

द्विरेखासङ्गमस्थानं सन्धिरित्यभिधीयते।
त्रिरेखासङ्गमस्थानं मर्म मर्मविदो विदुः॥

इति तेषां स्वरूपम्।

श्रीचक्रद्वारदेशं प्रविश्य विविधदेवताभिरधिष्ठितान्यष्टौ दुर्गाण्यतीत्य विन्दुत्रिकोणे विराजमानोऽर्थस्साधकेन प्राप्यः। द्वारदेशप्राप्तयेऽपि साधकेन महत्पौरुषमाश्रयणीयं भवति। अनर्घमणिसंयुतो महान् पीयूषसागरः। तं क्लेशेन तीर्त्वा समुद्रमध्येऽभ्रंलिहैरनोकहनिवहैः समुपेतं गहनं काननं साधकेन प्रवेष्टव्यम्। तच्च काननं भीषणं मनोहरञ्च। काननस्य मध्ये किञ्चिदेकं कदम्बानां दुर्गमं वर्त्म, तदप्यतीत्य पञ्चविंशतिप्राकारैः विविधमणिनिर्मितैर्गृहरत्नैर्विभूषितं सुन्दरं नगरं पश्यामः। नगरमध्ये चतुष्षष्टिमहाविद्या कलाभिस्संवृतं चक्रादिद्वारपालैः परिवेष्टितमेकं रत्नसिंहासनम्। तत्रेदम्—

चतुरस्रत्रिरेखाढ्यं चारुत्रिवलयान्वितम्।
कलादलसमायुक्तं कनदष्टदलान्वितम्॥
चतुर्दशारसहितं दशारद्वितयान्वितम्।
अष्टकोणयुतं दिव्यमग्निकोणविराजितम्॥
योगिभिः पूजितं योगि योगिनीगणसेवितम्।
आशाभिपूरकं दिव्यमर्चकानामहर्निशम्॥
अष्टादशसु मर्माढ्यं चतुर्विंशतिसन्धिकम्।
श्रीमद्विन्दुगृहोपेतं श्रीचक्रम्॥

तत्र विन्दुगृहे तपनीयांशुकधरः कामेश्वरो नृणां कामितार्थप्रदो भगवानासीनः। तस्याङ्कमध्यमासीना शिवा षोडशवार्षिका भगवती श्रीमहात्रिपुरसुन्दरी। एवं भगवतीमर्चकोत्तमाश्चिन्तयेयुः। सततं चिन्तनेनैवमवाप्तदैवबलाचर्याकाण्डोक्तसपर्यया कामेश्वरं कामेश्वरीञ्च सन्तर्प्य तयोरैक्यानुसन्धानेन समयेऽपवर्गरहितामवस्थां प्राप्नुयुः।

• • •

तन्त्रागमशास्त्रदृष्ट्या बौद्धपदार्थविमर्शः

डॉ० रामप्रसादत्रिपाठी

आचार्यः—प्राचीनव्याकरणदर्शनागमविभागस्य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

शब्दब्रह्मण उभयात्मकं रूपम्.

ब्रह्मणो रूपद्वयं प्रसिद्धम्—शब्दब्रह्म अर्थब्रह्म चेति। स्वचरमावस्थायाम् एतद् द्वयमखण्डरूपात्मनि एकाकारतया स्थितं भवति। शक्तिशक्तिमतोरिवोभयोरविनाभावसम्बन्धः प्रतिपाद्यते। तत्रापरप्रणवात्मकं शब्दब्रह्म, परप्रणवात्मकमर्थब्रह्मेति च नाम्नाऽपि प्रसिद्धम्। तान्त्रिकाणां नये इयं सृष्टिः परब्रह्मणः परिणामभूताऽस्ति। परिणतेऽपि ब्रह्मणि नहि कोऽपि विकारः समागच्छति। मूलतः सृष्टेर्द्वौ भागौ स्तः—शब्दमयी सृष्टिः, अर्थमयी सृष्टिश्चेति। चक्रदेहसृष्ट्योरुल्लेखो यत्र तत्र वर्त्तते, किन्तु देहो ब्रह्माण्डस्य लघ्वी प्रतिकृतिः, यत्र स्थूलताया वैभवं विलासश्चेति दृष्टिगोचरो भवति। यथा लौहमये सूक्ष्मगृहे स्थूलगृहस्य निर्माणं सम्पद्यते, तथैव चक्रमयी सृष्टिः, पिण्डब्रह्माण्डसृष्टिश्चेत्यवगन्तव्यम्[1]।

शब्दार्थसृष्टेर्युगपत्प्रवृत्तिः

शब्दार्थस्वरूपाया द्विविधसृष्टेर्बीजाङ्कुरच्छाययोरिव सहैवोद्भवाभिवर्द्धने जायेते। छायादर्शनाद् वृक्षस्यानुमितिरनुभवसिद्धा। छायायां वृक्ष इवाकृतिमत्ता, वृक्षं विहाय तस्या अनुपपत्तिश्चेत्युभयमपि प्रत्यक्षम्। तद्वद् नार्थविरहितः शब्दः। अत एव शैवदर्शने कृतश्रमः कालिदासः प्राह—

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

एवमेवान्यत्रापि निरूपितम्—

याहमित्युदितवाक्परा च सा यः प्रकाशलुलितात्मविग्रहः।
यौ मिथः समुदिताविहोन्मुखौ तौ षडध्वपितरौ श्रये[2] शिवौ॥

शब्दार्थयोरभेदः

व्याकरणागमे यथा नार्थः शब्दाद् बहिर्भूतः, तथैवेहापि शब्दार्थयोरभेदः। एवञ्च वाचकतत्त्वात्मकः शक्त्यात्मकः शब्दः, वाच्यतत्त्वात्मकः शिवात्मकोऽर्थश्चेति प्रसिद्धम्। उभयोरभेदो ह्यागमेष्वेवोक्तः—

---

१. वरिवस्यारहस्यम्, पृ० ४७, ४८। २. चिद्गगनचन्द्रिका, प्रथमवि०, श्लोकः ६।

शिवशक्तिरिति ह्येकं तत्त्वमाहुर्मनीषिणः[1]।
न शिवेन विना देवी न देव्या च विना शिवः।
नानयोरन्तरं किञ्चिच्चन्द्रचन्द्रिकयोरिव[2] ॥

उक्तग्रन्थेन शब्दार्थयोरभेदः सिद्ध्यत्येव। तयोर्यामलं रूपम्।

संविदि शब्दार्थयोः समस्फुरणम्

तस्यां चान्तःसञ्जल्परूपायां संविदि द्वावपि शब्दार्थौ समं स्फुरतः। अत एव तयोरभेद एव विख्यातः। उक्तं चेह—

यतः शब्दानुवेधेन न विना प्रत्ययोद्भवः।
यथा तथा जगद्विद्धं सर्वमेव निजात्मना।
तथाऽऽत्मनाऽनुविद्धेव सर्वतो भाति भारती[3] ॥

शब्दानुवेधं विना नार्थस्य प्रत्ययो भवति। अत एव शब्दानुवेधपूर्वकमर्थप्रत्ययादुभयोरभेदः, सहैव तयोः स्फुरणं च निश्चीयते। तथा हि—माऽस्त्वक्षरबिन्दुरूपस्यान्तस्सञ्जल्पस्य कारणम्। यतो नादोऽन्तस्सञ्जल्पं जनयति। येन बुद्धिर्बाह्यविषयप्रतिबिम्बमध्यवस्यति। बाह्यो व्यक्तः शब्द आन्तरसञ्जल्पस्य बाह्याकार एव। अतो न परमार्थतोऽर्थो बुद्धिजनकः।

असंख्येया नादाः। एष्वेकः प्रत्येकं परिमितात्मना सम्बद्धः। स च व्यक्तिविशेषेष्वन्तस्सञ्जल्पोद्भावको बाह्यविषयस्य सविकल्पग्रहणकाले। सञ्जल्पश्च शब्दार्थयोरैक्यरूपात्मकः।

श्रूयमाणा वर्णाः श्रोतृनिष्ठं नादमभिव्यक्तीकुर्वन्ति। अभिव्यक्तो नादः श्रोतृबुद्धेः पुरतः शब्दार्थद्वयात्मकान्तस्सञ्जल्पमुपस्थापयति। श्रोतृबुद्धिः शब्दार्थयोः पृथक्करणरूपमध्यवसायं कृत्वायमर्थ इत्यध्यवस्यति[4]।

अत एवार्थसृष्टिशब्दसृष्ट्योर्युगपदेवाङ्कुरतच्छाययोरिव परस्परसम्पृक्तयोरुत्पत्तिः, पदार्थमात्रस्य शब्दानुविद्धत्वात्।

शब्दसृष्ट्यर्थसृष्ट्योर्ज्ञानजनकं मन एव

शब्दार्थसृष्ट्योर्ज्ञानजनकं मन एवास्ति। तत्तु शब्दं श्रोत्रेन्द्रियेण गृह्णाति, अर्थस्तु क्वचन साक्षाद् नेत्रादिभिश्च गृह्यते। मनः श्रोत्रश्चार्थान्तर्गतं मन्यते। अत एव यथा शब्दार्थमयी सृष्टिः स्थूल-सूक्ष्म-सूक्ष्मतर-सूक्ष्मतमभेदैश्च चतुर्धा भवति, तथैव श्रोत्रमनसी प्रत्येकमपि चतुर्धा विभज्येते। तत्र स्थूलश्रोत्रेण स्थूलशब्दश्रवणात् स्थूलार्थस्य स्थूलमनसा ज्ञानं भवति। एवमेव सूक्ष्मश्रोत्रेण सूक्ष्मशब्दश्रवणात् सूक्ष्मार्थस्य सूक्ष्ममनसा ज्ञानं जायते। मनःश्रोत्रयोः सूक्ष्मता शास्त्राभ्यासयोगाभ्यासयोः पटुतया सम्पन्ना भवति[5]।

---

१. कामकलाविकासः (चिद्वल्ली)।
२. मातृकाचक्रविवेकः।
३. स्पन्दप्रदीपिका, पृ० ११३।
४. श्रीकरभाष्यभूमिका, पृ० ७३।
५. वरिवस्यारहस्यम्, पृ० ४८।

सृष्टिद्वयमूलभूतं शब्दब्रह्म

वस्तुतः सृष्टिद्वयमूलभूतसूक्ष्मरूपविशेषात्मकत्वादभिन्नशब्दार्थरूपं शब्दब्रह्मेत्यादिपदनिर्देश्यं परं ब्रह्मैव । तच्च प्रकाशैकस्वरूपम् । 'घटः स्फुरति' 'पटः स्फुरति' इत्यादिप्रत्ययेन पदार्थमात्रे स्फुरणाख्यवस्तुविशेषस्य तत्तदभिन्नस्यानुभवसिद्धत्वात् । प्रकाशस्यापि स्फुरणमवश्यं वाच्यम्, 'प्रकाशः स्फुरति' इति प्रत्ययात् । तच्च स्फुरणं शक्तिरित्युच्यते । प्रकाशस्फुरणयोश्च मिलितयोरेव जगत्कारणत्वम्[1] ।

शब्दार्थयोर्बौद्धत्वप्रतीतिः

तन्त्रागमे संविदाख्या परावाक्, यत्र शब्दार्थौ सममेव प्रस्फुरतः । शब्दार्थयोरभिन्नत्वादुभयात्मिका पराख्या संविदाख्या च चितिः परमेष्ठिनो हृदयं प्रोक्ता । ततः सा वाग्विशिष्टशब्दविशिष्टविवक्षा स्फुरणात्मिका औन्मुख्यतश्चिन्तामयी भवति । ततश्च शब्दात्मकत्वेन विवृतार्थमयी भवति । एवं संवित्स्वरूपस्य सर्वप्रकाशकस्य प्रमैव प्रकाशनशक्तिर्या वागन्तःसञ्जल्परूपा, वर्णपदवाक्यजीवभूता, सैव पदार्थरूपतया बहिर्भवतीति स्वानुभवप्रसिद्धमेव प्रबुद्धानाम् । उक्तञ्च—

चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद् बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेत् ॥
स्वामिनश्चात्मसंस्थस्य भावजातस्य भासनम् ।
अस्त्येव न विना तस्मादिच्छामर्शः प्रवर्त्तते[2] ॥ इति ।

चिदेव भगवती स्वच्छन्दस्वतन्त्ररूपा तत्तदनन्तजगदात्मना स्फुरतीत्येतावत्परमार्थोऽयं कार्यकारणभावः । अत्र कार्यकारणभावे कार्यं कारणाद् भिन्नं भवति । तत्र चितिर्जगत्कारणम्; किन्तु चिज्जगतोरभेदात् कथं जगच्चितेः कार्यं भवितुमर्हति । यतो हि कार्यं कारणाद् भिन्नमिति नियमोऽस्मिन् सिद्धान्तेऽस्ति । तदुच्यते—परमार्थे कार्यकारणभावे क्रमो नास्ति । अत्र चितेः स्फुरणं जगदुन्मेषः । उभयं यौगपद्येन सम्पाद्यते, नास्ति तत्र कश्चित् क्रमः । उक्तञ्च—

'चितिः स्वतन्त्रा विश्वसिद्धिहेतुः'[3] इति ।

एवञ्च सर्वमपि प्रपञ्चजातं चिदात्मकमेव तन्त्रागमेषु प्रसिद्धम् । तथा हि—चिदात्मैव हि देवोऽन्तःस्थितं प्रपञ्चजातं स्वेच्छया स्वभितौ स्वाधारे स्वस्मिन् स्वप्रकाशे च बहिः प्रकाशयति । बहिः प्रकाशनं चान्तरवस्थितस्यैव प्रकटीकरणम् । तत्र यथा योगी सङ्कल्पमात्रेणैव यत्किमपि वस्तु बहिराभासयति, स किमप्युपादानं नापेक्षते; तथैव चितिरपि विनोपादानेनैव अन्तःस्थितम् अर्थजातं बहिराभासयति । यथा कुम्भकारो मृत्तिकामादायैव घटनिर्माणे समर्थो भवति, तथा नात्र व्यवस्था । इयं बाह्याभासो महेश्वरकल्पनानां बहिः प्रक्षेपमात्रमेवाऽस्ति । ये पदार्था महेश्वरस्य ज्ञानस्वरूपाः सन्ति, ते च तस्येच्छया ज्ञेयरूपात्मनि बहिः प्रकटतां यान्ति । ते चाहंस्वरूपाः सन्ति । ते चेदमात्मनि विश्वस्वरूपे वा आविर्भवन्ति । जीवेभ्यश्च बाह्यरूपे आभासयन्ति । उक्तञ्च पदार्थस्योदयक्रमः ।

---

१. वरिवस्यारहस्यम्, पृ० ४९ ।
२. स्पन्दप्रदीपिका, पृ० ११३ ।
३. प्रत्यभिज्ञाहृदयम्, सू० १ ।

यत्र यत्र भवेदिच्छा ज्ञानं तत्र प्रवर्त्तते ।
क्रियाकरणसंयोगात् पदार्थस्योदयो भवेत्[1] ।। इति ।

आभासवादो बौद्धपदार्थं व्यनक्ति

महेश्वरस्य सर्जनदृष्ट्या इदं दर्शनं स्वातन्त्र्यवादे प्रसिद्धम् । तस्याभिव्यक्तिराविर्भावदृष्ट्या चाभासवादात्मनि प्रसिद्धा । यथा मयूरस्य चित्रविचित्रं पिच्छकलापं तस्याण्डेऽविभिन्नरूपात्मनि निहितमस्ति, तथैव समस्तं जगद् महेश्वरेऽविभिन्नरूपतया विद्यमानमस्ति । एतादृशं सादृश्यं दर्शनेऽस्मिन् मयूराण्डरसन्यायेति संज्ञां बिभर्ति, सम्पूर्णविश्वस्याधिष्ठानं चितिः संविदेवास्ति । चित्रविचित्रः परिवर्तनशील आभासश्चितेराविर्भावमात्रमस्ति, यस्य कस्यापि प्राकट्यं भवति । प्रमेयः, प्रमाता, ज्ञानम्, ज्ञानसाधनम्, इन्द्रियाणि चेति समेषां रूपाणि परमचितेराभासमात्रं सन्ति । तथा हि—आभासरूपा एव जडचेतनपदार्था[2] इति ।

तत्राभासस्यार्थः—ईषत् सङ्कुचितं भासनं प्रकाशनं वा सर्वविधाविर्भावः परिसीमितोऽस्ति । यत्किमपि विद्यमानं वर्तते, तत्सर्वमाभासस्य विन्यासमात्रमेवाऽस्ति । उक्तश्चाभासस्य स्वरूपं यथा—

दर्पणबिम्बे यद्वन्नगरग्रामादिचित्रमविभागि ।
भाति विभागेनैव च परस्परं दर्पणादपि च ।।
विमलतमपरमभैरवबोधात् तद्वद् विभागशून्यमपि ।
अन्योऽन्यं च ततोऽपि च विभक्तमाभाति जगदेतत् ।।

यथा—स्वच्छे दर्पणे चित्रविचित्रनगराणि ग्रामादीनि च प्रतिबिम्बितानि भवन्ति, तेषां प्रतिबिम्बानि दर्पणादभिन्नान्यपि परस्परं दर्पणाद् भिन्नानि प्रतीयन्ते, तथैवेदं जगत् परमशिवस्य (चित्तेः) अभिन्नमपि परस्परं ततो भिन्नं प्रतीयते, भिन्नं च भासते ।

तत्राभासो दर्पणे प्रतिबिम्बिताकार इवास्ति । यथा दर्पणे प्रतिबिम्बस्तस्मादभिन्नः, तथापि भिन्न इवाभासते । तथैव बाह्याभासोऽपि शिवादभिन्न एवास्ति; किन्तु भिन्न इव प्रतीयते । यथा दर्पणे प्रतिबिम्बितं नगरम्, ग्रामो नदी वृक्षाश्च यद्यपि दर्पणादभिन्नानि सन्ति, तथापि भिन्नानीवाभासन्ते । तथैव महेश्वरस्य संविदि प्रतिबिम्बितं जगच्चितेरभिन्नमेवास्ति । एवमेव अन्यत्रापि—

निर्मले मुकुरे यद्वद् भान्ति भूमिजलादयः ।
अमिश्रास्तद्वदेकस्मिंश्चिन्नाथे विश्ववृत्तयः[3] ।।

अत्र दर्पणोपमायां द्वावपवादौ चिन्तनीयौ—

१. दर्पणे कश्चिद् बाह्यपदार्थः प्रतिबिम्बितो भवति । महेश्वरस्य सार्वभौमचेतनायां तस्यैव सृष्टिकल्पना प्रतिबिम्बिता भवति, न हि कश्चिद् बाह्यपदार्थः । दर्पण एकेन बाह्यप्रकाशेनैव प्रतिबिम्बस्य सम्भवः । महेश्वरस्य चेतनायां स्वस्यैव प्रकाशः, स तु सर्वप्रकाशानां प्रकाशः । तत्र बाह्यस्य कस्यापि प्रकाशस्यावश्यकता नास्ति ।

---

१. स्पन्दप्रदीपिका, पृ० ९० । २. परमार्थसारः, श्लो० १२, १३ ।
३. तन्त्रालोकः, आ० ३, श्लो० ४ ।

२. दर्पणोऽचेतनः, तस्य च स्वान्तःस्थितस्य प्रतिविम्बस्य बोधो नास्ति, किन्तु महेश्वरस्तु चेतनः, तस्य चेतनायाश्च प्रतिविम्बवत् कल्पनाः प्रकटिता भवन्ति । स तु चेतनत्वात् सर्वं वेत्ति । दर्पणे प्रतिविम्बितान् पदार्थान् जडत्वाद् दर्पणो न जानाति, इयानेवोभयोर्विशेषः । इदमेवोक्तं यथा—

अन्तर्विभाति सकलं जगदात्मनीह यद्वद् विचित्ररचनामुकुरान्तराले ।
बोधः पुनर्निजविमर्शनसारयुक्त्या विश्वं परामृशति नो मुकुरस्तथावत्[1] ॥

यथा विभिन्नाः पदार्था दर्पणे प्रकटिता भवन्ति, तथैव परसंविदि जगतः प्राकट्यं भवति । किन्तु परसंविद्विमर्शशक्त्या तं जानाति, मुकुरस्तु स्वस्मिन् प्रतिविम्बितान् पदार्थान् न जानाति जडत्वात् ।

समुद्रे तरङ्ग इव चेतनायामाभास उत्तिष्ठति । तरङ्गाणामुत्थानपतनाभ्यां न हि कोऽपि लाभः, न च हानिः समुद्रस्य, तथैव आभासोत्थानपतनाभ्यां परमा चेतना लाभात्मिका हानिग्रस्ता च न भवति । तत्रैव आभासाः प्रकटिता लीनाश्च भवन्ति, किन्तु तदधिष्ठानात्मिकायां चेतनायां न कोऽपि विकारः परिवर्त्तनञ्च सम्पद्यते ।

एवञ्च स्वच्छदर्पणादेरेवायं प्रभावः, येन वस्त्ववस्तुनोर्विलक्षणमाभासमात्रसारप्रतिबिम्बनाम्ना प्रतिभासितो भवति । यथा भगवता दर्पणादिष्वाभासमात्रसारात्मकाः पदार्था अवभास्यन्ते, तथैव संवित्तत्त्वरूपायां चिताविदं विश्वं भासते । न हि संविदः परं तस्य किञ्चिदन्यद् रूपम् । एतादृशे बोधे प्रतिविम्बिताख्या वर्त्तते । प्रतिविम्बातिरिक्तो नान्यः पदार्थ आभासविषये भवितुमर्हति । तथा हि भासनसारतैव हि प्रतिविम्बता । इहावभासनसारमेव प्रतिविम्बतत्त्वम् । यथोक्तं तन्त्रालोके—

न देशो नो रूपो न च समययोगो न परिमा
न चान्योन्यासङ्गो न च तदपहानिर्न घनता ।
न चावस्तुत्वं स्यान्न च किमपि सारं निजमिति
ध्रुवं मोहं साम्यादिति निरदिशद्दर्पणविधिः[2] ॥ इति ।

एवमाभासमात्रसारं प्रतिविम्बसतत्त्वं बाह्यार्थवादिनो निश्चितमेव द्वैतप्रथात्मकं सङ्कुचितं ज्ञानं शाम्यतामित्येतदर्थो दर्पणविधिः । कुड्यादिवैलक्षण्येन प्रतिबिम्बसहिष्णुवस्तुप्रकारो निरदिशद् निर्दिष्टवान् । एवं च सत्ययमर्थः प्रदर्शितो भवति—यद्विश्वमिदं संविदि दर्पणप्रतिविम्बन्यायेनावस्थितम्, न तु तदतिरिक्ततया बही रूपत्वं न वस्तुसदिति न तत्राभिनिवेष्टव्यमिति[3] ।

आभासवादस्य बौद्धपदार्थत्वे निष्कर्षः

आभासो नाम नान्यथाभावः, प्रत्युतान्तःस्थितस्यैत्र बहिःप्रकाशनमुन्मेषपदाभिधेयम् । उन्मेषश्चायं सांख्यानां विकृतिलक्षणात् परिणामात् । वेदान्तिनामन्यथाप्रथनरूपाद्विवर्ताच्च सर्वथा

---

१. प० सा० उद्धृतो योगिराजेन पृ० ७९ । २. ई० प्र० वि० वि०, पृ० १६८ ।
३. तन्त्रालोकविवेकः, आ० ३, पृ० ३२ ।

विद्यते। प्रकाशो ह्यत्र स्वतन्त्रतायाः संविदः स्वीकृतः, न पुनरचेतनायाः प्रकृतेः। अपि च प्रकृतिपरिणामवादे गुणानां साम्यं वैषम्यमुपैति, अत्र तु स्वतन्त्रा चितिः स्वस्वातन्त्र्येणाविकृता सती तत्तद्रूपेण स्वात्मानं प्रकाशयतीति न वैषम्यावकाशः। अन्तःस्थितस्यैव बाह्यत्वापादनं प्रकाशः। वेदान्तिनां ब्रह्म चेतनं सदपि न स्वेच्छया स्वात्मानं जगदात्मना प्रकाशयेत्। तस्मिन् स्वातन्त्र्याभावात् कर्तृत्वानुपलब्धेः। चितिस्तु स्वतन्त्रा विश्वसिद्धिहेतुः। सा हि—

जगच्चित्रं समालिख्य स्वात्मतूलिकयात्मनि।
स्वयमेव तदालोक्य प्रीणाति परमेश्वरी॥

तस्य प्रकाशकश्च न खल्वन्यथाभावो भ्रमो वा, अपि तु चेतनस्य चेतनत्वेनैव स्वस्वातन्त्र्येण सर्वदा सर्वात्मना भानम्। एवं चास्मिन् मते प्रपञ्चस्य संविदेकात्मत्वं सिद्ध्यतीत्याभासवादोऽयं निर्दुष्टत्वाद् वरीयान् परिणामवादविवर्त्तवादाभ्याम्। आभासवादोऽयं प्रतिबिम्बवादनाम्नाऽभिनवगुप्तेन तन्त्रालोके तृतीयाह्निकारम्भे महता संरम्भेण प्रतिपादितः[1]। एवञ्च अन्तःस्थितस्यैव पदार्थस्य बाह्ये भानात् पदार्थानां बौद्धत्वम्, बुद्धिस्थत्वं सुतरामायाति।

प्रकाशे जगतः स्थितिः; तस्यैव बहिःस्फुरणम्

विरूपाक्षपञ्चाशिकायामर्थजातस्य स्थितिः प्रकाश एव प्रतिपादिता। तत्र पराख्ये शब्दब्रह्मणि प्रकाशविमर्शयोः स्थितिर्भवत्येव। तत्रैव प्रकाशान्तःस्थितानि तेजांसि तमांसि च। तथा हि—

अहमेकोऽनस्तमितप्रकाशरूपोऽस्मि तेजसां तमसाम्।
अन्तःस्थितो ममान्तस्तेजांसि तमांसि चैकस्य[2]॥

अस्यार्थः—अनस्तमितप्रकाशरूपो नित्योदितप्रकाशमयः, एकोऽद्वितीयः, तेजसां तेजस्त्वेनाभिमतानां बुद्ध्यादिकरणानामर्कादिज्योतिषां चान्तःस्थितोऽस्मि, प्रकाशमानत्वेन तेषामन्तरात्मतयाऽहमस्मि। तथा तमस्त्वेन प्रकाशमानत्वात् तमसां बिन्दुमायादीनां चान्तःस्थितोऽस्मि। प्रकाशात्मनि मय्यन्तरवस्थिते तेजस्तेजस्तया तमस्तमस्तया च चकास्त्यादित्याशयः। तानि तेजांसि तमांसि च ममान्तःस्थितानि। प्रकाशात्मकोऽहमेक एव भावाभावात्मकजगद्रूपतया परिस्फुरामि। अत्र प्रकाशात्मके शब्दब्रह्मण्यन्तःस्थितं प्रपञ्चजातं बाह्ये च तस्यैव स्फुरणमित्यनेन पदार्थानां बौद्धत्वमेव सङ्गिरन्ते तन्त्राचार्याः।

एवञ्च जगतः सृष्टेः चतुर्धा भागः—१. शक्तिः, २. माया, ३. प्रकृतिः, ४. पृथ्वी चेति। तत्र शक्तिर्बिन्दुः, माययामिश्राध्वात्मकम्, प्रकृत्या शुद्धेतरात्मकम्, पृथिव्या स्थूलभोगायतनादि। एवं चतुर्विभागं यदण्डं यश्चास्य विभागो भुवनादिरूपः, तत्सर्वं प्रकाशे स्थितं वर्त्तते। उक्तञ्च—

शक्तिर्माया प्रकृतिः पृथ्वीति चतुर्विभागमण्डवत्।
यश्च विभागोऽस्य पुनर्बहुधा सर्वं स्थितं मयि सर्वं तत्[3]॥

---

१. नित्याषोडशिकार्णवः, पृ० ८९, ९०। २. विरूपाक्षपञ्चाशिका, का० २२।
३. विरूपाक्षपञ्चाशिका, का० २१।

अनेनापि पदार्था अन्तःस्थिताः, न तु बाह्याः ।

पदार्थानां बहिर्भावेनोत्पत्त्यभावः

जगदेतद् द्विविधम्—स्थूलं सूक्ष्मं चेति । स्थूलं व्यक्तमुच्यते । सूक्ष्मं च बिन्द्वात्मकम् । तत्र पदार्थात्मकं यदेतत् तद् नित्यमेव तल्लग्नम् । उदयादिदशासु सर्वदा बिन्दुशक्तिलग्नमेव । यत् पुनरव्यक्तं बिन्द्वात्मकं तदपि तत्र निमज्जति । स्थूलतया सूक्ष्मतया वा प्रतीयमानं यथावदस्ति जगत्, तत् सर्वं प्रत्यवमर्शात्मकचितिबहिर्भावेन नोत्पद्यते । जलबहिर्भावेन तरङ्गादिवदिति यावत्[1] ।

शब्दब्रह्माणि पदार्था अन्तःस्थिताः । तत्र यदा संकल्पपदवीरूढ उन्मेषो भवति, तदैव बहिः स्फुटो भवति । उक्तञ्च—

शब्दरूपपदार्थस्य शब्दः स परमः स्मृतः ।
सङ्कल्पपदवीरूढः स्फुरत्यन्तःस्थितः स्फुटम्[2] ॥

अन्तःस्थिताः पदार्थाः

बहिर्घटपटादयो जडचेतनपदार्था ये च दृश्यन्ते, ते सर्वेऽन्तःस्थिता बौद्धा एव सन्ति । एतत् सर्वं प्रबुद्धानामनुभवसिद्धम् । बौद्धा एव पदार्था बहिराभान्ति । तेषां बाह्यसत्ता नास्ति । तथा हि—

यत्किञ्चिदाभाति बहिस्तदीश नूनं तवास्त्येव समस्तमन्तः ।
निमीलिताक्षा हृदि लक्षयेयुस्तथैव सर्वं कथमन्यथा तत्[3] ॥

जाग्रत इव स्वप्नेऽपि अन्तःस्थितस्य पदार्थस्य बाह्याभासनम्

यथा जाग्रदवस्थायां स्रष्टाऽत्मस्वभाव इच्छयादिहाक्षात्मिकयाऽभ्यर्थितो याचितः सन् पुंसो हृदि स्थितानभिमतान् पदार्थान् प्रकाशयति चक्षुरादिष्ववधानेनेत्यर्थः । एतदुक्तं भवति—अनेकार्थसन्निधानेऽपि गणिकानटमल्लप्रेक्षकादिषु यदेव वस्त्वभिमतं तदेव यथा पश्यति, स्वरूपानुप्रवेशात् । तथा स्वप्नेऽप्यभीष्टानेवार्थान् मध्ये हृदि स्वरूपभावे स्थितः सन् स्फुटतरं कृत्वा नित्यं सदैव प्रकाश्य दर्शयेत् । कुतः ? प्रणयस्येच्छाभ्यर्थनाया अनतिक्रमाद्, अत्यागाच्च । उक्तञ्चैतत्—

यथेच्छाभ्यर्थितो धाता जाग्रत्यर्थान् हृदि स्थितान् ।
सोमसूर्योदयं कृत्वा सम्पादयति देहिनः ॥
तथा स्वप्नेऽप्यभीष्टार्थान् प्रणयस्यानतिक्रमात् ।
नित्यं स्फुटतरं मध्ये स्थितवद् यं प्रकाशयेत्[4] ॥

बाह्यपदार्थस्य अन्तःस्थितेन रूपेणावभासः

यथा दूरस्थितः कश्चिदर्थो घटपटादिवस्तुविशेषोऽस्फुटं संदिग्धो द्रष्टुः सावधानेऽप्यन्यव्यापृतेऽप्येकाग्रेऽपि चेतसि सति हि यस्मात् स एवार्थः पुनरात्मप्रयत्नविशेषेण विचारितः, अर्थादन्तःस्थितेन बाह्यवस्तुसंवादात् स दृष्टो घटपटादिनिःसंदिग्धोऽवभासते । तथा हि—

---

१. विरूपाक्षपञ्चाशिका, का० १६ । २. उ० स्पन्दप्रदीपिका, पृ० ८९ ।
३. उ० स्पन्दप्रदीपिका, पृ० ११३ । ४. स्पन्दप्रदीपिका, का० ३३, ३४, पृ० ११७ ।

यथा ह्यर्थोऽस्फुटो दृष्टः सावधानेऽपि चेतनः।
भूयः स्फुटतरो भाति स्वबलोद्योगभावितः॥
तथा सत् परमार्थेन येन यत्र यदा स्थितम्।
तत्तथा बलमाक्रम्य न चिरात् सम्प्रवर्त्तते[1]॥ इति।

अन्यच्च—

अक्षे योऽर्थग्रहो द्रष्टुस्तज्जाग्रदिति कथ्यते।
पतेरर्थस्मरणं मनसा स्वप्नसंज्ञितम्॥
यथार्थस्मरणे नस्तत् सौषुप्तमुदाहृतम्।
शुद्धबोधैकरूपो योऽवस्थाता सैव तुर्यता[2]॥ इति।

प्रपञ्चभूता जडचेतनादयो विकल्पाख्याः, स एव संसारः। तथा हि—सर्वो विकल्पो संसारो नान्यो बन्धो विकल्पत इत्युक्तम्। अत एव शब्दब्रह्मणो जगतश्च न कोऽपि भेदः। तस्मादेव विकल्पस्य संसारस्योत्पादकः शब्दः। शब्दस्यापि विकल्पाख्यः संसारो योनिभूतः, उभयोरभेदात्। तथा हि—सूक्ष्मशब्देभ्यो विकल्पात्मकः संसार उत्पद्यते। विकल्पात्मकसंसाराच्च स्थूलाः शब्दा उत्पद्यन्ते इति रीत्या न कोऽपि विरोधः। उक्तञ्च—

विकल्पो नयः शब्दा विकल्पाः शब्दयोनयः।
यथा राहोः शिर इति धारा वा सर्पिषो यथा॥

एवञ्च शब्दब्रह्मणः सङ्कल्पादेव कार्यमुत्पद्यते। विश्ववृत्तेः शब्दः कारणम्। शब्दं विना संसाराख्यः कश्चित् पदार्थो नोदेति—

वागेवास्याः कारणं विश्ववृत्तेर्न्याय्यं चैतन्नागमः, केवलोऽयं नासङ्कल्पं किञ्चिदस्तीह कार्यंवाचं विना नहि कल्पोऽस्ति कश्चित्। तथा हि—अन्तःस्थिताः पदार्थाः सूक्ष्मसूक्ष्मतरस्थूल-स्थूलतरत्वेन च स्फुटा भवन्ति। तथैवं प्रक्रिया—

निष्कम्पबोधसामान्यरूपो मात्रा पुरा स्वयम्।
ये शब्दजनिता भावाः सूक्ष्मसूक्ष्मतराखिलाः॥
सामान्यबोधशब्दस्य पश्यतस्त्वेकतां गताः।
यदाऽभिमुखमायान्ति सङ्कल्पादुत्थितस्य च॥
शब्दरूपपदार्थस्य शब्दः स परमः स्मृतः।
सङ्कल्पपदवीरूढः स्फुरत्यन्तःस्थितः स्फुटम्॥
पदार्थोपरमः शब्दो मध्यमं विद्धि तं मुने।
चित्तायुकरणोत्थासु प्रयत्नपदवीषु च॥
वाच्यवाचकभावेनाऽभिव्यक्तः स्थूल उच्यते।
दृश्यादृश्येषु भावेषु योऽभिव्यक्तं प्रयाति च॥
स स्थूलतरश्चैव व्यवहारेऽखिले स्थितः॥ इति।

१. स्पन्दप्रदीपिका, का० ३६,३७, पृ० ११८,११९। २. उ० स्पन्दप्रदीपिका, पृ० ९३।

बाह्याभावेऽपि नित्या एव पदार्था अन्तःस्थिताः

अस्मिन् स्पन्दसत्त्वे दशाद्वयं यदस्ति कार्यकर्तृत्वशब्दितं कार्यकारणसंज्ञितं भोग्यभोक्तृभेदभिन्नदृश्यद्रष्टृमिदावेद्यवेदकरूपम् । तत्र तयोरध्यासाद् या कार्यता, सा क्षयिणी उत्पत्तिविनाशयुक्ता, यत्पुनः कर्तृत्वं तदक्षयम्, निरवधिचित्स्वरूपत्वात् ।

अस्मिन् कार्ये वाह्येऽर्थे क्षयिणि सति कार्योन्मुखो यो बाह्यकरणव्यापाररूपः स केवलं लुप्यते न लक्ष्यते न्यग्भूयेव स्वात्मन्यास्ते । स्थगितेन्द्रियस्य वा व्यापारासामर्थ्यात् । तस्मिन् प्रयत्ने लुप्ते सति 'अस्मि अहं विलुप्तः' इत्यबुधो जानाति, न तु चिद्रूपस्य विनाशो भवति । उक्तञ्च—

विज्ञप्तेर्न विनाशोऽस्ति विनष्टेऽपि शरीरके ।
अभावे सूर्यकान्तस्य नैवास्ति सवितुः क्षतिः ॥ इति ।

अत एव बाह्येऽविद्यमाना अपि पदार्थाः स्वात्मनि चिदात्मनि अपृथग्भूयेन स्थिता भवन्ति । तथा हि—शब्दार्थयोर्बौद्धत्वेऽयं सिद्धान्तोऽग्रेसरो भवति ।

एवञ्च देशकालादिविच्छिन्नस्य कार्यस्यैव निवृत्तिः, न तु योऽन्तर्मुखो भावो बहिरप्रसूतेः स्वस्वरूपस्थः स्वस्वभावः सर्वज्ञतादीनां गुणानामाश्रयस्तस्य भावस्य लोपः कदाचित् सम्पद्यते । चिद्रूपस्य पदार्थस्यैव सर्वदोपलब्धिः । एतदुक्तम्—

देशकालक्रियाकारैरविच्छिन्नेषु वस्तुषु ।
अनवच्छिन्नरूपत्वं भासितस्य बहिः स्थिते ॥

एवञ्च चिद्रूपमात्मानं योगिनः सततमनुभवन्ति । तथा हि—

काऽप्यवस्था न ते साऽस्ति यस्यां संविन्न वर्त्तते ।
तेन चिद्घनमेव त्वां योगिनः पर्युपासते[1] ॥ इति ।

बौद्धार्थस्य बाह्ये स्फुरणप्रकारः

यदा अर्थात्मकः शिवः सर्वप्राणिनां चित्ते परिस्फुरति, तदा आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेनेति रीत्या तेजसां सूर्यादीनां तमसां घटादीनां जडानामपि प्रकाशमानत्वं चित्ते । चिदात्मनि परमशिवे प्रथमं स्फुरति सत्येव तत्तदिन्द्रियद्वारा तत्तदर्थानां स्फुरणम् । अत्र श्रुतिः—'तमेव भान्तमनुभान्ति सर्वं तस्य भासा सर्वमिदं विभाति' । तस्माद् सर्वतः सर्वस्य विश्वस्य । उक्तलक्षणस्याविनाभावरूपत्वं विना न भवतीत्यपि न विस्मरणीयम् ।

विश्वमिदं द्रष्टुः सापेक्षप्रतीतिकम् । यथा—सम्प्रतिपन्नो घटो यदि द्रष्टृसापेक्षप्रतीतिको न भवति, तदा दृश्यमपि न भवति, यथा—शशविषाण इत्याद्यन्वयव्यतिरेकसिद्धेनानुमानप्रमाणेनावसीयते[2] । अनेन स्फुरणप्रकारेणार्थानां बौद्धत्वं बुद्धिस्थत्वम्, आन्तरत्वञ्च सर्वमपि सम्पद्यते ।

उक्तञ्चैतत्—

तदा प्रकाशमानत्वं तेजसां तमसामपि ।
अविनाभावरूपत्वं तस्माद्विश्वस्य[3] सर्वतः ॥

---

१. स्पन्दप्रदीपिकाटीका० १४, १५, १६, १७ ।
२. योगिनीहृदयम्, टी० दी०, पृ० १८१ । ३. योगिनीहृदयम्, मन्त्रसं० का० ७५ ।

अत्र चिदात्मनि परमशिवे पदार्थानां प्रथमं परिस्फुरणत्वात् तेषां बौद्धत्वं सुतरामायाति। किं वाऽर्थात्मकः शिवः सर्वप्राणिनां चित्ते परिस्फुरति।

षडध्वनां चिदात्मनि स्थितत्वात् शब्दार्थयोर्बौद्धत्वम्

तत्र वर्ण-पद-मन्त्र-कला-तत्त्व-भुवनात्मकः षडध्वा। तेषु वर्ण-पद-मन्त्रात्मकः प्रमाणाध्वा शब्दात्मकः, कलातत्त्वभुवनात्मकः, प्रमेयाध्वाऽर्थात्मकः। वर्णाद्यध्वत्रयं वाचकाध्वा, कलाद्यत्रयं च वाच्याध्वा। एवञ्च कलातत्त्वभुवनात्मकमर्थत्रिकं स्थूलम्। वर्णपदमन्त्रात्मकं शब्दत्रिकं सूक्ष्मम्। कलातत्त्वभुवनात्मका रूपाध्वानः, वर्णपदमन्त्रात्मका नामाध्वान इत्यपि व्यवहारः प्रसिद्धोऽस्ति।

अत्र पञ्चाशद्वर्णाः, सप्तषष्टिवर्णाः, कादयो वर्णाः, षट्त्रिंशच्चेति नित्याषोडशिकार्णवे प्रपञ्चिताः[1]। स्थूलसूक्ष्मभेदेन शरीरे वर्णक्रमः संव्यवस्थितः। वर्णक्रमरूपिणी चिच्छवितः।[2] वर्णाम्बिकायाः पश्यन्तीरूपम्। अस्याश्च तुरीयं धाम परावाग्रूपम्।[3]

पदानि वर्णसंयोगजान्येकाशीत्यादीनि।[4] तानि चानन्तपदव्यापकानि सुप्तिङन्तोपाधिसंकोचितानि सन्ति। वर्णात्मकाश्च मन्त्रा मननत्राणधर्मणश्च। तथा च गर्भीकृतासंख्यातमन्त्रवत् सप्तकोटिमहामन्त्रा व्यापकाः साङ्गब्रह्मशिवाख्या मन्त्रा एकादशेति नामाध्वानोऽपि त्रयः।

एवमेव हकारोऽन्त्यः कलारूपः कलातद्विवर्तभूतबिन्दुद्वयं शिवशक्तिरूपं चन्द्रसूर्यात्मप्रकाशविमर्शरूपं परमबिन्दुप्रापकम्। तथा हि किञ्चित् कर्तारममुं कलयन्ती कीर्त्यते कलानाम्ना।[5] तत्त्वानि शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाकलाविद्यारागकालनियतिपुरुषप्रकृतिमनोबुद्ध्यहङ्कारश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगन्धाकाशवायुवह्निसलिलभूमयः[6]। अनाश्रितादिकालाग्निरुद्रान्तःकालाग्न्यादिशिवान्तो वा भुवनाध्वा। अनाश्रितादिकालाग्निरुद्रान्तःषट्त्रिंशत्तत्त्वात्मा भुवनानि चतुर्विंशत्यधिके द्वे[7] इति।

एवञ्च संविदेव भगवती वामकेश्वरदर्शने त्रिपुराभिधाना परब्रह्मशब्दब्रह्मेति कथ्यते। तत्र त्रिपुरापदस्य नानाविधा व्युत्पत्तयो निरुक्तयश्च दृश्यन्ते। तद्यथा त्रिभ्यः पुरा त्रिपुरा। त्रिबिन्दुत्रितत्त्वेभ्यः पुरा पूर्वं स्थितेति भावः[8]। त्रिपुरा वर्णानामाविर्भूतकारणरूपा सेयमकारहकारकामकलापर्यायप्रकाशविमर्शरूपाऽपीति यावत्[9]। परमा शक्तिरेकविधैव सती बीजोच्छूनदशायां ज्ञानक्रियेच्छारूपत्रयबिन्दुरूपेणोह्यमाना त्रैविध्यं गता त्रिपुरा[10]। एवं त्रिशक्तित्रिचक्रत्रिधामत्रिबीजत्रितत्त्वत्रिगुणत्रिकोणादिभेदत्रयाविर्भावेण त्रिवृत्करणरचना वैचित्री चतुरा त्रैविध्येन समस्ताध्वव्यापिनी त्रिपुरा[11]। धामतत्त्वपीठलिङ्गमातृकादिभ्यस्त्रिभ्योऽपि पुरा या विद्यते सा त्रिपुरा देवीप्रकाशविमर्शसामरस्यरूपिणी[12]।

---

१. नित्याषो०, पृ० ६१–३६।
२. नित्याषो०, पृ० २०९।
३. नित्याषो०, पृ० ३६, ३९।
४. नित्याषो०, पृ० २०८।
५. नित्याषो०, पृ० १४०, १९५, ३०९।
६. नित्याषो०, पृ० १९५।
७. नित्याषो०, पृ० १८, १९, २०८।
८. नित्याषो०, पृ० १९३।
९. नित्याषो०, पृ० १९३।
१०. नित्याषो०, पृ० ३०६।
११. नित्याषो०, पृ० २०७।
१२. नित्याषो०, पृ० १२।

त्रिपुरार्णवे तु—

नाडीत्रयं तु त्रिपुरा सुषुम्णा पिङ्गला इडा ।
मनो बुद्धिस्तथा चित्तं पुरत्रयमुदाहृतम्[1] ॥

इत्युक्तम् ।

तच्च त्रिपुराभिधानं परं ब्रह्म प्रकाशविमर्शसामरस्यात्मकं बीजावस्थारूपम् । ततो बीजादुच्छूनादिव कलातत्त्वभुवनाभिधेयरूपार्थत्रिकस्य स्थूलस्य वर्णपदमन्त्राभिधानरूपशब्दत्रिकस्य सूक्ष्मस्य कर्तृकरणकर्मव्युत्पत्त्या लोकलोकनलोक्यात्मनः षट्त्रिंशत्तत्त्वसमुदायरूपस्य त्रैलोक्यस्योत्पत्तौ कारणभूता स्पन्दशक्तिः सञ्जृम्भते । बीजावस्थायामङ्कुरकाण्डपत्रपुष्पफलादिवदस्यां स्पन्दावस्थायामन्तःसदात्मना वर्त्तते षट्त्रिंशत्तत्त्वग्रामभूतः कार्यरूपः प्रपञ्चः । अस्यां षडध्वस्फारमयषट्त्रिंशत्तत्त्वगर्भमहाहन्तापरामर्शमहाविभूतिरूपप्रपञ्चात्मना महाविकासभावमापन्नायामेतत्स्थितिव्यतिरिक्तो नामरः कश्चनावतिष्ठते[2] । प्रकाशरूपस्य शिवस्य हि विमर्श एव स्वभावः । उक्तञ्च—

वर्णकलापदे तत्त्वं मन्त्रो भुवनमेव च ।
इत्यध्वषट्कं देवेशि भाति त्वयि चिदात्मनि[3] ॥

एवञ्च शब्दार्थरूपेषु षडध्वनां परायां चिदात्मनि स्थितत्वात् तेषां बौद्धत्वं बुद्धिस्थत्वञ्च सुतरामायाति ।

● ● ●

---

१. नित्याषो०, मू० पृ० ८६ । २. नित्याषो०, पृ० १९५, १९६ ।
३. सौभाग्यहृदयस्तोत्रम्, श्लो० ८ ।

महामहोपाध्यायः कौण्डभट्टः

श्रीकन्दाळवेङ्कटरामकृष्णमाचार्यः,
व्याख्याता—कें० सं० विद्यापीठम्, तिरुपतिः,

[लेखेऽस्मिन् तद्वंशपरिचयपुरस्सरं तस्य कालः, प्रतिभा, कर्तृत्वम्, अर्वाचीनेषु प्रभाव इत्यादिविषया यथाशक्तिविवेचिता।]

दार्शनिकवैयाकरणेष्वग्रगण्यः, प्राचीननव्यवैयाकरणसिद्धान्ततीरयोः सेतुः, आन्ध्रदेशरत्नेष्वेकः कौण्डभट्टो वैयाकरणैस्सदाऽऽराध्यत एव। यतो ह्यस्य भूषणसारग्रन्थस्याध्ययनं विना वैयाकरणत्वमेव न सिद्धयति। तादृशस्यास्य परिचयः प्रस्तूयते।

अयं च कौण्डभट्टः काश्यपगोत्रो बह्वृचशाखाध्यायी। [1]आन्ध्रदेशे कृष्णानद्यास्तीरे स्थितश्चेरुकूरुनामाग्रहार एतत्पूर्वजानां निवासः। अत एवास्य वंशस्य चेरुकूरिवंश इति नाम। अस्य पितामहो लक्ष्मीधरः सर्वविद्वत्कविसम्मतो मीमांसाद्वयपारगश्चासीत्। अयं विजयनगराधिपस्य अरवीडुवंशजस्य तिरुमलरायस्य (क्रौ० श० १५७०–७३) आस्थानपण्डित[2] आसीत्। अयञ्च लक्ष्मीधरः सुचिरं गृहस्थाश्रमे स्थित्वा सन्न्यस्य रामानन्दश्रमनाम्ना प्रसिद्धोऽभूत्। अनेन [3]षड्भाषाचन्द्रिकेति प्राकृतव्याकरणम्, अनर्घराघवनाटकस्य 'इष्टार्थकल्पवल्लरी'[4] व्याख्या, गीतगोविन्दस्य 'श्रुतिरञ्जनी' व्याख्या, जयदेवप्रसन्नराघवस्य 'अभीष्टार्थदायिनी' व्याख्या, नलवर्णनकाव्यञ्च रचितम्। अयं तिरुपतिवेङ्कटेशभक्त आसीत्। अस्य लक्ष्मीधरस्य भट्टोजिदीक्षितरङ्गोजिभट्टाभिधौ द्वौ पुत्रौ आस्ताम्।

न कोऽप्यस्तीदानीं वैयाकरणस्तादृशो यस्सिद्धान्तकौमुदीं न पठति। अयञ्च भट्टोजिदीक्षित आत्मना वंशेन च पाणिनीयं स्वायत्तं चकार। न केवलमयं पाणिनीये व्याकरणे, किन्तु अन्यतन्त्रेष्वपि महापण्डित आसीत्। भट्टोजिदीक्षितः इक्केरीं पालयतः केलदिवेङ्कटाद्रिनाम्न आन्ध्रभूपस्य (ईस्वी १५८२–१६२९) आस्थानपण्डितो[5] भूत्वा तत्प्रेरणया तत्त्वकौस्तुभग्रन्थं वेदान्ते रचयामास। एवं न्याये तर्कामृतम्, पूर्वमीमांसायां तन्त्रसिद्धान्तदीपिका, तन्त्राधिकार-

---

१. अनर्घराघवव्याख्या—इष्टार्थकल्पवल्लरी—Tanjore Des. Cat. Vol. VIII No. 4269।

२. द्र०—प्रभामण्डलः—यज्ञनारायणकृतः—Tanjore Des. Cat. Vol. XII, कविविवेकटिप्पणी।

३. मुम्बय्याम् ईस्वी १९१६ वर्षे के० पी० त्रिवेदिना आमुखेन सह प्रकाशिता।

४. द्र० -षड्भाषाचन्द्रिकायाः प्रकाशितायाः प्रस्तावनम्।

५. See—A Contact of Bhattoji and some members of his family with Keladi Rulars of Ikkeri—P. k, Gode. Studies of Indian literary History Vol. III P. 206.

निर्णयः, धर्मादिशास्त्रेषु गोत्रप्रवरनिर्णयः, कालनिर्णयः, तिथिनिर्णय इत्याद्यनेकान् ग्रन्थान-रचयत्। अस्य दीक्षितस्य समय ईस्वी १५३५ तः १६२५ पर्यन्तमिति डॉ० महेशदत्तशर्माणो[1] निरूपयन्ति।

भट्टोजिदीक्षितस्यानुजो रङ्गोजिभट्टोऽपि महाविद्वानासीत्। अस्य रङ्गोजिभट्टस्य वेदान्तविद्यागुरुर्नृसिंहाश्रमी। इक्केरीप्रभोः केलदिवेङ्कटाद्रेरास्थानेऽयमप्यासीत्। अनेनाद्वैत-वेदान्ते अद्वैतचिन्तामणिः, अद्वैतसारोद्धारः (व्याससूत्रव्याख्या) इति द्वौ ग्रन्थौ रचितौ। अयम् इक्केरीराजभाषायाम् ईस्वी १६२९ वर्षे 'विद्याधीशवडेरु' नामानं माध्वयतिं वादे जित्वा प्रभुणा आन्दोलिकादानेन [2]सत्कृत इति ज्ञायते। अयं माध्वसिद्धान्तखण्डनमप्यलिखदिति ज्ञायते। अयं रङ्गोजिभट्ट आन्ध्रदेशे कालहस्तीश्वरस्य भक्तः। अयं स्वीये शिवोल्लासकाव्ये स्वेष्टदेवता-मित्थमस्तौत्—

ग्रन्थे चास्मिन् तव विलसिते कालहस्तीश नित्यं
कृत्वाभ्यासं भवति विजयी भक्तिभावैकनिष्ठः॥

अतश्च रङ्गोजिभट्टस्य निवासः कालहस्तिपरिसरे स्यत्। अस्य कालः १५४० खैस्ताब्दतः १६३५ पर्यन्तमित्यूह्यते।

अद्वैतशास्त्रव्यवस्थापनेन लब्धप्रतिष्ठस्य रङ्गोजिभट्टस्य पुत्रः, भट्टोजिदीक्षितस्य शिष्यः कौण्डभट्टोऽपि न्यायव्याकरणाद्वैतवेदान्तमीमांसादिषु शास्त्रेषु निष्णातः, व्याकरणशास्त्रीयार्थिक-ग्रन्थवर्तृषु मुख्यं स्थानमलङ्करोति। यतोऽयमान्ध्रस्ततोऽस्य नाम 'कोण्डभट्टः' इति स्यात्। अस्य पितामहस्याग्रजः कोण्डभट्टारक इति ख्यातः, यस्मादस्य पितामहेन[3] विद्यागृहीता। किञ्च पदार्थदीपिकाया अन्ते कोण्डभट्ट इति नामैव दृश्यते[4] भूषणारम्भेऽपि कोण्डभट्ट इति नामैव दृश्यते। अयं च कौण्डभट्टः केलदिभूपस्य वेङ्कटाद्रेः पौत्रस्य वीरभद्रस्य (ईस्वी १६२९-१६४५) आस्थाने आसीत्[5]। तस्य भूपस्य प्रेरणया 'तर्कप्रदीपः' इति नामकं तर्कग्रन्थमरचयत्। अनेन कौण्डभट्टेन रचिता ग्रन्थाः श्री पि० के० गोडेमहोदयैः स्वीये लेखे एवमुल्लिखिताः—

१. तर्कप्रदीपः—वीरभद्रभूपप्रेरणया लिखितः—Hall P 79 Ben 165।

२. तर्करत्नम्—Hall P. 78।

३. (न्याय) पदार्थदीपिका—वाराणस्यां प्रकाशिता, ईस्वी १९००।

---

१. द्र०—काशिकावृत्तिसिद्धान्तकौमुद्योस्तुलनात्मकमध्ययनम्, पूना—१०७४।

२. द्र०—विद्याधीशवडेरुसंज्ञकयतिं इत्यादिभूषणसारश्लोकः।

३. अनर्घराघवव्याख्या—इष्टार्थकल्पवल्लरीप्रस्तावः—Tanjore. Des. Cot. No. VIII 4269.

४. (i) पदार्थदीपिकायां पृ० 5। "कोण्डभट्टेन निर्मिता" "कोण्डभट्टकृता" (ii) श्रीकोण्डभट्टः कुर्वेऽहं वैयाकरणभूषणम्—5 श्लोकः।

५. P. K. Gode—The Chronology of the works of Kondabhatta–P. 207-211. Studies in Indian litarery Hisstory Vol. III, 1956.

४. वैयाकरणसिद्धान्तभूषणम्—वाराणस्यां प्रकाशितम्, ईस्वीये-१९०० ।

५. वैयाकरणसिद्धान्तभूषणसार: ।

६. लघुवैयाकरणसिद्धान्तभूषणसार: Oppert 5397 ।

७. वैयाकरणसिद्धान्तदीपिका—K 88 ।

८. स्फोटवाद:—Peters I-121 ।

तत्रैव तैः प्रतिपादितं यद् न्यायपदार्थदीपिकायां कौण्डभट्टो वैयाकरणसिद्धान्तभूषणं तर्करत्नं च समुल्लिलेखेति । अतश्च भूषणरचनातर्करत्नरचना वा प्रथमेति वक्तव्यम् । वाराणस्याः सरस्वतीभवनग्रन्थालये वैयाकरणसिद्धान्तभूषणसारस्यैको हस्तलेखो[1] दरीदृश्यते, यस्य कालः १६३७ खीस्ताब्द इति उल्लिखितः । अतश्चास्मात् कालात् पूर्वमेव भूषणसारो रचितश्चेद् भूषणरचना ततोऽपि पूर्वैव भवति । गुरुप्रसादशास्त्रिभिः स्वसम्पादितभूषणसारारम्भे भूषणसारलेखनकालः १६६० विक्रमाब्दः (ईस्वी १६०२) निर्दिष्ट इति संस्कृतव्याकरणशास्त्रेतिहासे युधिष्ठिरमीमांसकाः[2] । प्रायोऽयं कालो भूषणस्य स्यात्, न तु भूषणसारस्य । पदार्थदीपिकायां भूषणसारस्यानुल्लेखाद् भूषणसाररचनापदार्थदीपिकातः परैवेति । कौण्डभट्टग्रन्थानां क्रम इत्थं निर्देष्टुं शक्यते—१. वैयाकरणसिद्धान्तभूषणम्, २. तर्करत्नम्, ३. पदार्थदीपिका, ४. वैयाकरणसिद्धान्तभूषणसार: लघुभूषणसारश्च, ५. तर्कप्रदीप:, ६. वैयाकरणसिद्धान्तदीपिका, ७. स्फोटवाद इति । अस्य ग्रन्थरचनाकाल ईस्वी० १६१०–१६६० इति गोडेमहाशयैरुक्तम्; परन्तु ईस्वी० १६००–१६५० इति निर्देशो युक्त इति मे मतिः । तस्मादस्य काल ईस्वी० १५७०–१६५० इत्यूहितुं शक्यते ।

अस्य च कौण्डभट्टस्य गुरुः शेषकृष्णपण्डितसुनुर्वीरेश्वर इति केचन । ते त्वत्र प्रमाणतया भूषणसारगतमिदं मङ्गलश्लोकमुदाहरन्ति—

अशेषफलदातारमपि सर्वेश्वरं गुरुम् ।
श्रीमद्भूषणसारेण भूषये शेषभूषणम् ॥

परन्त्वेष श्लोको न गुरुस्तोत्रपरः, किन्तु इष्टदेवतास्तुतिपर एव । दर्पणादिव्याख्यासु तथैव व्याख्यातत्वात् । यश्शेषभूषणः पूर्वं स्तुतः तस्यैव कृतिसमर्पणस्य युक्तत्वात् । पदार्थदीपिकाया आरम्भे मङ्गलश्लोकोऽप्येतत्तुल्य[3] एवास्ति । हरिदीक्षितेनापि शब्दरत्नारम्भे एतादृश एव श्लोकः[4] कृतः । अतश्चायमिष्टदेवतास्तुतिपर एव । स चेष्टदेवो हरिहरनाथः । एते च दीक्षितवंश्या हरिहराद्वैतवादिन इत्यनेन ज्ञायते । एतादृशो हरिहराद्वैतवादो बहोः कालात्पूर्वमेव

---

१. सरस्वतीभवनसूचीपत्रे—क्रमसङ्ख्या ३९५५८ वै० भू० सारः, लिपिकालः—सं० १६९५ ।
२. संस्कृतव्याकरणशास्त्रेतिहासः—द्वितीयभागः, पृ० ३९३ ।
३. श्रीरत्नसिद्धिकरं कान्तं रमोमारमणात्मकम् ।
दयासिन्धुं चिदानन्दं सितासितमुपास्महे ॥
४. शेषविभूषणमीडे शेषाशेषार्थलाभाय ।
दातुं सकलमभीष्टं फलमपि ष्टे यत्कृपादृष्टिः ॥

आन्ध्रदेशे प्रसिद्धः। ईस्वीयत्रयोदशशतके नेल्लूरुमण्डलं पालयतो मनुमसिद्धेर्मन्त्री, भारतान्ध्रीकर्तृष्वेकः 'तिक्कन' महाकविः स्वीयं भारतं हरिहरनाथस्यैव समर्पितवान्। यदा स्वप्नेऽयं स्वेष्टदैवं हरिहरनाथमपश्यत्, तदा स तमित्थमपृच्छत्—

किमस्थिमालां किमु कौस्तुभं वा परिष्क्रियायां बहुमन्यसे त्वम्।
किं कालकूटं किमु वा यशोदा स्तन्यं तव स्वादु वद प्रभो[1] मे॥ इति।

श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम्।
स्फोटरूपं यतस्सर्वं जगदेतद्विवर्तते॥

इति भूषणसारमङ्गलश्लोकोऽप्येतादृश एव खलु। तस्मादयं कौण्डभट्टः पितृव्यजनकयोस्सविध एव सर्वा विद्या जग्राहेति युक्तम्। तत्रापि व्याकरणं स्वपितृव्यादेव। अत एव तमपि भूषणेऽस्तौत्[2]।

कौण्डभट्टरचिता ग्रन्थाः

अनेन रचितेषु ग्रन्थेषु त्रय एव प्रकाशिताः समुपलभ्यन्ते। अन्येषां नाममात्रावशेषता वा, हस्तलिखितमातृकारूपता वा स्यात्। तत्र मुद्रितानां सङ्क्षिप्तः परिचयोऽत्र प्रस्तूयते।

पदार्थदीपिका

अयं न्यायग्रन्थो यद्यपि तर्कसङ्ग्रहतुल्यः, अथापि तस्मादस्य वैलक्षण्यं बह्वस्ति। स च तर्कसङ्ग्रहोऽत्यन्तं सङ्क्षिप्तः, अयं तु न तथा। किञ्च, पृथिव्यादिलक्षणेष्वव्याप्त्यादिदोषपरिहाराय जातिपर्यन्तानुधावनं कर्तव्यमेवेति पृथिवीत्वजातिमती गन्धवती वा पृथिवीत्यादिना सम्यक् प्राकाशयत्। तत्र मीमांसकानामन्येषाञ्च मतानि प्रदर्शितानि। यथा वायोरनुमानगम्यतेति नैयायिकसिद्धान्तमुक्त्वा तस्य प्रत्यक्षत्वमेवेति मीमांसकानां मतं सम्यगत्र प्राकाशयत्। प्रायःसिद्धान्तमुक्तावल्याः सारग्रन्थोऽयमिति वक्तुं शक्यम्। यद्यप्यस्मिन् ग्रन्थे न्यायवैशेषिकयोः पदार्था निरूपिताः, तथापि नायं ग्रन्थः केवलन्यायवैशेषिकसम्बद्धः, किन्तु सर्वदर्शनसम्बद्धः। अत्र भाट्टप्राभाकरतान्त्रिकादिमतेष्वपि प्रमाणादिविचारः पदार्थविचारश्च कृतोऽस्ति। यद्यप्ययं ग्रन्थो बालव्युत्पत्तिसिद्धये कृतः, अथापि सर्वैरपि दर्शनशास्त्राध्यायिभिरवश्यमध्येतव्यः। अयमेव ग्रन्थः कौण्डभट्टस्य सुनिशिते सर्वशास्त्रपाण्डित्ये प्रमाणभूतः।

अस्त्यन्यदपि किञ्चिदत्रावधेयम् तर्कसङ्ग्रहकारोऽन्नम्भट्टः, पदार्थ दीपिकाकारः कौण्डभट्टः, उभावप्यान्ध्रदेशीयौ। कौण्डभट्टवदन्नम्भट्टोऽपि व्याकरणादिशास्त्रेष्वपि ग्रन्थानरचयत्। पदार्थदीपिकाकारः कौण्डभट्टः खैस्ताब्दीयषोडशशतकान्तिमार्धे, सप्तदशशतकपूर्वार्धे चासीदिति पूर्वमेव निर्णीतम्। अन्नम्भट्टस्तु ईस्वीयाष्टादशशतकप्रथमपाद आसीदिति श्रीमान्भ्र्बोडस[3] महोदयैर्न्यरूपि। तस्माद् द्वयोः कौण्डभट्ट एव पूर्वः। न्यायशास्त्रप्रविविक्षूणां बालानामुपकारायैव हि

---

१. आन्ध्रमहाभारते उद्योगपर्वणि पीठिकायामस्ति।
२. भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये।
3. Tarka-Samgraha, Bombay Sanskrit Series No. Lv. P. LVI.

पदार्थदीपिकापि कृता। तस्मादुभयोर्मध्ये प्राथमिकस्तादृशः प्रयासः कौण्डभट्टस्यैवेति सिद्धम्। यद्यपि पदार्थदीपिका बालव्युत्पत्तिसिद्धये कृता, तथापि प्रथमं बालानां तस्या अध्ययने क्लेशस्तदानुभूतः स्यात्, येनानुभवेन प्रेरितोऽन्नम्भट्टस्तस्या एव दीपिकायाः सङ्ग्रहं कृतवानित्यप्यूहितुं सन्ति प्रमाणानि। पदार्थतर्कशब्दौ पर्यायौ। सङ्ग्रहपदं कौण्डभट्टेन नोपयुक्तम्, तस्य प्राथमिकत्वात्। पदार्थदीपिकाया एव तर्कसङ्ग्रहस्य मूलत्वात् तर्कसङ्ग्रहस्य तत्सङ्क्षेपमूलत्वान्न सङ्ग्रहपदं तेन प्रयुक्तम्। यद्यपि तेन सङ्ग्रहः कृतः प्रथमसोपाने वर्तमानानां बालानामुपकाराय, अथापि पदार्थदीपिकोक्ता विषयास्सर्वेऽपि तस्मिन् न सङ्गृहीता इति बुद्ध्यैव स पुनर्दीपिकानाम्ना तस्य पूरकं टीकाग्रन्थमरचयत्। यद्यस्माभिः पदार्थदीपिका तर्कसङ्ग्रहदीपिकाभ्यां तोलयते, तर्ह्ययमर्थो निश्चितो भवति। जगदीशगदाधरादितार्किकाणां प्रभावात् केचन विशेषाः सङ्ग्रहदीपिकयोर्भवन्तु नाम; तथापि तयोर्जीवातुभूतत्वं पदार्थदीपिकाया एवेति निश्चप्रचम्।

ग्रन्थेऽस्मिन् वैयाकरणसिद्धान्तभूषणस्यासकृदुल्लेखोऽस्ति। तस्माद् भूषणरचनैव प्राथमिकी स्यादित्यप्यूह्यम्।

वैयाकरणसिद्धान्तभूषणम्

भट्टोजिदीक्षितेन शब्दकौस्तुभरचनानन्तरमार्थिकपराणां वैयाकरणसिद्धान्तानां प्रदर्शनाय कारिकामयः कश्चन ग्रन्थो रचितः। शब्दकौस्तुभे योऽर्थो निर्णीतः, स एवात्र सङ्क्षेपेण कथ्यते इति प्रतिज्ञापि तेनादौ कृता। तत्कारिकाग्रन्थस्य व्याख्यानरूपमिदं भूषणम्। यतोऽयं कौण्डभट्टो भट्टोजिदीक्षितस्य साक्षाच्छिष्यः, तस्मात् तस्य हृदयगता भावा सम्यगनेन ज्ञाता आविष्कृताश्च। **"गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान् सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये"** इति हि कौण्डभट्टस्य प्रतिज्ञा।[1] अनया प्रतिज्ञया कौण्डभट्टस्येतरशास्त्रज्ञेषु तत्सिद्धान्तेषु च ग्रहोऽस्तीति नैव मन्तव्यम्। शास्त्रमूलभूतसिद्धान्तापरित्यागेन यावत्पर्यन्तं सर्वेषां शास्त्राणामैकमत्यं प्रतिपादयितुं शक्यम्, तावत्पर्यन्तमैकमत्यमनेन भूषणे प्रतिपादितम्। अत एवायं ग्रन्थो न केवलं वैयाकरणैः, किन्तु तन्त्रान्तरीयैरपि शिरसि धार्यते। उक्तञ्च शाब्दतरङ्गिण्यां श्रीमद्भिः सुब्रह्मण्यशास्त्रिभिः[2]—**'नव्यवैयाकरणसिद्धान्तानपेक्ष्य प्राचीनवैयाकरणसिद्धान्ता नैयायिकसिद्धान्तसन्निकृष्टा वर्तन्ते'** इति।

अत्रैकमुदाहरणं प्रदीयते—

वैयाकरणसिद्धान्तभूषणे सुबर्थनिर्णये[3] धर्मी एव सुबर्थ इति निर्णीय, सम्बन्धस्य षष्ठ्यर्थतामुक्त्वा, ओदनस्य पाक इत्यादौ धर्मतायां षष्ठीत्यादि कथमिति विशङ्क्य **"आश्रयोऽपि न विभक्त्यर्थः। घटादिरूपस्य तस्य प्रकृत्यैव लाभात्। एवमवधिर्वृक्षादिरूपो न विभक्त्यर्थः। उद्देश्योपि ब्राह्मणादिर्न विभक्त्यर्थः। तथा चाश्रयत्वादिकमेवार्थः। अनन्यलभ्यत्वात्। तच्च निरूपकत्वादिना धात्वर्थेऽन्वेति। कर्मणि द्वितीयेत्यादेश्शक्तिशक्तिमतोस्तादात्म्याभ्युपगमेनोपपत्तिः।**

१. भूषणारम्भे "पाणिन्यादिमुनीन्" इत्यादि चतुर्थः श्लोकः।
२. शाब्दतरङ्गिणी—P. 25, Sanskrit Education Society, Madras 1969.
३. वै० सि०भूषणम्, सुबर्थनिर्णयः—P. 143, 144।

अन्यथा द्व्येकयोरिति विहितैकवचनादेरपि सङ्ख्याविशिष्टाश्रयवाचकत्वापत्तेः" इत्यादिना धर्मवाचकत्वमेव सुपां व्यवस्थापितवान् कौण्डभट्टः। अयमेव नव्यनैयायिकसिद्धान्तः इति सर्वैर्विद्वद्भिर्ज्ञायत एव।

किञ्चात्र कौण्डभट्टेन नव्यमार्गबीजावापोऽपि कृतः। अभेदैकत्वसङ्ख्यानिर्णये[1] प्राचीनं मतद्वयमुपपाद्य अन्ते नव्यमतमित्थं स प्राचीकटत्—"नव्यास्तु पदार्थैकदेशत्वाद् राजपुरुष इत्यत्र राज्ञः, तत्र सङ्ख्यात्वरूपेणापि न तदन्वय इत्याहुः" इति। अत्राहुरित्यनेनारुचिरेव ग्रन्थकर्तुः सूचितेति केचिन्मन्येरन्। परन्त्वत्र नव्यमते एवेष्टतां तत्रैव स इत्थं प्राकाशयत्—'समासादौ शक्तिः कल्प्यमाना सङ्ख्याविशिष्टे एव सा कल्प्येत्यभ्युपगमे तु नायं दोषः। परन्त्वनुभवविरहाद् जिज्ञासानुरोधेन शक्तौ तु ज्ञानेच्छयोः समानप्रकारत्वेन हेतुहेतुमद्भावाद् विशिष्टस्यैव वाच्यतापत्तेः, इष्टापत्तौ जिज्ञासोच्छेदापत्तेः। मूलोच्छेदात् शक्तिकल्पनमेवानर्थकमिति विभावयाम इति दिक्' इति। वैयाकरणसिद्धान्तदीपिकेति कश्चन ग्रन्थः स्वतन्त्रः। यद्येतत्कृतः स्यात्, तर्हि तत्र कौण्डभट्टहृदयं नव्यमार्गावलम्बि वा न वेति सम्यग् ज्ञातुं शक्येत। परन्त्वयं ग्रन्थ एतावत्पर्यन्तं नाममात्रेणोपलब्धः।

यतो ह्ययं भट्टोजिदीक्षितकारिकाग्रन्थस्य व्याख्याग्रन्थः, तस्माद् भट्टोजिदीक्षितस्याशय एव शब्दकौस्तुभायुक्तः परिष्कृत्यात्र प्रतिपादितः। उदाहरणार्थम् 'तद्विश्लेषजनकतत्क्रियानाश्रयत्वे सति विभागाश्रयत्वम्' इति लक्षणं न दीक्षितेन कण्ठत उक्तम्। तथैवान्ये च विषयाः शब्दकौस्तुभे सूक्ष्मतया निर्दिष्टा अस्मिन् विशदीकृताः। धात्वर्थनिर्णयादिषु प्रकृतनैयायिकमीमांसकादिमतवर्णनम्, तत्खण्डनञ्चास्य सर्वतन्त्रस्वतन्त्रतामभिव्यनक्ति। तथैव "कर्मकर्तृव्यपदेशाच्च" इत्यादिवेदान्तसूत्रार्थनिर्णयादिषु तस्याद्वैतशास्त्रपाण्डित्यं स्फुटीभवति।

वैयाकरणसिद्धान्तभूषणसारः

अयमपि भूषणस्य सारग्रन्थः कौण्डभट्टेनैव रचितः। अस्य लघुत्वात् पठनपाठनेषु प्रचारोऽस्यैवासीन्महान्। विषयस्य निर्दुष्टता, संक्षेपश्चात्र कारणीभूतौ। अस्य भूषणसारस्य बह्व्यष्टीका अपि कालक्रमेण सम्भूताः। नागेशशिष्यप्रशिष्या अपि अस्य व्याख्यातार आसन्। तस्मान्नव्यमार्गप्रवर्तकग्रन्थप्रचारात् परमप्ययं ग्रन्थस्तैरेव स्वव्याख्याभिर्भूषित इत्येतदेवास्य ग्रन्थस्य महत्त्वं प्रकटीकरोति।

अस्य भूषणसारस्य व्याख्यासु श्रीदुर्बलाचार्यस्य कृष्णमित्रस्याल्पा व्याख्या, श्रीभैरवमिश्ररचिता परीक्षा, श्रीहरिवल्लभभट्टाचार्यकृतदर्पणव्याख्या, श्रीकालोपनामकहरिराममहोदयैर्विरचिता काशिका च प्राचीना मुद्रिताश्च। अप्रकाशिता श्रीमन्नुदेवरचिता कान्तिटीकाऽप्यस्ति, यस्याः प्रकाशने वैयाकरणैरवश्यमुद्योगः कर्तव्यः। अर्वाचीनेषु व्याख्यानेषु श्रीबालकृष्णशास्त्रिपञ्चोलिनिर्मिता प्रभा, श्रीमारुलकरोपाह्वशङ्करशास्त्रिप्रणीता शाङ्करी, श्रीगोपालशास्त्रिनेनेकृता सरला, श्रीरामप्रसादत्रिपाठिकृता सुबोधिनी, श्रीपेरिसूर्यनारायणशास्त्रिकृता तत्त्वदर्शिनी च मुद्रितानि। अन्यान्यप्यप्रकाशितानि स्युः कानिचन व्याख्यानानि। तथा हिन्द्यादिभाषास्वनुवादः, तत्तद्भाषासु व्याख्या अप्यस्य ग्रन्थस्योपलभ्यन्ते। इदानीमप्ययं ग्रन्थः पठनपाठनेष्वनुवर्तते।

---

१. वै० सि० भूषणे P. 286.

कौण्डभट्टसमकालिका विद्वांसः

पदवाक्यप्रमाणपारावारीणोऽयं कौण्डभट्टो नैयायिकाग्रणीर्जगदीशस्य समकालिकः। अयं जगदीश ईस्वीये १६३५ वर्षे शब्दशक्तिप्रकाशिकां[1] निबद्धवान्। शब्दसङ्क्षेपे उभावपि समानौ। यद्यपि शब्दशक्तिप्रकाशिकातः पूर्वमेव भूषणरचना आसीत्, तथाप्युभयोः परस्पर-प्रभावः स्वग्रन्थयोर्न दृश्यते। अथापि कुत्रचिद्भावसादृश्यमप्यस्ति। परसमवेतत्वस्य द्वितीया वाच्यत्वं नोभयोरिष्टम्। तथा तस्य कर्मलक्षणघटकतापि नेष्टा। चैत्रश्चैत्रं गच्छतीति प्रयोगो द्वितीयार्थसंयोगे प्रकृत्यर्थस्य स्वप्रतियोगिकत्वसम्बन्धेनैव साकाङ्क्षतया द्वितीयान्तलभ्यस्य चैत्री-यत्वविशिष्टसंयोगस्य जनकत्वस्वाश्रयवृत्तित्वोभयसम्बन्धेनैव क्रियायामन्वयेन चैत्रप्रतियोगिक-संयोगाश्रयवृत्तिगतेश्चैत्रे बाधाद्वारितः[2]। परया कर्तृसंज्ञया कर्मसंज्ञायां बाधाद् न तादृशः प्रयोग इति कौण्डभट्टः। तत्र शाब्दबोधप्रसङ्गस्तु द्वितीयार्थफलप्रकारकबोधं प्रति तादृशव्यापारो-पस्थितिर्हेतुरिति कार्यकारणभावेनैव वारयितुं शक्य इति तदाशयः[3]। एतादृशं भावसादृश्यं तात्कालिकशास्त्रज्ञानां विचारसरणावैकमत्यं प्रदर्शयति।

एवं भाट्टमीमांसकाग्रणीः खण्डदेवस्य गुरुर्गागाभट्टोऽपि कौण्डभट्टसमकालिकः। अस्य भाट्टचिन्तामणिग्रन्थे प्रायशो वैयाकरणमतं कौण्डभट्टोक्तमेवास्ति।

एवं खण्डदेवोऽप्यस्य समकालिक एव। अयं खण्डदेव ईस्वीये १९६५ वर्षे[4] दिवंगत इति श्रूयते। तदीये भाट्टरहस्ये यदनूदितं वैयाकरणमतं तत्सर्वं भूषणोक्तमेव। कुत्रचित्तानि वाक्यानि तथैव भूषणादुद्धृतानि लभ्यन्ते। नव्यमीमांसकमार्गद्रष्टा खण्डदेवो यद्यपि सर्वत्र सुबर्थ-मखण्डोपाधिरूपमङ्गीकरोति, तथापि तत्किमिति तत्स्वरूपविचारे भूषणाद्युक्तलक्षणसमनियत्वं तस्य प्रपञ्चयति।

अनन्तरेष्वस्य प्रभावः

गदाधर ईस्वीये १९०९ वर्षे[5] मृत इति कथयन्ति। तस्माद् गदाधरेण कौण्डभट्टः साक्षात्कृतो वा न वेति वक्तुं न शक्यते। परन्तु भूषणग्रन्थोऽवश्यं तेन दृष्ट एव। तत्सिद्धान्तेषु तस्यादरोऽपि महान्। धातोः फलावच्छिन्नव्यापारवाचित्वमिति नव्यमतं तिरस्कृत्य कौण्ड-भट्टोक्तं फलम्, व्यापार उभयमपि पृथगेकवृन्तगतफलद्वयन्यायेन, पुष्पवन्तादिवद्वा धातुशक्यमिति मतं समर्थयति। न क्वापि भूषणस्य वा, कौण्डभट्टस्य वा खण्डनं तिरस्कारश्च दृश्यते तद्ग्रन्थे।

गोकुलनाथस्तु पदवाक्यरत्नाकरे वैयाकरणमतानुवादरूपेण भूषणसारव्याख्यामेवाकरोत्। भूषणसारे सूक्ष्मतया प्रपञ्चितानां विषयाणां सम्यक् प्रकाशनं वर्तते, पदवाक्यरत्नाकरे वैया-

---

१. शब्दशक्तिप्रकाशिका—Kashi Sanskrit Series no 109. उपोद्घातः, पृ० ३।
२. शब्दशक्तिप्रकाशिका—P. 320 Kashi Sanskrit Series 109.
३. वै० भूषणम्—P. 130,
४. P. K. Gode—Indian litarary history vol III—P. 81.
५. History of Navya Nyaya in Mithila—P. 197 prof D. C. Bhatta-charya.

करणमतानुवादे। अयञ्च पदवाक्यरत्नाकरो वस्तुतः सर्वसिद्धान्तानामाकर एव। अतश्च गोकुलनाथे कौण्डभट्टस्य प्रभावो महानिति ज्ञायते।

एवं नव्यवैयाकरणनागेशेऽपि तस्य प्रभावोऽस्ति महान्। नव्यमार्गस्य बीजावापः कौण्डभट्टेन कृत इति पूर्वमेवोक्तम्। प्रायशो नागेशः कौण्डभट्टस्य प्रशिष्यो भवेत्, यतो भट्टोजिपौत्रो हरिदीक्षितोऽवश्यं कौण्डभट्टस्य सन्निधौ व्याकरणमधीतवान् स्यात्। यद्यप्यस्मिन् विषये प्रमाणं नोपलभ्यते, तथापि बान्धव्यमेव प्रमाणतया स्वीकर्तुं शक्यम्। मञ्जूषादिग्रन्थेषु तत्तन्मतनिराकरणसमये प्रायशो नागेशेन कौण्डभट्टप्रदर्शिता युक्तय एव प्रदर्शिताः। परमलघुमञ्जूषायां तु प्रायशस्सर्वाणि लक्षणानि भूषणसारीयान्येव; परन्तु नागेशे खण्डदेवस्यापि प्रभावोऽस्ति महान्। तस्मात् तत्र तत्र भूषणाभिप्रायभिन्नं स्वाभिप्रायं प्रकाशयति। समनन्तरेषु वैयाकरणेषु नैयायिकेषु मीमांसकेषु चास्य कौण्डभट्टस्य प्रभावोऽस्त्येव परम्परया।

एवं स्वपाण्डित्यप्रभावेण शास्त्रज्ञलोकं प्रभाव्य, भूषण-भूषणसार-पदार्थदीपिकादिग्रन्थरचनया यशःकायेनामृतस्सन् वैयाकरणानां सर्वेषां सदा पूजनीयो राराजतेऽयमिति शम्।

० ० ०

अष्टाध्यायीसंगतिविमर्शः

श्रीजयप्रकाशत्रिपाठी,
दर्शनविभागाध्यक्षः
वैरोलिया-संस्कृत-महाविद्यालयः, टेढ़ीनीम (वाराणसी)

प्रस्तावना

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

विदितमेवैतत् समेषां सहृदयानां विदुषां यदखिलो ज्ञानविज्ञानराशिर्वेदेषु सुरक्षितोऽस्ति, तेषां च वेदानां षडङ्गानि सन्ति, तथा हि—

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ॥

इति शिक्षा[1]ग्रन्थोक्तेषु षट्स्वङ्गेषु मुखस्थानीयस्य व्याकरणशास्त्रस्य प्राधान्यमुक्तम्। भगवता श्रीपतञ्जलिनाऽप्युक्तम्—"प्रधानं च षट्स्वङ्गेषु व्याकरणम्, प्रधाने च कृतो यत्नः फलवान् भवति"[2] इति।

एतच्च व्याकरणमद्यत्वे पाणिनीयमेव, तदेवाष्टाध्यायीनाम्ना प्रसिद्धमस्ति। तत्राष्टस्वध्यायेषु सङ्गतिप्रकारोऽस्मिन्निबन्धे विमृष्टोऽस्ति। यतो हि किमपि व्याख्यानं कोऽपि ग्रन्थो निबन्धो वा यद्यसङ्गतविषयकं भवति, तदा उपेक्षाविषयः स्यात्। उक्तं च श्रीमल्लिनाथेन—'नामूलं लिख्यते क्वापि नानपेक्षितमुच्यते'[3] इति।

अतश्च संगतिपूर्वकेणैव व्याख्यानेन ग्रन्थेन वा भाव्यमिति विचिन्त्याष्टाध्यायीग्रन्थेऽध्यायोक्तविषयाणां सङ्गतिरवश्यं ज्ञाता भवेदिति कृत्वा सैव सङ्गतिरस्मिन्निबन्धे विचारिताऽस्ति।

प्रथमाध्यायस्य संगतिविमर्शः

प्रथमः पादः

अस्मिन्नध्याये मूलतो वाक्येभ्यः सामान्यपदानां सङ्कलनं कृतमस्ति। प्रक्रियादशायां व्याकरणशास्त्रस्यान्वाख्यानं भागद्वयेन कृतं प्रतीयते। वाक्यविभज्यान्वाख्यानं तथा पदविभज्यान्वाख्यानम्। प्रथमे भागे वाक्येभ्यः पदानां पृथक्करणम्, पदानां जातिनिर्देशादि कृतमस्ति; द्वितीये भागे सङ्कलितपदानां प्रकृतिप्रत्ययाभ्यां विभागः कृतोऽस्ति। शाब्दिकदृष्ट्या शाब्दबोधो मूलतो वाक्येभ्यो भवति, न तु पदेभ्यः। अतो वाक्येभ्यः पदानां सङ्कलनं यावन्न क्रियेत, तावत् पद-

---

१. पा० शि० ४०, ४१। २. म० भा० नवा० प्रथमाह्निकम्। ३. शिशुपालवधम् १–१।

निर्माणात्मकप्रक्रियायाः प्रसङ्ग एव नायाति, अत एव महर्षिपाणिनिना प्रथमाध्याये पदानामेव संग्रहणं क्रियते। शाब्दिकैरन्वाख्यानार्थं वाक्येभ्यः पदानां पार्थक्यं विधीयते। उक्तं च हरिणा—

द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधाऽपि वा।
अपोद्धृत्यैव वाक्येभ्यः...................... ॥[1] इति।

यद्यपि तेन वाक्यात् पदानामत्यन्तं प्रविवेको न कथन[2] इदमपि उक्तम्, तथापि स्फोटदृष्ट्या तदुक्तम्, न तु व्याकृतिदृष्ट्या, अतोऽन्वाख्यानप्रधाने व्याकरणशास्त्रे ईदृशस्तर्को न कार्यः।

यद्यपि प्रथमाध्याये सामान्यपदानां सङ्कलनम्, तथापि पदविवेचनात् प्राक् कतिपयावश्यकसंज्ञानां प्रदर्शनं कृतमस्ति।

पदविभागरूपाणि नामान्यपि संज्ञाशब्देनोच्यन्ते। अत एव प्रथमाध्यायः संज्ञाध्याय इत्यपि कथ्यते। 'संज्ञाधिकारश्चायम्'[3] इति महाभाष्ये उक्तम्। श्रीनागेशेनापि—'तस्मात् संज्ञाप्रकरणे प्रथमाध्याये'[4] इत्युक्तम्। यद्यपि महामुनिपाणिनिः 'अथ संज्ञा' इति नोक्तवान्, तथाऽपि संज्ञाबोधस्य प्रकारः पतञ्जलिना वृद्धिरादैचिति'[5] सूत्रे सम्यग् दर्शितः।

प्रथमाध्याये चतुर्ष्वपि पादेषु संज्ञाविवरणं विलक्षणतापूर्णमस्ति। अन्यथा एकस्मिन्नेव पादे सकलसंज्ञानामुल्लेखः कृतो भवेत्। अत एव च पादभेदः कृतो वर्त्तते। अत्रैकपादीयसंज्ञानामन्यपादीयसंज्ञाभ्यो वैलक्षण्यं विचारितमस्ति। तथा प्रत्येकं पादस्य संज्ञानां क्रमिकस्थापनायां किं बीजमासीत्।

प्रथमे पादे संज्ञा द्विविधा—सर्वशास्त्रव्यवहार्या, प्रकरणनियता च। अष्टाध्याय्या आरम्भे यासां वृद्धिगुणादिसंज्ञानां विवरणमस्ति, तासां सर्वत्र शास्त्रे व्यवहार्यत्वम्। तृतीयेऽथवा षष्ठाध्याये व्यवहृताः संज्ञाः प्रकरणार्थं नियताः सन्ति। उपपद-अभ्यासादिसंज्ञासु इयं रीतिर्दृश्यते। अत एवाभ्याससंज्ञाया उपयोगोऽष्टमाध्याये न क्रियते। यद्यपि तत्राप्यस्ति द्वित्वप्रकरणम्। अन्येष्वध्यायेषु याः संज्ञाः पठिताः सन्ति, तासां पाठः प्रथमाध्याये भवितुं नार्हति। स्वयं पतञ्जलिना एतद्विषये सोदाहरणं विवेचनं कृतम्[6]। संज्ञानामुपर्युक्तो विभागः प्राचीनव्याकरणग्रन्थेषु यद्यपि न दृश्यते, तथाऽपि संज्ञासंज्ञिसम्बन्धविचारेणायं निर्णयस्तर्कसम्मतोऽस्ति।

अष्टकारम्भे वृद्धिसंज्ञाऽस्ति, वृद्धिशब्दो मङ्गलार्थोऽस्ति, अतः सर्वप्रथममस्योल्लेखः, वृद्धिगुणसंज्ञयोः साहचर्यस्य प्रसिद्धत्वाद् वृद्धिसंज्ञानन्तरं गुणसंज्ञाया उल्लेखः।

तदनु एकं परिभाषासूत्रमेतत्संबद्धम्। अष्टाध्याय्यां संज्ञापरिभाषासूत्रयोर्मिश्रितः पाठोऽस्ति। यतश्च वस्तुगत्या द्वयोः साजात्यम्। विविधसूत्राणां प्रवृत्तौ साहाय्यसम्पादनाय।

लघ्वर्थं संज्ञाकरणम्। अनियमे नियमकारिणी परिभाषा। द्वयोर्विषये समानरूपेण यथोद्देशस्य कार्यकालपक्षस्य चाश्रयणं क्रियते[7]। यदा कदाचित् संज्ञात्वमस्य परिभाषात्वं वा इति निर्णयेऽपि काठिन्यमायाति[8]। संज्ञापरिभाषयोरपि परस्परं सम्बन्धोऽस्ति[9]।

---

१. वा० प० ३।१। २. वा० प० १।७३। ३. महाभाष्ये १।४।१।
४. महाभाष्ये ५।२।१२२। ५. महाभाष्ये १।१।१। ६. महाभाष्ये ३।३।१२७।
७. प० शे० २।३। ८. महाभाष्ये १।२।४१ सूत्रे कैयटो नागेशश्च।
९. महाभाष्ये उ० ५।१।१।

संज्ञासूत्रेण पदार्थस्य सामान्यज्ञाने जाते सत्येवानियमबोधप्रसङ्गः सम्भवति। तदर्थं परिभाषासूत्रस्य स्थितिः। पाणिनीयपरिभाषासूत्रं विधिसूत्रार्थनिर्णय उपयुज्यते, परं सरस्वतीकण्ठाभरणे ग्रन्थे उक्तं परिभाषासूत्रं प्रक्रियानिर्वाहेऽप्युपयुज्यते। ईदृश्यः परिभाषाः पाणिनीयतन्त्रे ज्ञापकसिद्धाः सन्ति। या उद्दिश्याचार्यव्याडिना परिभाषापाठस्य रचना कृताऽऽसीत्।

आचार्येण प्रथमतो वर्णसंज्ञा उक्ताः। तदनु प्रगृह्यादिकाः पदसंज्ञाः सुडनपुंसकस्येति[1] सूत्रं यावदेषा शैली। [2]न वेति विभाषासूत्रत आर्थीसंज्ञा इग्यणः सम्प्रसारणमिति[3] सूत्रे सम्प्रसारणसंज्ञाऽपि आर्थी।

तदनु 'आद्यन्तौ टकितौ' सूत्रतः परिभाषासूत्राणां विवरणम्, यतश्च सम्प्रसारणसंज्ञायां यणः स्थाने विधीयमान आदेश इत्येव आदेशचर्चा, अत आदेशविषयिणी च परिभाषा उपक्रान्ता। अनयोरपि द्वयोः साजात्यमस्ति 'अनागमकानां सागमका आदेशाः'। अल्पीयसीनामागमसम्बन्धिनीनां परिभाषाणामुल्लेखं कृत्वा देशसम्बन्धिपरिभाषोल्लेखः। 'अदर्शनम्[4] लोपः' इति सूत्रं लोपसंज्ञाविधायकम्—एषा चार्थी संज्ञा। पुनः टि-संज्ञा उपधा-संज्ञा, एतत्संज्ञाद्वयमाधारसंज्ञाभूतम्। यतश्चानयोः संज्ञिनोः स्थाने कार्यं विधीयते, वृद्धिगुणप्रभृतिसंज्ञानां संज्ञिनस्तु कस्यचित् स्थाने विधीयन्ते। अत आधेयसंज्ञापदेन वक्तुं युक्ताः।

तदनु सौत्रशब्दसम्बन्धिन्यः कतिपयाः संज्ञा परिभाषा वा उक्ताः। सर्वान्ते वृद्धसंज्ञा उक्ता।

द्वितीयः पादः

ङित्कित्प्रत्ययसम्बन्धिकार्यम्, अतिदेशकार्यम्। प्रत्ययाधिकारे एषां पाठो न कृतः, प्रयोगव्यापारे दोषापत्तेः[5]। इदमतिदेशप्रकरणमपि संज्ञाप्रकरणमेव, यतो हि अतिदेश आरोपितसंज्ञा एव। तदनु सामान्यसंज्ञाः—ह्रस्वादिरूपाः, ततश्चापृक्तसंज्ञा वर्णिता। एषा संज्ञा एकविधा परिभाषैव। तदनु समाससम्बन्धिनी कर्मधारयसंज्ञा, एवमुपसर्जनसंज्ञा कृता। समासप्रकरणे पाठमकृत्वाऽत्र पाठेऽस्ति किमपि रहस्यम्[6]। उपसर्जनसंज्ञासूत्रार्थविचारेऽत्र पाठस्य सार्थकता आयाति।

पदेषु मुख्या प्रातिपदिकसंज्ञा ततश्चैकशेषः। सोऽपि प्रातिपदिकविशेषः प्रातिपदिकानामेव च भवति।

तृतीयः पादः

तिङन्तपदरचनायै धातुसंज्ञा, इत्संज्ञा, उपग्रहकार्यम्, परस्मैपदात्मनेपदकार्यम्।

चतुर्थः पादः

परिशिष्टसंज्ञाः, अस्मिन्नेव पादे एकसंज्ञाधिकारः, परकार्यप्राबल्यञ्च। तदनु अङ्गसंज्ञायां भसंज्ञायां च यथोद्देश्यपक्ष एव, न तु कार्यकालपक्षः। अन्यासु संज्ञास्वेतत्पक्षद्वयं समानभावेन

---

१. महाभाष्ये १।१।४३।　　२. महाभाष्ये १।१।४४।　　३. महाभाष्ये १।१।४५।
४. महाभाष्ये १।१।६०।　　५. महाभाष्ये १।२।१। प्रदीपोद्द्योतयोः।
६. महाभाष्ये १।२।४२। सूत्रे प्रदीपोऽत्र द्रष्टव्यः।

प्रवर्त्तते। ततः कारकाधिकारः। इतः पूर्वमेकवचनादिसंज्ञाः। क्रियाविषयकाख्यातप्रकरणोत्तरं कारकप्रकरणम्। कारकप्रकरणेऽपादानादिसंज्ञानां क्रमो विप्रतिषेधसूत्रे तथा बोध्यः। ततो निपातोपसर्गसंज्ञाः, गतिसंज्ञा, कर्मप्रवचनीयसंज्ञा च। अस्मिन्नेव पादान्ते परस्मैपदात्मनेपदसंज्ञे उक्ते। यतश्चात्मनेपदसंज्ञाया परस्मैपदसंज्ञाया बाधः सिद्धयेत्। समावेशार्थः पुरुषसंज्ञा। अन्ते च संहिता-अवसानसंज्ञे।

द्वितीयाध्यायसंगतिः

पदसामान्यं प्रथमेऽध्याये, द्वितीये तु पदविशेषा दर्शिताः प्रथमद्वितीयपादौ।

अत्र समासरूपविशेषपदानां प्रदर्शनम्—पदसम्बन्धी विधिः समर्थः पदविधिः।

प्रथमतो व्यासरूपवाक्यानां विवरणम्, तत्र व्यपेक्षावादः। इदानीं समासरूपवाक्यस्य विवेचनम्, तत्रैकार्थीभावः। अव्ययीभावादिसमासक्रमविवेकः। प्रथमपादे कारकसम्बद्धतत्पुरुषवर्णनम्। द्वितीयपादे तद्भिन्नानां तत्पुरुषस्यैव शेषो 'बहुव्रीहिः, भाष्येऽपि'[1] इदं स्पष्टम्। सर्वसमासप्रकरणस्यान्ते उपसर्जनविषयः। स च पारिभाषिक एव, प्रकरणवशात्। अन्यत्र तु अप्रधानार्थकः सः, यथाऽनुपसर्जनादित्यादौ।

तृतीयपादः

सुब्विभक्तीनामर्थाः समासे तदीयाऽपेक्षाऽस्ति। इतः प्राक् कारकसमासयोर्निरूपणे इदमेव रहस्यम्। विभक्तीनां निर्देशक्रमो बाध्यबाधकभावाधीनः। 'सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्त्तिके'[2] इति।

चतुर्थः पादः

समाससम्बद्धलिङ्गवचनानां निर्देशः प्रारम्भे। सुब्रहितः समासार्थो न भवति, लिङ्गवचनैः सह सुपां सम्बन्धोऽविच्छेद्यः। वचनविषये एकवद्भावः, स तु लिङ्गापेक्षया व्यापकः।

इदमोऽन्वादेश[3] इति सूत्रेणान्वादेशविचारः। यथा समासो विशेषपदम्, तथैवान्वादेशोऽपि। एवमेवार्धधातुकसम्बन्धी धातुरपि विशिष्ये धातुः।

षष्ठाध्याये यो धात्वादेशः स त्वार्धधातुकनिमित्तकः।

व्यक्षत्रियार्षजितो०[4] इति सूत्रतः पदसम्बन्धी लुक्प्रकरणमारभ्यते। गौणरूपेण विकरणसम्बन्धी लुगपि वर्त्तते, परन्तु मुख्यरूपेण नामसम्बन्धी एव लुक्, अन्यदपि लुक्प्रकरणमस्ति[5]।

सर्वान्ते डारौरसां विधानम्, डादेशस्य सर्वादेशत्वसिद्धये प्रत्ययाधिकारेऽयं न पठितः।

तृतीयाध्यायसंगतिः

अथ पदविश्लेषणप्रकरणं तृतीयाध्यायतः पञ्चमाध्यायं यावत्। प्रथमे द्वितीये चाध्याये सामान्यरूपेण विशेषरूपेण च पदानां विवेचनं कृतम्। इदानीं तेषु प्रकृतिप्रत्यययोर्विभागः

---

१. महाभाष्ये २।२।२३। २. तन्त्रवार्त्तिक पृ० ६०६, ३. महाभाष्ये।२।४।३२।
४. महाभाष्ये २।४।५८। ५. रहस्यं तु ४।१।१७५ सूत्रे तत्त्वबोधिन्यां द्रष्टव्यम्।

प्रदर्श्यते। पदनिमित्तात् प्रत्ययविधेः[1]। तृतीयाध्याये सर्वतः प्रथमं प्रत्यय इति सूत्रमुच्यते—प्रत्ययार्थस्य प्राधान्यात्। निरुक्ते तु प्रकृतीनामेव प्रदर्शनं भवति, परन्त्वत्र द्वयोरिति कृत्वा प्रत्यय इति सूत्रस्य प्रथमोल्लेखः। इयान् विशेषोऽत्र बोध्यः।

पदानामर्थवत्ता लौकिकी। प्रकृतिप्रत्यययोस्तु शास्त्रीयैव। अस्मिन् द्वितीये भागे प्रथमतो धातोर्विकसितस्वरूपस्य वर्णनम्। ततस्तेभ्यो धातुभ्यो नाम्नां व्युत्पादनम्, धातुजन्य-तिङन्तपदप्रयोगश्च, ततो नामभिर्नामव्युत्पादनम्। एवञ्च कारणशब्दोल्लेखः। ततः कार्यभूत-शब्दोल्लेखः।

प्रथमः पादः

प्रत्ययः परश्चेति सूत्रद्वयोत्तरम्-आद्युदात्तश्च इति स्वरविधिः। विशिष्टप्रयोजन एव अस्यात्रोल्लेखः, अन्यथा षष्ठाध्याय एव पठितः स्यात्। तच्च प्रयोजनं लोहितादिडाज्भ्य इति भाष्ये उद्द्योते च द्रष्टव्यम्। आयादय०[3] इति सूत्रं यावत्सनादिप्रत्यया उक्ताः। येन कृत्रिमा धातवो भवन्ति। एतद्विषये शब्दद्वयी जायते। भूवादय इत्युत्तरमेव कृत्रिमधातूनामपि प्रकरणं कथन्न कृतम्। सनाद्यन्ता[4] धातवः सूत्रस्योत्तरं भूवादयश्चेत्येव कुतो न पठितम्? प्रथनस्येदं समाधानं यद् भूवादयोऽखण्डा धातवः, सनाद्यन्ताः सखण्डा इति भेदेन प्रकरणभेदः। द्वितीय-स्येदं समाधानं यदनुदात्तङित आत्मनेपदमित्यत्र धातुपदमनुवर्तनीयमस्ति। तच्च भूवादय इत्यत एव साधयितुं शक्यः। यदि तु अनुदात्तङित इति सूत्रमेव तृतीयाध्याये पठेत्, तदा संगतिर्न दृश्यते। कृत्रिमधातुस्वरूपविवरणानन्तरं विकरणप्रत्ययानां विधानम्, अन्तरङ्गानामार्धधातुक-विकरणानां पूर्वमुल्लेखः। धारयः पारय इत्यादिकृत्प्रत्यये परतोऽपि एषां विकरणानां प्रवृत्तिः। अतस्ततः पूर्वमेवैषां पाठः। कर्मवत्कर्मणा[5] तुल्यक्रियः इति सूत्रतः कर्मकर्तृप्रत्ययाः, यतो हि यक्चिणादिप्रत्ययानामेतैः सह कृत्प्रत्ययानां प्रकृतिभूता सामग्री दर्शिता। धातोरिति सूत्रतः[6] कृत् प्रत्यया उच्यन्ते। एतदधिकाराभावे तु नामतोऽपि कृत्प्रत्यया भवेयुः।

कृत्य-कृद्भेदाभ्यां कृत्प्रत्यया द्विविधाः। कृत्यवाच्योऽभावोऽसत्त्वरूपः, कृत्प्रत्यये अव्यय-कृदतिरिक्ताः कृत्प्रत्यया द्रव्यरूपं भावमभिदधति। कालद्योतकाः प्रत्यया अपि क्रम उक्ता एव, भविष्यत्कालेन वर्तमानकालस्य बाधः, अतस्तस्य पश्चात् पाठः।

द्वितीयः पादः

सर्वकालद्योतकेषु ण्वुलादिप्रत्ययेष्वतिक्रमो विद्यते। प्रथमे पादे ये सन्ति प्रत्ययाः, तेषूपपदस्यापेक्षा नास्ति। द्वितीये पादे तूपपदसापेक्षाः प्रत्ययाः। तत्राऽपि प्रथमं कर्तृद्योतकाः, तदनु कारकान्तरद्योतकाः। एतैः प्रत्ययैर्भूतकालद्योतकप्रत्ययैश्च निष्पन्नाः शब्दाः प्रायेण विशेषण-भूता एव भवन्ति।

तृतीयः पादः

आरम्भ एवोणादिप्रत्ययानां चर्चा। एषामनुशासनमत्र किमर्थमिति प्रश्ने इदमुत्तरम्—द्वितीयपादे यावन्निष्पादिताः शब्दाः प्रायेण यौगिकाः। तृतीयपादे रूढबहुला अनेन साम्येनोणादि-प्रत्ययानामत्रानुशासनम्। कर्तृप्रत्ययाः प्रायेण पूर्वमुक्ता इदानीं कर्मादिष्वपि प्रत्ययाः।

---

१. महाभाष्ये।३।१।९२। २. महाभाष्ये।३।।३१। ३. महाभाष्ये ३।१।३१।
४. महाभाष्ये ३।१।३२। ५. महाभाष्ये ३।१।८७। ६. महाभाष्ये ३।१।९१।

कारकार्थकप्रत्ययविध्युत्तरं भावे इत्यनेन क्रियार्थकप्रत्ययानां विधिरर्थभेदे सत्यपि लाघवार्थः। भावप्रत्ययानां कारकार्थकत्वमपि 'अन्येभ्यो० इति यावत् कृत्प्रत्ययानां विमर्शः समाप्तः। धातोर्द्वये प्रत्ययाः कृतस्तिङश्च। तत्र कृत्प्रत्ययानां समाप्तौ तिङ्प्रत्यया उच्यन्ते।

चतुर्थः पादः

अव्ययसंज्ञाप्रयोजकीभूताः कृत्प्रत्ययाः। ततो लादेशा आरब्धाविशेष्यवाचित्वात्। विशेषणीभूता साध्या क्रिया समाप्ता, लस्येति[२] सूत्रतो विशेष्यभूता साध्या क्रिया आरभ्यते। तत्र पूर्वं टितो लकाराः पश्चात् ङितो लकाराः। एषु लकारेषु धातोः स्वरूपं प्रायेण विकृतं तिष्ठति।

चतुर्थाध्यायसङ्गतिः

तृतीयाध्याये धातोर्नामोत्पत्तिः, चतुर्थे पञ्चमे तु नाम्नो नामोत्पत्तिः। सुबन्तात्तद्धितोत्पत्तिरिति कृत्वा प्रातिपदिकाधिकारः। स्वौजसमौट्० प्रदर्शनञ्च पूर्वमेव। स्त्रीप्रत्यया अपि केचन सुबुत्पत्त्यनन्तरं भवन्ति, यथा पा-साप्रभृतयः। ङ्याबन्तात्तद्धितोत्पत्तिः। स्त्रीप्रत्यया अपि द्विविधाः—साधारणाः, अनुपसर्जनाधिकारीयाश्च। कृत्प्रत्ययोत्तरं तद्धितप्रत्ययाः, कृत्प्रत्ययेषु प्रकृत्यर्थेऽपि प्रत्यया भवन्ति, तद्धितेषु तु पृथगर्थेषु। अत एव—'कृद्वृत्तेस्तद्धितवृत्तिर्बलीयसी[३]' इति।

तद्धितप्रकरणे विभागद्वयमस्ति—अस्वार्थिकप्रत्ययाः, ततः स्वार्थिकाः। तत्रास्वार्थिकेषु प्रत्ययविधिमादाय प्रत्ययार्था उपदिष्टा लाघवाय। तत्रार्थक्रम ऐच्छिकः, प्रकरणक्रमस्तु बलाबलचिन्तागर्भोऽपि[४], क्वचन पूर्वविप्रतिषेधोऽपि[५]।

चतुर्थाध्याये अण्प्रत्ययः प्राग्दीव्यतोऽणिति[६] सूत्रतस्तृतीयपादं यावत्। ततः प्राग्घिताद्यदिति[८] सूत्रतः पादसमाप्तिं यावद् यत्प्रत्ययाधिकारः। एषु अण्प्रत्ययोऽधिकदेशव्यापी। ततष्ठक्, ततो यत् अल्पदेशव्यापी। अतिव्यापकोऽपत्याधिकारः प्रथमम्, तत्रैव गोत्रार्थका युवार्थकाश्च, अपत्याधिकारोत्तरं द्वितीये पादे रक्तार्थकाः, चातुरर्थिका निरूपिताः। एषु प्रकरणेष्वधिज्ञानमावश्यकम्, अन्यथा सर्वत्राग्निकलिभ्यां ढक् इति वार्त्तिके सर्वत्रपदेन सर्वेषु प्राग्दीव्यतीयेष्वित्यर्थं इति कैयटो दृष्टं सामेति[९] सूत्रे कथं सङ्गच्छेत? अवधिकथनेनैव प्रत्ययानामर्थानाञ्च साङ्कर्यं न भवति, अणोऽधिकारे शैषिकरूप एको विशिष्टोऽधिकारोऽस्ति। शैषिकप्रत्ययानां विशेषः 'शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः' इति।

द्वितीयपादतस्तृतीयं पादं यावत् शैषिकाधिकारः। द्वितीये पादे शेषाधिकारः, तृतीये तु स नास्ति। 'तत्र जातः[१०]' सूत्रतोऽर्थाधिकारः प्रारब्धः। प्रथमतः प्रत्ययनिर्देशस्ततोऽर्थनिर्देशः।

---

१. महाभाष्ये ३।३।१३०।
२. महाभाष्ये ३।४।७७।
३. महाभाष्ये ४।१।२।
४. शिशुपालवधे सर्वंकषा १।१७।
५. महाभाष्ये ४।१।९२।
६. ४।१।८५ सूत्रे महाभाष्ये वार्त्तिकं द्रष्टव्यम्।
७. महाभाष्ये ४।१।८३।
८. महाभाष्ये ४।४।७५।
९. महाभाष्ये ४।२।७।
१०. महाभाष्ये ४।३।२५।

सामान्यप्रत्ययानुशासनोत्तरमर्थनिर्देशः, तथा तेष्वर्थेषु प्रत्ययविशेषविधानम्। चतुर्थे पादे ठगधिकारः। येषु अर्थेषु ठक्प्रत्यय उत्सर्गो भवति, ते तेऽर्थाऽस्मिन्नध्याये सङ्गृहीताः। प्राग्घिताद्यदिति[1] सूत्रतो यत्प्रत्ययाधिकारोऽध्यायसमाप्तिं यावत्।

पञ्चमाध्यायसङ्गतिः

अण्, ढक्, यत्, घ, ढक्, ठञ् एते षट् प्रत्ययास्तद्धितप्रकरणे। तत्र, अण्-ढक्-यत्प्रत्ययानां कृते चतुर्थाध्यायः। घ-ठक्-ठञां कृते पञ्चमोऽध्यायः।

प्रथमः पादः

आरम्भे छप्रत्ययाधिकारः, ततः [2]स्वार्थो ईकनिति सूत्रतः ठञोऽधिकारः।

द्वितीयः पादः

अस्वार्थिकप्रत्ययानां परिशिष्टोऽयं पादः। अत्र पूर्ववत्प्रत्ययाधिकारो नास्ति।

तृतीयचतुर्थपादौ

स्वार्थिकप्रत्ययानां प्रारम्भः। तद्धितप्रकरणे समर्थानां प्रथमाद्वा इति सूत्रमधिकृतमस्ति। तत्र समर्थानां प्रथमादिति पदद्वयं निवृत्तमत्र केवलं वेति सम्बद्धयते। अतः स्वार्थिकास्तसिलादिप्रत्यया विकल्पेन भवन्ति [3]प्राग्दिसो विभक्तिरिति काशिका। तत्रापि विभक्तिसंज्ञकाः स्वार्थिकतद्धितास्तद्भिन्नाश्च। तत्रापि अत्यन्तस्वार्थिकाः, स्वार्थिकाश्चेति द्विविधाः। अत्यन्तस्वार्थिकानां सुबुत्पत्तेः पूर्वमेवोत्पत्तिः[4]। तदनु [5]समासान्ताः इति सूत्रतः समासान्ताः। तत्फलं 'उपराजम्' इत्यादौ नस्तद्धिते इति टिलोपः। समासान्ताः स्वार्थिकास्तद्धिताः। अतः एषां स्वार्थिकेषु पाठः, न तु समासप्रकरणे। स्वार्थिकतद्धितेभ्यः प्राङ् न पठिताः, विप्रतिषेधसूत्रप्रवृत्त्यर्थम्। अष्टाध्याय्या द्वितीयो भागः समाप्तः।

षष्ठाध्यायसङ्गतिः

अष्टकस्य तृतीयो भाग आरभ्यते। तत्र पूर्वेष्वध्यायेषु यद्यपि पदसिद्धौ प्रकृतिप्रत्ययविभागो दर्शितः, तथाऽपि तेषां काल्पनिकत्वात् किञ्चित् कार्यमवशिष्टम्, यद्विना पूर्णा पदसिद्धिर्न स्यात्। अत आगमादेशादिविधानोऽपि अस्याध्यायस्य प्रयोजनम्, प्रथमं प्रकृतिसम्बन्धिन आदेशादिविधयः, पश्चात् प्रत्ययसम्बन्धिनः। यतः प्रकृत्याश्रितानि कार्याणि अन्तरङ्गाणि। पुनः प्रक्रियानिर्वाहकविभागेषु द्वौ मौलिकावन्तर्विभागौ स्तः—निरपेक्षः सापेक्षश्च।

[6]अङ्गस्येति सूत्रतः सप्तमं यावदङ्गाधिकारः सापेक्षो विभागः, यतोऽङ्गसंज्ञा नित्यं प्रत्ययापेक्षां करोति। अन्यत्प्रकरणं निरपेक्षमस्ति। प्रथमतो निरपेक्षप्रकरणम्, ततः सापेक्षम्।

तत्रादौ निरपेक्षप्रकरणेऽवान्तरप्रकरणसङ्गतिरित्थं बोध्या, एकाचो द्वे[7] प्रथमस्येति सूत्रतः दाश्वान्सा०[8] इति सूत्रं यावद् धातुद्वित्वं निर्दिष्टम्। इदं चादेशरूपं नास्ति। द्विः प्रयोगो

---

१. पा० सू० ४।४।७५। २ पा० सू० ५।१।३३। ३. पा० सू० ५।३।१।
४. महाभाष्ये उद्द्योते ४।१।४८। ५. पा० सू० ५।४।६८।
६. पा० सू० ६।४।१। ७. पा० सू० ६।१।१। ८. पा० सू० ६।१।१२।

द्विर्वचनं षाष्ठमिति सिद्धान्तात्[1]। पक्षान्तररूपम्, तच्चादेशविधिरपि; परन्तु स प्रत्याख्यातः। द्विर्वचनसम्बन्धी अभ्यासविधिरपि सप्तमेऽध्याये। [2]ष्यङः सम्प्रसारणमिति सूत्रतः सम्प्रसारण-रूपादेशविधिः। पुनः [3]आदेच उपदेशेऽशिदिति सूत्रतः आत्वविधिः। इमे सर्वे विधयो धातुसम्बन्धिनः। यद्यपि क्वचन नाम सम्बन्धिसूत्रमपि। आदेशसम्बन्धिप्रकरण क्रमेऽयं विधिर्द्रष्टव्यः।

बहिरङ्गविधिभ्यः स्यादन्तरङ्गविधिर्बली।
प्रत्ययाश्रितकार्यं तु बहिरङ्गमुदाहृतम्॥
प्रकृत्याश्रितकार्यं तु स्यादन्तरङ्गमिति ध्रुवम्।
प्रकृतेः पूर्वं पूर्वं स्यादन्तरङ्गतरं तथा॥

आदेशक्रमो मूलतो विप्रतिषेधनियमानुसारेणास्ति। आदेशैः सहागमानामपि पाठः। यतो हि आगमा अपि आदेशविशेषा एव। परन्तु आदेशाः सार्थकाः, आगमा न तथा। आगमोऽपूर्वः शब्दोऽपजनः, आगामा आगमिग्रहणेन गृह्यन्ते न त्वादेशाः। आगमा अनित्या भवन्ति, न त्वादेशाः। आदेशैः सह निपातनसूत्राणामपि निर्देशो निपातितशब्दानां रूढयर्थप्रतिपत्तये निपातनरीतिराश्रिता। संहितायामिति[6] सूत्रतः संहिताधिकारीयसन्धिकार्याणि निर्दिष्टानि। वर्णपदान्यतरोद्देश्यका आदेशा द्विविधाः। वर्णोद्देश्यका अपि एकवर्णोद्देश्यकाः, वर्णसमूहोद्देश्य-काश्च, प्रथमो विकारः; द्वितीय आदेश इत्युच्यते। आचार्यपाणिनिना वर्णविकारो द्विधा विभा-जितः पदद्वयसम्बन्धी वर्णद्वयादेशः, एकादेशश्च। एकः पूर्वपरयोरिति[4] अस्यैकादेशस्याधिकारः ख्यत्यात्परस्येति[5] सूत्रं यावत्। प्रकृत्यान्तः इति सूत्रतः[7] प्रकृतिभावः। यथा विकारः काल्प-निकस्तथैव विकाराभावोऽपि विकारोपदेशोत्तरमेव तदभावोपदेशावश्यकता आयाति। प्रकृति-भावोत्तरं सुट्कात्पूर्वं इति[8] सूत्रतः सुडागमप्रकरणम्। तदनु अनुदात्तं पदमेकवर्जमिति सूत्रतः[9] स्वरविधिः। एषोऽप्यादेशविशेषविधिः। संहितानिमित्तकत्वाभावात् संहिताधिकारात् परमस्य पाठः पारिशेष्यन्यायात्।

अष्टमाध्याये प्रथमे पादे स्वरविधिर्द्विविधः—सामान्यपदसम्बन्धी समासरूपपदविशेष-सम्बन्धी च। प्रथमपादे प्रथमः, द्वितीये च द्वितीयः प्रत्ययस्वरविधिरपि 'अनुदात्तं पदमेकवर्जम्' अनुसृत्य पदविधिरेव। प्रथमपादीयस्वरेष्वाद्युदात्तान्तोदात्तरूपेण द्विविधः स्वरः। द्वितीयेऽपि पादे पूर्वपदोत्तरपदोद्देश्यकतया द्विविधः स्वरः।

तृतीयः पादः

अत्रापि प्रकृतिकार्योपदेशः, यस्तूत्तरपदपरत्वापेक्षः। तच्च कार्यं समास एव सम्भवति। समासे च प्रक्रियादृष्ट्याऽलुक् एव प्राधान्यमस्ति। अतः सर्वप्रथमं तस्योपन्यासः। ततः [10]आनङ्-

---

१. मुग्धबोधेऽच्सन्धौ २१ दुर्गादासीयटीकायामुद्धृतमेतत्। २. पा० सू० ६।१।१३।
३. पा० सू० ६।१।४५। ४. पा० सू० ६।१।७२। ५ पा० सू० ६।१।८४।
६. पा० सू० ६।१।११२। ७. पा० सू० ६।१।११५।
८. पा० सू० ६।१।१३५। ९. पा० सू० ६।१।१५८। १०. पा० सू० ६।३।२५।

ऋतो द्वन्द्वे इति सूत्रतः समासाश्रयाणि अन्यकार्याणि । क्वचित् मुम्, क्वचिद् नुट्कार्यमपि प्रासङ्गिकमस्ति । समेषामुत्तरपदसापेक्षकार्याणामेकपादे समावेशः । तस्य च तदन्तस्य चेति परिभाषाप्रवृत्त्यर्थः ।

चतुर्थः पादः

अङ्गस्येति[1] सूत्रम् अङ्गस्येत्यधिकारसूत्रम् । आसप्तमसमाप्तेः । यस्मात्प्रत्ययविधिरिति[2] सूत्रेण प्रत्ययपरत्वे सत्येवाङ्गसंज्ञाविधानमिति । विद्यमानप्रत्ययसम्बन्धिकार्याणां विवरणमत्र कृतम् । प्रकृतिसम्बन्धिकार्याण्यपि अत्राधिकारे निर्दिष्टानि । येषां विवेकोऽत्र पाठे न कृतः । यदि केवलं प्रत्ययसम्बन्धीनि एव कार्याणि अस्मिन्नधिकारे स्युः ,तर्हि सप्तमाध्याय एवायमधिकारः पठितः स्यात् । अस्मिन्नङ्गाधिकारे द्विधा स्थितिरस्ति । सिद्धं कार्यं तथासिद्धं कार्यम् असिद्धवदत्राभादिति[3] सूत्रतोऽसिद्धमेव कार्यमारभ्यते ।

अभावज्ञाने प्रतियोगिज्ञानस्य कारणतया सिद्धकार्यस्य प्राक् प्रदर्शनमुचितम् । असिद्धकार्येऽपि द्विधा व्यवस्था । प्रथमः साधारणः, द्वितीयो भसंज्ञासम्बन्धी । तदारम्भो भस्य[4] सूत्रतः पादान्तं यावत् । पूर्वाचार्याणामेषा शैली, यत् सामान्यविषयाणां परिचायनं पूर्वं तदनु विशेषविषयाणाम् ।

यद्यप्यष्टमाध्यायेऽप्यस्ति असिद्धकाण्डम्, तथाऽपि अनयोरस्ति द्वयोर्महान् भेदः । षष्ठे तु अस्ति प्रत्ययपरत्वापेक्षा, अष्टमे सा नास्ति । अष्टमे तु पूर्वं प्रति परं शास्त्रमसिद्धं भवति, न तु षष्ठे ।

निमित्तं कार्यि तथा कार्यमुद्दिश्य सादृश्यं दृष्ट्वा च प्रकरणक्रमो निर्दिष्टोऽस्ति ।

मुग्धबोधे २१ सूत्रे टीकायां दुर्गादासेनैषां त्रयाणां स्वरूपं निर्दिष्टम् ।

कार्यी कार्यं निमित्तञ्च त्रिभिः सूत्रमुदाहृतम् ।
कदाचित् कार्यिकार्याभ्यां क्वचित् कार्यनिमित्ततः ॥
यस्य निर्दिश्यते कार्यं स कार्यी गदितो बुधैः ।
क्रियते यत्तु तत्कार्यमादेशप्रत्ययागमम् ॥
यस्मात् परं परे यस्मिन् तन्निमित्तं द्विधा मतम् ।
आकाङ्क्षायां तु सर्वेषामनुवृत्तिः पदे पदे ॥

सूत्राणां रचनाक्रमे रहस्यमेताभिः कारिकाभिर्विज्ञेयम् । हरिनामामृतव्याकरणेऽपि—

प्राङ्निमित्तं तथा कार्यी कार्यं परनिमित्तकम् ।
अत्र क्रमेण वक्तव्यं प्रायः सूत्रेषु सर्वतः ॥ इति ।

---

१. पा० सू० ६।४।१ । २. पा० सू० १।४।१३ । ३. पा० सू० ६।४।२२ ।
४. पा० सू० ६।४।१२९ ।

सप्तमाध्यायसङ्गतिः

षष्ठाध्याये प्रकृतिकार्याणां निर्देशः, सप्तमाध्याये प्रथमे पादे प्रत्ययकार्याणां निर्देशः। यतः प्रत्ययाः काल्पनिका अत आदेशादिमन्तरा पदस्य सिद्धिरशक्या। अतः सप्तमाध्याये तादृशः कार्योपदेशः।

आरम्भे तप्तनप्तनथनाश्चेति[1] सूत्रं यावत् प्रत्ययादेशानां विमर्शः सहैव विभक्तिकार्यमपि, आगमकार्यञ्च।

पूर्वनिर्दिष्टा आगमाः षष्ठाध्याये प्रकृतिसम्बन्धिनः।

अत्र निर्दिष्टा आगमाः प्रत्ययसम्बन्धिनो द्वितीयतृतीयपादौ—सिचिवृद्धिः परस्मैपदेष्विति सूत्रतः[2] अतो हलादेर्लघोरिति[3] सूत्रं यावत् सिज्विकरणाश्रितकार्याणि निर्दिष्टानि। प्रत्ययकार्यं तथैषामत्रोपदेश उचित एव। तदनु इडागमप्रकरणम्। तत्रेण्निषेधप्रकरणम् ग्रसितस्कभित० इति[4] सूत्रं यावत्। आर्धधातुकस्येति[5] सूत्रतः ईड्जनोर्ध्वे चेति[6] सूत्रं यावदिड्विधिप्रकरणम्। पुनः प्रकीर्णकप्रत्ययाश्रितकार्याणि, पुनः अष्टन[7] आ विभक्तौ इति सूत्रतः हलि लोप[8] इति सूत्रं यावद् विभक्तिपरत्वनिमित्तकानि कार्याणि।

मृजेर्वृद्धिरिति[9] सूत्रतः पञ्चत्रिंशत्सूत्रेषु वृद्धिकार्योपदेशः। वृद्धिकार्यं सम्बद्धानामागमानां विवरणम्।

तृतीयपादे यद्यपि तद्धितीयकार्याणि सन्ति, तथापि न तानि वृद्धिकार्याणि, अपि तु वृद्धिसङ्गीनि अन्यकार्याणि। अतः पृथक्पादे तेषामुपन्यासः। वृद्धिकार्योत्तरं लोपागमवर्णविकाररूपकार्याणां निर्देशः।

चतुर्थः पादः

प्रथमतो विकरणसम्बन्धीनि ह्रस्वादिकार्याणि, पुनः तिङन्तसम्बन्धीनि प्रकीर्णकानि कार्याणि। विप्रतिषेधनियमोऽप्यत्रोपयुक्तोऽस्ति।

अत्र लोपोऽभ्यासस्येति[10] सूत्रतः पादसमाप्तिं यावदभ्यासविकारसम्बन्धीनि कार्याणि। अभ्यासविकारेषु बाध्यबाधकभावो न भवतीति हेतोरस्य पृथक्पाठो न तु षष्ठाध्याये।

अष्टमाध्यायसङ्गतिः

प्रथमः पादः

आरम्भे द्वित्वकार्यम्। सप्तमाध्यायं यावत् पदनिर्माणम्। इदानीं पदस्य कार्यम्। षाष्ठं द्वित्वं द्विःप्रयोगात्मकम्। इदं तु स्थाने द्वित्वम्, पदस्येति[11] सूत्रतः पदस्याधिकारः।

---

१. पा० सू० ७।१।४५। २. पा० सू० ७।२।१। ३. पा० सू० ७।२।७।
४. पा० सू० ७।२।३४। ५. पा० सू० ७।२।३५। ६. पा० सू० ७।२।७८।
७. पा० सू० ७।२।८४। ८. पा० सू० ७।२।११३। ९. पा० सू० ७।२।११४।
१०. पा० सू० ७।४।५८। ११. पा० सू० ८।१।१६।

अयमधिकारोऽसिद्धकाण्डस्यांशविशेषं क्रोडीकरोति द्वित्वविधिरसिद्धो न भवति। अत एव प्रक्रियानिर्वाहे लघुत्वसम्पत्तये पदाधिकारात् प्रागेव द्वित्वविधिरुपदिष्टः। अन्यथा पदस्येति प्रथममेव सूत्रं स्यात्। एतदधिकारे एव पदाद् इत्यस्याऽप्यधिकारः।

यत्र स्वरप्रक्रियाया विवरणमस्ति। अयं स्वरविधिः सिद्धोऽस्ति। आष्टमिकोऽयं स्वरविधिः पदस्य पदात्सूत्रयोरधिकारेऽस्ति। परन्तु षाष्ठ ईदृशो नास्ति। अतः पृथक् पाठः। द्वयोः स्वरयोः सिद्धिप्रकारोऽपि तुल्यो नास्ति।

द्वितीयतृतीयचतुर्थपादाः

अष्टमाध्याये द्वितीयपादतोऽसिद्धकाण्डस्य पाठः प्रारभ्यते। इयं त्रिपादी इत्युच्यते। अत्र तृतीयपादे इडाया वेति[1] सूत्रं यावत् पदाधिकारः। पुनः 'अपदान्तस्य[2] मूर्धन्यः' इत्यधिकारः।

चतुर्थे पादे पूर्वं सत्त्वस्योल्लेखः। अत्राऽप्यपदान्तस्याधिकारः। णत्वोत्तरं स्तोः श्चुना श्चुः[3] सूत्रतो व्यञ्जनविकरणानां विवरणम्। इदञ्च प्रकरणं झरोझरि[4] सवर्णे सूत्रं यावत् पुनः सूत्रत्रयेण स्वरकार्यम्। स्वरसिद्धये एषां विधीनामसिद्धत्वमावश्यकम्। 'अनुदात्तं[5] पदमेकवर्जम्' इत्यस्य प्रवर्त्तने तु न भवति। अन्तिमं सूत्रम्—"अ अ" इति।

० ० ०

---

१. पा० सू० ८।३।५४। २. पा० सू० ८।३।५५। ३. पा० सू० ८।४।४०।
४. पा० सू० ८।४।६५। ५. पा० सू० ६।१।१५८।

पाणिनीय-शाकटायनव्याकरणयोः प्रत्याहारसूत्राणां प्रत्याहाराणां च परिशीलनम्

श्रीरामकृष्णपुरोहितः, अनुसन्धाता
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

विचारणीया विषयाः

१. किमर्थो वर्णानामुपदेश इति प्रश्ने विचारः ।

२. प्रत्याहारसूत्राणि पाणिनीयान्यपाणिनीयानि वेति ।

३. उभयोर्व्याकरणयोः प्रत्याहारसूत्राणां सङ्कलनम् ।

४. पाणिनीयशाकटायनयोः प्रत्याहारसूत्राणां द्वैविध्यप्रदर्शनम् ।

५. अपाणिनीयव्याकरणानां प्रत्याहारसूत्रनिदर्शनम् ।

वैदिकसमये वर्णानामुपदेश आसीत्; किन्तु व्याकरणशास्त्रेऽक्षरसमाम्नायस्य महत्त्वं सर्वोपरि विद्यते । स 'ब्रह्मराशिः'[1] इति नाम्ना उच्यते । अस्याक्षरसमाम्नायस्य विषये शाब्दिकानां बहूनि मतानि दृश्यन्ते । तेषु मतेषु भगवतः पतञ्जलेर्मतं सर्वोत्कृष्टं वर्तते[2] । काशिकायाम्[3], न्यासे,[4] प्रदीपे[5], पदमञ्जर्यां[6] चापि पक्षोऽयं दृश्यते ।

---

१. "यथाचार्या ऊचुर्ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यस्तं खल्विदममक्षरसमाम्नायमित्याचक्षते । न भुक्त्वा, न नक्तं प्रब्रूयाद् ब्रह्मराशिरिति ब्रह्मराशिरिति च" (ऋक्तन्त्रे १।४) ।

२. अथ किमर्थो वर्णानामुपदेशः ? वृत्तिसमवायार्थं उपदेशः । का पुनर्वृत्तिः............, शास्त्रप्रवृत्तिः । अथ कः समवायः ? वर्णानामानुपूर्व्येण सन्निवेशः ।.......अनुबन्धकरणार्थश्च । वृत्तिसमवायश्चानुबन्धकरणं च प्रत्याहारार्थम् । इष्टबुद्ध्यर्थश्च । इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः । इष्टान् वर्णान् भोत्स्यामहे इति । न ह्यनुपदिश्य वर्णानिष्टा वर्णाः शक्त्या विज्ञातुमिति । (म० भा० ४३ पृ०) ।

अपि च—

वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते ।
तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते ॥ (म० भा० ११३ पृ०)

३. का० वृ०, पृ० १ । ४. न्या० पृ० १८ ।

५. प्रदीपे पृ० ५९ । ६. प० मं०, पृ० १८ ।

परिवर्तिना सिद्धान्तकौमुदीकारेणाऽपि पक्षोऽयं समर्थितः[१]। अपाणिनीयेन चान्द्रव्याकरणकारेण[२] शाकटायनेन[३] चेदं मतं समर्थितम्।

महाभाष्ये भगवता पतञ्जलिना 'हयवरट्'[४] (प्र० सू० ५) 'वृद्धिरादैच्'[५] (अ० १।१।१) इत्यनयोः सूत्रयोर्निर्दिष्टं यत् पाणिनीयानि प्रत्याहारसूत्राणीति। स्कन्दस्वामिना,[६] कुलशेखरवर्मणा[७], पुरुषोत्तमदेवेन,[८] सृष्टिधराचार्येण,[९] मेधातिथिना,[१०] न्यासकारेण[११] च पक्षोऽयं समर्थितः, परञ्च नन्दिकेश्वरेण[१२] पाणिनिशिष्येण,[१३] भट्टोजिदीक्षितेन[१४] चोक्तं यद् माहेश्वराणि प्रत्याहारसूत्राणि, किन्तु मतमिदं युक्तं न प्रतिभाति। तत्र महाभाष्यकारस्य पूर्वोक्तं समर्थितं मतं युक्तमस्ति।

पाणिनीयानीमानि सूत्राणि

अइउण् (१), ऋऌक् (२), एओङ् (३), ऐऔच् (४), हयवरट् (५), लण् (६), ञमङणनम् (७), झभञ् (८), घढधष् (९), जबगडदश् (१०), खफछठथचटतव् (११), कपय् (१२), शषसर् (१३), हल् (१४) इति प्रत्याहारसूत्राणि।

शाकटायनीयानीमानि सूत्राणि

अइउण् (१), ऋक् (२), एओङ् (३), ऐऔच् (४), हयवरलञ् (५), ञमङणनम् (६), जबगडदश् (७), झभघढधष् (८), खफछठथट् (९), चटतव् (१०), कपय् (११), शषस अं अः ≍क≍पर् (१२), हल् (१३) इति प्रत्याहारसूत्राणि।

---

१. सि० कौ० पृ० ३।　२. चा० व्या० पृ० १।

३. "वर्णसमाम्नायः क्रमानुबन्धोपादानः प्रत्याहारयन् शास्त्रस्य लाघवार्थः" इति। (शाकटायनामोघवृत्तौ १ तमे पृष्ठे)।

४. "एषा ह्याचार्यस्य शैली लक्ष्यते…………। आचार्यपदस्य व्यवहारो भाष्ये पाणिनये कात्यायनाय च भवति। अत्र तु पाणिनये आचार्यपदेन निर्देशः। महाभाष्ये ९५ तमे पृष्ठे)।

५. 'वृद्धिः' 'आदैच्' च पदस्यसाधुत्व प्रतिपादने वर्णितम्। "कृतमनयोः साधुत्वं कथम्? आदैचोऽप्यक्षरसमाम्नाय उपदिष्टाः" इति (म० भा० १।१।१)।

६. "नापि 'अइउण्' इति पाणिनीयप्रत्याहारसमाम्नायवत्" इति। (निरुक्तटीकायाः प्रथमे भागे १८६ तमे पृष्ठे)।

७. "पाणिनिप्रत्याहार इव महाप्राणझषाश्लिष्टो झलालं कृतश्चेति" (अमरटी० सर्वस्वे प्रथमे भागे १८६ तमे पृष्ठे)।

८. भाषावृत्त्यर्थविवृतेः प्रारम्भे।　९. तत्रैव १ तमे पृष्ठे।

१०. मनुस्मृतिटीका० १।१, पृ० १।　११. न्या० प्रथमे भागे ७५५ तमे पृष्ठे।

१२. नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्॥ (का० वृ०)

१३. येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥ इति (पाणिनिशिक्षायाम् १ तमे पृष्ठे)

१४. "इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि" (सि० कौ० पृ० २)

उपर्युक्तसङ्कलितसूत्रेषु पाणिनेश्चतुर्दश शाकटायनस्य च त्रयोदश सूत्राणि विद्यन्ते । उभयोर्व्याकरणयोः सूत्रेषु द्वैविध्यं दृश्यते । पाणिनीयानाम् ऋलृक् (२), हयवरट् (५), लण् (६), ञमङ् (८), घढधप् (९), खफछठथचटतव् (११), शषसर् (१३) इत्येतेषां सूत्राणां स्थाने शाकटायनस्य ऋक् (२), हयवरलञ् (५), झभघढधष् (८), खफछठथट् (९), चटतव् (१०), शषस अं अः ≍क≍पर् (१२) इमानि सूत्राणि सन्ति । नायं पक्षः शाकटायनस्य स्वोपज्ञम् । अपाणिनीये चान्द्रव्याकरणे[1] जैनेन्द्रे[2] चायं पक्षो दृश्यते ।

पाणिनीयेऽक्षरसमाम्नाये लृकारस्योपदेशो वर्तते । अत्र भगवता पतञ्जलिना महाभाष्ये 'ऋलृक्' इति सूत्रे लृकारोपदेशस्य हेतुरित्थं प्रतिपादितः—'लृकारोपदेशः क्रियते यदृच्छाशब्दार्थस्तावत्—यदृच्छया कश्चित् लृतको नाम । तस्मिन्नकच्कार्याणि यथा स्युः—दध्य्लृतकाय देहि,[3] मध्व्लृतकाय देहि, उदङ्ङ्लृतकोऽगमत्, प्रत्यङ्ङ्[4]लृतकोऽगमत् । चतुष्टयी शब्दानां प्रवृत्तिः—जातिशब्दाः, गुणशब्दाः, क्रियाशब्दः, यदृच्छाशब्दाश्चतुर्था इति ।

अशक्तिजानुकरणार्थः—अशक्त्या कयाचिद् ब्राह्मण्या ऋतक इति प्रयोक्तव्ये लृतक इति प्रयुक्तम् । तस्यानुकरणं ब्राह्मण्यालृतक इत्याह । प्लुत्याद्यर्थश्च—के पुनः प्लुत्यादयः ? प्लुतिद्विर्वचनस्वारिताः । क्लृप्तशिखः[5] । क्लृप्तः[6] । प्रक्लृप्तः[7] । प्लुत्यादिषु कार्येषु क्लृपेर्लत्वं सिद्धम् । तस्य सिद्धत्वादच्कार्याणि न सिध्यन्ति । तस्मात् लृकारोपदेशः क्रियते । अत्र भाष्यकृता महान् प्रयत्नोऽनुष्ठितः । सैषा महतो वंशस्तम्बाल्लट्वाऽनुकृष्यते[8] इत्यनेन सूचितं तेन । काशिकायाम्,[9] न्यासे,[10] पदमञ्जर्याम्,[11] प्रदीपे[12], प्रक्रियाकौमुद्याः प्रसादटीकायाञ्च[13] पक्षोऽयं दृश्यते । परिवर्तिना नागेशेनापि[14] पक्षोऽयं समर्थितः ।

शाकटायनस्याक्षरसमाम्नाये तु लृकारोपदेशो नास्ति । एतद्विषये तेन स्वोपज्ञामोघवृत्तावुक्तम्—'ऋ' इत्येव लृवर्णस्य ग्रहणम् । तयोरेकत्वं हि 'गुरुर्वै कोलनृत' (शा० २।३।२७) इति

---

१. 'हयवरलण्' 'शषस अं अः≍क≍पर्' इति शाकटायनस्य सूत्राणि, एभिः सूत्रैः सह साम्यमस्ति (चा० व्या० पृ० १) ।

२. 'हयवरट्' 'लण्' इत्यनयोः स्थाने 'हयवरलण्' इत्येवं सूत्रमस्ति (जै० व्या० पृ० ३) ।

३. इको यणचि (अ० ६।१।७७) इत्यनेन यणि ।

४. ङमो ह्रस्वादचि ङमुण्नित्यम् (अ० ८।३।३२) इत्यनेन ङमुडागमे ।

५. गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् (अ० ८।२।८६) इत्यनेन प्लुतः ।

६. अनचि च (अ० ८।४।४७) इत्यनेन द्वित्वम् ।

७. उदात्तादनुदात्तस्य स्वरितः (अ० ८।४।६६) इत्यनेन स्वरितः ।

८. महाभाष्ये ६४ तः—७३ पृष्ठपर्यन्तम् ।

९. का० वृ० २ तमे पृष्ठे ।   १०. न्यासे २७ पृष्ठतः ३० पृष्ठपर्यन्तम् ।

११. पदमञ्जर्याम् २७ पृष्ठतः २९ पृष्ठपर्यन्तम् ।   १२. प्रदीपे ७२ पृष्ठतः ७७ पृष्ठपर्यन्तम् ।

१३. प्रसादटीकायाम् १२ तमे पृष्ठे ।   १४. उद्द्योते ७२ पृष्ठतः—७७ पृष्ठपर्यन्तम् ।

लृ-ग्रहणात् प्रतिज्ञायते। तथा च 'ऋत्यकः' (शा० १।१।७५) इत्यादि लृकारोऽपि सिद्धं भवति[१]। अपि च 'ऋवर्णलृवर्णयोरेकत्वप्रतिज्ञानाद्दृतीति लृकारोऽपि गृह्यते'[२]।

शाकटायनव्याकरणे "ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्"[३] इति कात्यायनीयस्य वार्त्तिकस्यानुसारेण 'दध्य्लृतकाय दीयताम्' 'पितॄकारः' इत्यादिप्रयोगाणां सिद्धिः स्वीक्रियते पाल्यकीर्तिना; किन्तु 'क्लृप्तशिखा' इति प्रयोगे "एकदेशविकृतस्यानन्यत्वात् प्लुत्यादयः"[४] इति 'रवत् प्रतिषेधाच्च'[५] इति च सिद्धान्तयोरनुसारेण प्रतिषेधनिवृत्त्यर्थम् 'दूरादामन्त्र्यस्य गुरुर्वैकोलनृत' (शा० २।३।२७) इत्यस्मिन् सूत्रे लृकारस्य पर्युदासः स्वीकृतः पाल्यकीर्तिना। तेनोक्तम्—'लृकारग्रहणमनृदिति प्रतिषेधनिवृत्त्यर्थम्' इदमेव ज्ञापकम् 'ऋवर्णलृवर्णयोरभेदेन सङ्ग्रहणस्य'[६] इति चान्द्रे[७] जैनेन्द्रे[८] च पक्षोऽयं दरीदृश्यते।

नायं पक्षो युक्तः, शाकटायनव्याकरणे केवलं लौकिकशब्दानां सिद्धिर्भवति, यतः 'प्रक्लृप्तः' इत्यत्र स्वरितविधानार्थं किमपि सूत्रं नास्ति; पाणिनीये व्याकरणे तु लौकिकवैदिकयोः शब्दानां सिद्धिर्जायते। अतः पाणिनेर्लृकारस्योपदेशस्य पक्षो युक्तं प्रतिभाति। तथा च प्रदीपे स्पष्टमुल्लिखितं कैयटेन—'वार्त्तिककारस्य लृकारप्रत्याख्यानं निष्प्रयोजनमित्याह'[९] इति।

तथा च पाणिनीयतन्त्रे महाभाष्ये भाष्यकारेण अयोगवाहानामुपदेशविषये पक्षत्रयमुपस्थाप्य विस्तरेण प्रपञ्चितम्। तत्रोक्तम्—'अयोगवाहानामट्सु णत्वम्' 'शर्षु जश्भावषत्वे' अथवा 'अविशेषेण संयोगोपधासंज्ञाऽलोऽन्त्यद्विर्वचनस्थानिवद्भावप्रतिषेधाः'[१०] इति। परञ्च शाकटायनेन भाष्यकारस्य "शर्षु जश्भावषत्वे' इति पक्षमाश्रित्य स्वकीये व्याकरणे 'शषस अं अः ᳵ क् ᳶ पर्' (प्र० सू० १२) इति प्रत्याहारसूत्रं विरचय्य वैशिष्ट्यं प्रदर्शितम्। अतो नायं स्वोपज्ञत्वं शाकटायनस्य। शब्दार्णवचन्द्रिकायां[११] पक्षोऽयं दृश्यते। हेमशब्दानुशासने 'अं अः ᳵ क ᳶ प शषसाः शिट्' (१।१।१६) इति सूत्रमस्ति। मलयगिरिशब्दानुशासने च 'अ० अः-ᳵ क- ᳶ प शषसाः शिच्' (प्र० सन्धौ १८) इति सूत्रं सूत्रितम्।

अथ प्रत्याहाराणां परिशीलनम्

पाणिनेरष्टाध्याय्यामेकचत्वारिंशत् (४१) प्रत्याहारा दृश्यन्ते। परञ्च वार्त्तिककारेण 'चयोः द्वितीयाः शरि पौष्करसादेरिति वाच्यम्' इति वार्त्तिकं विरचय्य 'चय्' प्रत्याहारः

---

१. शाकटायनामोघवृत्तौ १ तमे पृष्ठे।
२. तत्रैव १५ तमे पृष्ठे।
३. सिद्धान्तकौमुद्याम् १५ तमे पृष्ठे।
४. महाभाष्ये ७६ तमे पृष्ठे।
५. तत्रैव ७७ तमे पृष्ठे।
६. शा० अ० वृ० २।३।२७।
७. चा० व्या० 'गुरु एकैकम् अनृत वा' (६।३।११८) इति सूत्रे।
८. जै० व्या० 'अनृतोऽनन्तस्याप्येकैकस्य रोः' (५।३।९४) इति सूत्रे।
९. प्रदीपे ७७ तमे पृष्ठे।
१०. 'हयवरट्' (प्र० सू० ५) इति सूत्रे महाभाष्ये ९२–९४ तमयोः पृष्ठयोः।
१०. जैनेन्द्रव्याकरणस्य भूमिकायां श्रीमहादेवचतुर्वेदिद्वारा विरचिते 'दो शब्द' शीर्षके निबन्धे प्रत्याहारविचारप्रसङ्गः १४ तमे पृष्ठे।

स्वीकृतः। अपि च काशिकाकारेण 'ञमन्ताड्ङः' इति ञकारेणापि ग्रहणमस्य दृश्यते[1] इति विलिख्य ञम् प्रत्याहारोऽपि स्वीकृतः। किन्त्वयं प्रत्याहार उणादिसूत्रे दृश्यते। अत्रोक्तं तत्त्वबोधिनीकारेण ञमिति प्रत्याहारः। काशिकायां तु त्रिभ्य एव कणमाः स्युरित्युक्तम्, ञम् प्रत्याहारस्तु न स्वीकृतः। अष्टाध्याय्यां तस्य विषयाभावात्'[2] इति। काशिकायां त्वयं श्लोको वर्तते—

एकस्मान् ङञणवटा द्वाभ्यां षस्त्रिभ्य एव कणमाः स्युः।
ज्ञेयौ चयौ चतुर्भ्यो रः पञ्चभ्यः शलौ षड्भ्यः॥[3] इति।

अस्मिन् श्लोके ४१ प्रत्याहाराणां समावेशोऽस्ति। परञ्च विवेचनेनेदं प्रतीयते यत् पाणिनीये तन्त्रे त्रिचत्वारिंशत् प्रत्याहाराः समुपलभ्यन्ते। शाकटायने तु सप्तत्रिंशत् (३७) प्रत्याहारा दृश्यन्ते, किन्तु शाकटायनप्रक्रियासङ्ग्रहकारेणाधोलिखितश्लोके ३८ प्रत्याहाराणामुल्लेखः कृतः—

एको णङ्टवाद् ग्राह्यो द्वौ ञशात्कयतस्त्रयः।
चत्वारश्चमरात् षट् स्युर्यथायोगं षलाद् बुधैः[4]॥ इति।

अमोघवृत्तावपि प्रत्याहारगणनाप्रसङ्गे ३८ प्रत्याहाराणां गणना स्वीकृता। तत्रोल्लेखोऽस्ति—मकारस्य—'छव्यम्यप्रशानः' (शा० १।१।१५०) इत्यकारेण, 'हलो यमि यमो वा' (शा० १।१।१३२) इति यकारेण, 'ञमोऽङः इति ञकारेण' इति त्रयाणां प्रत्याहाराणामुल्लेखः। परञ्च शाकटायनव्याकरणे 'ञमोऽङः' इति सूत्रं न दृश्यते। अपि च ञम्प्रत्याहारस्यापि प्रयोगो न दरीदृश्यते। अतः शाकटायनप्रक्रियासङ्ग्रहकारस्य कथनं नोचितं प्रतिभाति।

पाणिनीयशाकटायनयोः प्रत्याहाराणां वर्गीकरणमित्थमस्ति—

पाणिनीयव्याकरणसदृशाः शाकटायनव्याकरणप्रत्याहाराः

शाकटायनीयाः	पाणिनीयाः
अण् (१।१।८०)	अण् (१।१।५१)
अक् (१।१।७५)	अक् (६।१।१०१)
इक् (१।१।७२)	इक् (१।१।३)
उक् (१।२।१४४)	उक् (४।१।५)
एङ् (१।१।२०)	एङ् (६।१।९४)
अच् (१।१।४५)	अच् (१।१।५७)
इच् (२।२।३)	इच् (६।३।६८)
एच् (१।१।७१)	एच् (६।१।७८)
ऐच् (१।१।१९)	ऐच् (१।१।१)
इञ् (१।२।६०)	इण् (८।३।५७)

---

१. 'जमङणनम्' (प्र० सू० ७) इति सूत्रे काशिकायाम् ४ पृष्ठे।
२. तत्त्वबोधिन्यां 'ञमन्ताड्डः' (उ० ११९) इति सूत्रे।
३. काशिकायाम् ६ तमे पृष्ठे। ४. शा० प्र० सं० २ तमे पृष्ठे।

यञ् (१।१।७२)	यण् (६।१।७७)
अम् (१।१।१५०)	अम् (८।३।६)
यम् (१।१।१३२)	यम् (८।४।६४)
ङम् (१।१।१२३)	ङम् (८।३।३२)
ञम् ( )	ञम् (उ० सू० ११९)
जश् (१।१।१३६)	जश् (८।४।५३)
बश् (१।२।७६)	बश् (८।२।३७)
अश् (१।१।१५३)	अश् (८।३।१७)
हष् (१।१।१५७)	हश् (६।१।१४)
वष् (४।२।१३४)	वश् (७।२।८)
छव् (१।१।१५०)	छव् (८।३।७)
मय् (१।१।१०५)	मय् (८।३।३३)
खय् (१।१।११४)	खय् (८।३।६)
जर् (१।१।१३३)	झर् (८।४।६५)
खर् (४।१।७९)	खर् (८।४।५५)
चर् (४।१।७९)	चर् (८।४।५४)
शर् (१।१।११४)	शर् (७।४।६१)
जय् (१।१।१०९)	झय् (८।३।६२)
अल् (१।४।४७)	अल् (१।१।६५)
हल् (१।१।१३२)	हल् (१।१।७)
वल् (१।१।६४)	वल् (६।१।७६)
रल् (४।१।१५२)	रल् (१।२।२६)
जल् (१।२।७५)	झल् (८।२।२६)
शल् (१।१।११०)	शल् (३।१।४५)
जष् (१।१।१३६)	झश् (८।४।५३)
झष् (१।२।७६)	झष् (८।२।३७)
भष् (१।२।७६)	भष् (८।२।३७)

शाकटायनस्य पाणिनेरपेक्षया विशिष्टः प्रत्याहारः

शाकटायनीयः	पाणिनीयः
क्षट् (४।१।६३)	(६।४।१२०-२१–२२,२६)

पाणिनीयतन्त्रस्य शाकटायनस्यापेक्षया विशिष्टाः प्रत्याहाराः

पाणिनीयाः	शाकटायनीयाः
अण् (१।१।६९)	(१।१।२)
अट् (८।४।६३, वा०)	(१।१।१४४)

यञ् (७।३।१०१)   (४।२।३४)
यय् (८।४।५८)   (१।१।१०६)
चय् (८।४।४८ वा०)   (१।१।११४)

पाल्यकीर्तिना स्वकीये व्याकरणे 'त्रप्फलिभजत्रझट्क्वज्ह्वादिदशिसिक्तस्याऽन्तर्हलोः' (शा० ४।१।६३) इति सूत्रे झट् प्रत्याहारः स्वीकृतः। तत्र पाणिनीये तन्त्रे 'अत एक हल्मध्येऽनादेशादेर्लिटि' (अ० ६।४।१२०) 'थलि च सेटि' (अ० ६।४।१२१) 'तॄफलभजत्रपश्च' (अ० ६।४।१२२), 'नशसददवादिगुणानाम्' (अ० ६।४।१२६) इति सूत्राणि सन्ति। अत्र शाकटायनेन पाणिनेः 'अनादेशादेः' इति पदस्य स्थाने व्याख्यारूपतया (अझट्क्वज्ह्) इत्यंशः स्वकीये सूत्रे सन्निवेशितः। काशिकायाम् 'अनादेशादेः' इत्यस्यार्थः कृतः 'आदेश आदिर्यस्याङ्गस्य नास्ति' इति। √कण्धातोर्लिटि द्वित्वे "कुहोश्चुः" इत्यनेनाद्यस्य ककारस्य स्थाने चकारादेशे सति 'चकण', √गण्धातोः 'जगण्', √भण्धातोः 'बभण्', √फण्धातोः 'पफण्', √हल्धातोः 'जहल्' इत्यादिष्वेकारादेशो न भवति।

शाकटायनेन तु प्रायस्तानि सर्वाण्येवाक्षराणि परिगणितानि, यत्र लिटि द्वित्वे सत्याद्याक्षरस्य स्थान आदेशो भवति। यथा—'झट्' प्रत्याहारः (झ, भ, घ, ढ, ध ख, फ, छ, ठ, थ) कवर्गाः अच् ह्वादिश्चेति। क्रमेणोदाहरणानि—झकारस्य—जझटतुः। अत्र झकारस्य स्थाने जकारादेशः, अत ऐत्वमभ्यासलोपश्च न भवतः। 'बभणतुः' अत्र भकारस्य बकारादेशः, अत्रापि तथैव ज्ञेयम्। जघसतुः, चखनतुः, डुढौके, दधावतुः, चकचतुः, पफणतुः, चछमतुः, टठलतुः, तथलतुरिति। इमान्युदाहरणानि झट्प्रत्याहारान्तर्गतानि विज्ञातव्यानि। क्वादौ तु—चकणतुः, जगदतुः इति। अत्र खघौ झट्प्रत्याहारान्तर्गतत्वात् पुनरुक्तौ भवतः। अजादिस्तु—इयजिथ, उवयिथ, ह्रादिः—जहसतुः, वादिः—ववणतुः, कृत्—'विशरतुः, निपरतुः इति।

एवं तावत् पञ्चाक्षरात्मके 'अनादेशादेक' इत्यस्य स्थाने व्याख्यात्मकः (अझट्क्वज्द) इति पञ्चाक्षरात्मकं व्याख्यारूपं पदजातं प्रयुक्तम्। 'नशसददवादिगुणानाम्' (अ० ६।४।१२६) इत्यत्र गुणस्थाने कृतशब्दस्य प्रयोगः कृतः।

पाणिनेः सूत्रचतुष्टयी समानविषयिणीति कृत्वा पाल्यकीर्तिना तेषां स्थाने कृतमेकं सूत्रं युक्तियुक्तम्। एकहल्मध्यत्वाभावात् त्रप्धातोरनाशादेरित्वात् पाणिनेर्मते शाकटायनमते च झडाद्यर्थत्वाद् √भज-√फलधात्वोः पाणिनेर्मते गुणत्वात्, शाकटायनमते च कृतत्वात्, √तॄधातोश्च निषेधः स्यादेतदर्थं पार्थक्येन सूत्रे तेषां धातूनां ग्रहणं कृतम्।

पाणिनेर्व्याकरणे चतुर्णां सूत्राणां पार्थक्यात् सर्वेषां संगतिः परस्परं करणीया भवति। शाकटायनव्याकरणे तु तेषां सर्वेषामेकसूत्रे ग्रथितत्वात् सौकर्यं वर्तते। पाणिनेः "एकहल्मध्ये" इत्यंशस्य 'असहाययोर्हलोर्मध्ये' इत्यर्थः कृतः काशिकायाम्। सूत्रांशे विचिकित्सा जागर्ति हलोर्मध्ये हलां मध्ये वेति। अतः शाकटायनेन स्पष्टार्थं काशिकावृत्तेः 'हलोर्मध्ये' इति व्याख्यायाः स्थाने 'अन्तः हलोः' इति परिपूर्यं सूत्रे सन्निवेशः कृतः।

एवं खलु निर्भरमनुशील्य पाणिनीयं व्याकरणं रचितं शाकटायनं व्याकरणं पाल्यकीर्तिना। पाणिनीयव्याकरणस्य ग्रन्थग्रन्थिभेदनार्थमिदं शाकटायनं व्याकरणं पाणिनीयवैयाकरणानां महते लाभाय भविष्यतीति मदीयो विश्वासः।

भगवता पाणिनिनाऽण्प्रत्याहारो द्विवारं पठितः । तत्र प्रथमस्तु समान एव, परञ्च द्वितीयस्याऽण्प्रत्याहारस्योपयोगः 'अणुदित्सवर्णस्य चाप्रत्ययः' (अ० १।१।६९) इति सूत्रे वर्तते । तत्र काशिकायां परेण णकारेण प्रत्याहारग्रहणम् । अण् गृह्यमाण उदिच्च सवर्णानां ग्राहको भवति, स्वस्य च रूपस्य प्रत्ययं वर्जयित्वेत्यर्थः[1] कृतः काशिकाकारेण ।

शाकटायनेन तु महाभाष्यकारस्य[2] 'अणुदित्सवर्ण' (अ० १।१।६९) इति सूत्रे जातिपक्षेऽण्ग्रहणप्रत्याख्यानपक्षमाश्रित्य "उतास्वः" (शा० १।१।२) इति सूत्रं विरचय्य महद् वैशिष्ट्यं प्रदर्शितम् । तथा च पाणिनीयतन्त्रे अट्, यञ्, यय्, यर्, चय् इति शाकटायनस्यापेक्षया विशिष्टप्रत्याहारा दृश्यन्ते । तत्र सूत्राणि—"शश्छोऽटि" (अ० ८।४।६३), 'अतो दीर्घो यञि' (अ० ७।३।१०१), 'अनुस्वारस्य ययि परसवर्णः' (अ० ८।४।५८), 'यरोऽनुनासिकेऽनुनासिको वा' (अ० ८।४।४५), 'चयोर्द्वितीयाः शरि पौष्करसादेः' (अ० ८।४।४८ वा०) इति । शाकटायनेन तु 'छत्वममितच्छ्लोकेन तच्छ्मश्रुणोति प्रयोजनम्' (अ०८।४।६३वा०) इति वार्त्तिकस्यानुसारेण 'शश्छोऽमि' (शा० १।१।१४४) इति सूत्रं विरचय्याऽट्प्रत्याहारस्याऽम्प्रत्याहारे निवेशः । अपि च शाकटायनेन यय्-यर्प्रत्याहारौ हल्प्रत्याहारे निवेश्य 'हलोऽनुनासिकेऽनुनासिकस्वः' (शा० १।१।१०६) इति सूत्रं विरचय्य लाघवमाश्रितम् । तथा च चय्-प्रत्याहारं खय्-प्रत्याहारे निवेश्य 'खय् खयश्शरि वा' (शा० १।१।१४) सूत्रं विरचितम् । एवञ्च यञ्-प्रत्याहारकृते 'अतो येयः' (अ० ७।२।८) इति सूत्रे 'पचेत्' 'यजेत्' इति प्रयोगयोः 'अतो दीर्घो यञि' (अ० ७।३।१०१) इत्यनेन दीर्घत्वं प्राप्नोति, तत्र 'येन नाप्राप्ति न्यायेन दीर्घस्यैव बाधकः' इति महाभाष्यकारस्य पक्षमाश्रित्य पाल्यकीर्तिना 'आद्नव्यतः' (शा० ४।१।३४) इति सूत्रे 'मकारादौ वकारादौ च' निवेश्य वैशिष्ट्यं प्रदर्शितमिति ।

● ● ●

---

१. का० वृ० १।१।६९।

२. 'अणुदित्' (अ० १।१।६९) इति सूत्रे महाभाष्ये ३७३ तमे पृष्ठे ।

श्रीकृष्णकथायाः पृष्ठभूमिसमीक्षा

डॉ० श्रीकृष्णमणित्रिपाठी
पुराणेतिहासविभागाध्यक्षचरः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

यत्पादपद्ममनिशं प्रणिपत्य भक्त्या
भक्ता भवन्ति भुवने परिपूर्णकामाः ।
कन्दर्पकोटिशतमोहनमद्भुतं तं
राधापतिं सकललोकगुरुं नमामि ॥

निखिललोककल्याणविधायकोऽपौरुषेयो वेदो हि विश्वस्मिन् सर्वतोऽधिकः प्राचीनः सर्वाभ्यर्हितो मान्यश्च प्रमाणमभिहितमस्ति शास्त्रकारैः । तथा हि गर्गसंहितायां वचनम्—'वेदवाक्यं ब्रह्मवचः प्रमाणं हि महीतले ।' अतो वासुदेवश्रीकृष्णकथाया उद्गमस्यान्वेषणाय वेद एवाश्रियते सर्वैर्मनीषिभिरिति निर्विवादः पन्थाः ।

यद्यपि वासुदेवशब्दो न संहितायाम्, न वा ब्राह्मणे, नाप्यारण्यक उपलभ्यते । अथापि केचन वैष्णवा विद्वांसो वेदत एव श्रीकृष्णकथायाः स्रोतोऽङ्गीकुर्वते । भगवान् श्रीकृष्णः 'अयं वा कृष्णो अश्विना हवते वाजिनीभिः' इति मन्त्रे ऋषिरूपेण व्यवहृतोऽस्ति । तेनैव पौराणिक-श्रीकृष्णस्य तादात्म्यस्थापनाय वैष्णवा विपश्चितः सारोपं प्रयतन्ते । यद्यपि श्रीकृष्णकथाया बीजं मूलरूपेण वेदेष्वनभिहितमस्ति, तथापि यथा बीजाद् वृक्षस्य विकासः पल्लवनं परिवर्द्धनं चोत्तरोत्तरं जायते, तथैव श्रीकृष्णकथाया बीजस्योत्तरोत्तरं विकासो ब्राह्मणारण्यकोपनिषन्महाभारतपुराणकाव्यनाटकादिग्रन्थेषु जातः, निरन्तरं जाजायते यास्यति च ।

वैदिकवाङ्मये दृष्टिपातेन श्रीकृष्णकथाया बहूनां पात्राणामुल्लेखो यत्र तत्रावाप्यते । यथा गो-गोप-व्रज-वृषभानु-राधा-रोहिणी-कृष्णार्जुनादीनां लीलासम्बन्धिनश्च शब्दा अपि दरीदृश्यन्ते । अतो वैदिकसाहित्ये श्रीकृष्णलीलाविषयकप्रसङ्गेभ्यस्तत्कथायाः प्रचुरं प्रमाणं प्राप्यते । पूतना-स्तनचोषणोलूखलबन्धन-यमलार्जुनोद्धार-गोवर्द्धनधारणादीनां सङ्केतो वैदिकमन्त्रेषु समुपलभ्यते । अतो विद्वांसः श्रीकृष्णलीलाया बीजं वेदमन्त्रेषु सोपष्टम्भं समर्थयन्ति । यथा—'त्वं नृ चक्षा वृषभानुपूर्वी कृष्ण स्वने अरुणो विभाहि'[1] इति ऋक्संहितायां भगवतः श्रीकृष्णस्य चर्चा विद्यते । तथैव 'विष्णुगोपा परमं पाति पाथः, प्रिया धामान्यमृता दधानः' (३।५५।१०) इति मन्त्रे गोरूपस्य विष्णोर्वर्णनप्रसङ्गे गोरूपधारिणो भगवतः श्रीकृष्णस्य स्मरणं कृतमस्ति । 'तावान् वास्तून्युश्मसिगमध्यै यत्र गावो भूरि भृङ्गा जायासः'[2] इति मन्त्रः सायणेन कृष्णकथापरत्वेन व्याख्यातः । यास्केनापि निरुक्ते 'तदुरुगायस्य विष्णोर्महामतेः परमं पदं परार्ध्यस्थमवभाति भूरि'

---

१. ऋ० सं० ३।१५।३; २. ऋ० सं० १।१५।१६ ।

(२।६) इत्युक्तम्। गोलोकवर्णनपरत्वेनापि विद्वद्भिरयं मन्त्रो व्याख्यायते—'वृष्णस्य वर्षणशीलस्य विष्णोः कृष्णस्योरुगायस्य तत्परमं पदम्' इति। तत्रैव भूरिशृङ्गा गाव आयासो गमनशीलाः सन्ति। तत्रैव शोभनानि वस्तूनि सन्ति।

पुराणेषु गोलोकस्य स्पष्टतो विष्णोर्नित्यधामत्वमुक्तमस्ति। तेन तत्र बृहच्छृङ्गा गमनशीला मुख्या एव गावो गृह्यन्ते। उरुगायस्य विष्णोरादित्यमण्डलमपि स्थानम्। तेन तत्र रश्मय एव गाव उच्यन्ते।

मन्त्रभागवते प्रोक्तमस्ति यदन्यपरत्वेन प्रतीयमाना अपि मन्त्रा यथा कृष्णलीलापरत्वेन योज्यन्ते, तथैव राधा-राधस्-शब्दावपि योजनीयौ। तथा चान्यपरत्वेन प्रयुक्ता अपि शब्दाः प्रसङ्गानुसारेणान्यपरा योजयितुं शक्यन्ते। तस्मात् परमार्थदृष्ट्या—'वेदैश्च सर्वैरहमेव वेद्यः'[1] इति गीतायां भगवद्वचनानुसारं वैदिकमन्त्राणां राधाकृष्णपरत्वयोजनं समुचितमेव प्रतिभाति।

पुनः 'त्रीणि विचक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन्'[2] इति ऋङ्मन्त्रे न केवलं बालरूपेण, अपि तु तस्य युवरूपमेवाधिकांशतो दृष्टिगोचरीभवति। यतो हि सर्वशक्तिमत्तायाश्च शक्तेः साधनं मुख्यमुद्देश्यं वर्तते। एवं सामवेदेऽपि हरेर्वामनलीलागोपाललीलादीनां बीजं निहितमस्ति 'शिशुयज्ञानां हरिं भजति'[3] इत्यादि।

वेदेषु प्रसिद्धस्य पुरुषसूक्तस्य निरतिशयानन्दरूपे परात्परतरे परमात्मनि तात्पर्यमवसीयते। वेदेषु प्रसिद्धस्य पुरुषसूक्तस्य पृथ्वीसूक्तस्य च परमं तात्पर्यं मृग्यमाणं पूर्णशान्तिसम्पन्ने भगवत्येव प्रतितिष्ठति। अत एव स्पष्टतः प्रोक्तं श्रीमद्भागवते—

सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत्।
तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति॥ (२।६।१४)।

तथा च सर्वस्य सूक्तजातस्य निरतिशयानन्दस्वरूपे परात्परतरे परमात्मनि तात्पर्यमवसीयते। तदेव च राधायाः कृष्णस्य च प्रेम्णोरेकं पिण्डीभूतं रूपं सामरस्यमुपगतं सत् पूर्णमग्रं भूत्वा विश्वस्मिन् विलसति।

अत एव गर्गसंहिताया मथुराखण्डे भगवान् श्रीकृष्णो दुग्धधावल्यवत् स्वस्मिन् राधायाश्चाभेदभावं प्रतिपादयन् प्रेम्णः सर्वोत्कृष्टत्वमुक्तमस्ति।

मा शोकं कुरु राधे त्वं त्वत्प्रीत्याहं समागतः।
आवयोर्भेदरहितं तेजश्चैकं द्विधा जनैः॥

यथा हि दुग्धधावल्ये तथाऽऽवां सर्वदा शुभः।
यत्राहं त्वं सदा तत्र विश्लेषो नहि चावयोः॥

पूर्णं ब्रह्म परं चाहं तटस्था त्वं जगत्प्रसूः।
विश्लेष आवयोर्मध्ये मृषा ज्ञानेन पश्च सत्॥[4]

---

१. श्रीमद्भगवद्गीता; २. ऋ० सं० १।२२।१८; ३. सामवेदः १३।४।
४. श्रीमद्भागवतम्—१।२०।१८-२०।

गुणेषु सक्तं किल बन्धनाय रक्तं मनः पुंसि च मुक्तये स्यात् ।
मनो द्वयोः कारणमाहुराराद् जित्वाऽथ तत् कौ विचरेदसङ्गः ॥

सर्वं हि भावो मनसः परात्परं न ह्योकतो भामिनि जायते ततः ।
प्रेमैव कर्तव्यमतो मयि स्वतः प्रेम्णा समानं भुवि नास्ति किञ्चित् ॥[1]

'रसो वै सः, रसं लब्ध्वैव ह्यानन्दी भवति'[2] इत्यादिश्रुत्यनुसारं रसात्मकः परमात्मैवानन्दवान् । अतोऽद्वये परमात्मन्येव भवति वास्तविक आनन्दलाभः । अतः पूर्णतमे परमात्मनि स्वाभाविकं प्रेमैव सर्वोत्कृष्टं साधनम् । सत्त्वगुणप्रधाने मानवे एवं सहजस्य प्रेम्णः प्राखर्यमभिव्यज्यते, अतो विश्वस्मिन् वस्तुभूतं मनुष्यत्वमेव तत्त्वमङ्गीक्रियते विशेषज्ञैः । राधाकृष्णयोर्विकासादेव प्रेमलीलाया विलासः समुज्जृम्भते ।

राधाकृष्णौ स्तः प्रकृतिपुरुषौ 'स एकाकी न रमते, द्वितीयमैच्छत्, तेन तदेव जायापत्यादिरूपेण विकसति' इति श्रुत्यनुसारम् । तत्र सह [illegible]ायाः प्रेमधाराया विकासानन्तरं सर्वत्र परिस्फुरति प्रेम्णो धारायाः प्रवाहः । एवं श्रुत्युक्तं सर्वप्राणिप्रेमास्पदमेकमेवात्मतत्त्वं गौर-श्यामज्योतिरात्मना विश्वस्मिन् विलसति । सौन्दर्यसारसर्वस्वो भगवान् श्रीकृष्णोऽस्ति रसः, राधिका चास्ति रतिः । तत्सम्पर्कें विहरन् स वंशीस्वनेन सर्वान् जीवान् विमोहयति ।

त्रीणि श्रुति-स्मृति-पुराणानि सन्ति ज्ञानानां साधनानि, तेषामाश्रयेणैव राधाकृष्णयोर्वास्तविकं स्वरूपं निर्णेयम् । शास्त्रेषु श्रुतिस्मृत्योर्विप्राणां नेत्ररूपत्वं पुराणानाञ्च हृदयरूपत्वं नितरां प्रसिद्धम् । हृदयसत्त्वे नेत्रयोरभावेऽपि कार्यं प्रचलत्येव, किन्तु हृदयाभावे ते नेत्रे द्वे अपि निरर्थके एव भवतः । तत्रैकेन रहितः काणः, द्वाभ्यां हीनोऽन्धः प्रोच्यते । पुराणानभिज्ञश्च पुमान् हृदयशून्यो भवति । तथाहि—

श्रुतिस्मृती उभे नेत्रे पुराणं हृदयं स्मृतम् ।
एकेन हीनः काणः स्याद् द्वाभ्यामन्धः प्रकीर्तितः ॥
पुराणहीनाद् हृच्छून्यात् काणावन्धौ क्वचिद् वरौ ।

अतः श्रुति-स्मृति-पुराणानां समन्वयेनैव राधाकृष्णयोः स्वरूपनिर्णयः समुचितः । तदाश्रयेणैव महाकाव्येषु नाटकेषु च तत्स्वरूपं प्रदर्शनीयम् । इतिहासपुराणानामाश्रयेणैव काव्यं निर्मातव्यमिति कविसम्प्रदायः । तस्मात् श्रुति-स्मृति-पुराणेषु राधाकृष्णयोर्वास्तविकं स्वरूपं विस्तरत उपवृंहितम् । तदाश्रयैः काव्यैर्नाटकैश्च तदुपवर्णितम् । वेदोपनिषदादिभिर्विविधतर्कमीमांसाद्युपवृंहितैः प्रतीतमेव परमेश्वरतत्त्वं पुराणेषु राधाकृष्णरूपेण वर्ण्यते । दार्शनिकैरागमिभिश्च वस्तुतत्त्वमेव परिष्कृतं प्रदर्श्यते, न तु निर्मूलम् । अत एव च श्रीमद्भागवतस्य प्रथमे स्कन्धे गूढार्थेषु या भगवत्कथोपवर्णिता, सैव सत्कथा गूढार्थवादिभिर्विद्वद्भिः सम्यग् विज्ञायोद्घाट्यते । तथाहि सूतशौनकसंवादे सूत आह—

स वा अयं सख्यनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः ।
य एक ईशो जगदादिलीलया सृजत्यवत्ति न तत्र सज्जते ॥

---

१. श्रीमद्भागवतम्—१।२०।२५, २. श्रीमद्भागवतम्—१।१०।३४।

तस्माद् वेदोपनिषदादिभिर्वर्णितैव रामकृष्णकथापुराणेषूपबृंहितेति निर्विवादम्।

श्रीरामकृष्णयोर्लीलानां लोकप्रियतायै प्राक् प्राचीनभारते नाटकीयप्रदर्शनानां प्रचलनमासीत्। ततो विद्वद्भिर्लेखनद्वारा तत्स्वरूपमुपस्थापितम्।

श्रीरामस्य कथाया उत्पत्तौ विकासे च विविधैर्विद्वद्भिर्विस्तृताः सामग्र्यः प्रस्तुताः सन्ति, यत्र नित्यमभिनवानां तथ्यानां स्फुरणं जायते। कृष्णकथाया विचारकाणां मनीषिणां कृष्णकथायां तावत्यः सूक्ष्मा दृष्टयो न गताः, यावत्यो रामकथायामुपगताः। रामकथायाः साहित्यस्यावलोकनेन ज्ञायते यद्रामकथा कृष्णकथापेक्षया लोकेऽत्यन्तं लोकप्रियाऽस्ति। श्रीरामस्य मर्यादापुरुषोत्तमत्वे विद्वद्भिर्न कुत्राप्यवहेलना कृता, किन्तु कृष्णकथायाः शृङ्गारिकरूपत्वमभिव्यज्य तस्य परब्रह्मस्वरूपत्वमाच्छादितम्। यत्र तत्र श्रीकृष्णस्य ब्रह्मस्वरूपीभयाचर्चाया विद्यमानत्वेऽप्यधिकांशग्रन्थेषु तस्य शृङ्गारिकः पक्ष एवाधिको लोकप्रियो जातः। यतो हि प्राकृतानां मानवानां कृते तस्य तदेव स्वरूपममीष्टमस्ति। वस्तुतो भगवतः श्रीकृष्णस्य विराट्स्वरूपावहेलनं स्मृतमस्ति, किन्तु पुराणानां सन्दर्भे एव जयदेवकविरूपगोस्वामिप्रभृतिभिर्निर्मितेषु कृष्णकथाश्रितकाव्यनाटकेषु तस्य शृङ्गारिकस्वरूपस्यैव विकासो दरीदृश्यते।

वैदिका विद्वांसः प्रतीकात्मकार्थकरणे पक्षपातिनः सन्ति। अतो वैदिका महर्षयो यज्ञहवनादिसमयेषु देवानां सादरमाह्वानं कुर्वन्ति, तथा प्रतीकात्मकशैलीषु भगवतोऽलौकिकं रूपं वर्णयन्ति। राधाकृष्ण-गोप-गोपी-पार्थप्रभृतीनां नाम्ना सम्बन्धो न केवलं कृष्णलीलया सहैवास्ते, प्रत्युत ज्योतिषसम्बन्धिभिर्नक्षत्रादिभिरपि वर्तते। यथा—(क) 'स्तोत्रं राधानां पते' (ऋ० वे० १।३।५), (ख) 'गवामपवृजं वृधि' (ऋ० वे० १।१०।७), (ग) 'दासपत्नीरधिगोपा अतिष्ठन् निरुद्धा' (ऋ० वे० १।३२।११), (घ) 'त्वं नृचक्षा वृषभानुपूर्वी' (अ० वे० ३।१५।), (ङ) 'त्वमेतदवधारय कृष्णासु रोहिणीषु' (ऋ० वे० ८।९३।१३), (च) 'राधे विशाखे सुहवानुराधा' (अ० वे० १९।७।३), (छ) 'कृष्णरूपाण्यर्जुनविभोमये' (अ० वे० १०।२१।३), (ज) 'कृष्णं त एम रूशतः' (अ० वे० ४।७।२) इत्यादिः।

ऋग्वेदस्यैकस्मिन् मन्त्रे यमुनाया गवां चोल्लेखो विद्यते, यः कृष्णसाहित्यस्य कृते महत्त्वपूर्णं वरीवर्ति 'यमुनायामधि श्रुतमुद्राधो गव्यं मृजे' (ऋ० वे० ५।१२।१७)।

वेदे पृथ्वी कृष्णा प्रोक्ताऽस्ति, सूर्यमण्डलमपि कृष्णमुक्तमस्ति, शतपथब्राह्मणे चन्द्रोऽपि कृष्णः कथितोऽस्ति। तद्यथा—'चन्द्रमा वै ब्रह्मा कृष्ण'[1]। निरुक्तमपि त्रीन् पृथ्वी-सूर्य-चन्द्रमसः कृष्णान् मनुते। शतपथब्राह्मणे यज्ञोऽपि कृष्ण एव प्रोक्तो वर्तते—'यज्ञो हि कृष्णः'[2]। वेदे श्रीकृष्णः सौरमण्डलेन सह सम्बद्धो वर्तते। सूर्यमण्डले व्यावहारिककार्याणि सिध्यन्ति, अतः श्रीकृष्णः श्यामतेजोऽस्ति, तथा राधा गौरतेजो विद्यते।

ऐतिहासिकपौराणिकाख्यानानुसारं धार्मिकोपास्यरूपेण पूर्वं प्रचलितानां समेषामीश्वरस्वरूपाणामन्तर्भावो भगवति श्रीकृष्ण एव क्रियते। वैदिकप्रधानदेवताया विष्णोर्गुणैरपि तादात्म्यं स्थापितमस्ति, विष्णुरेव वासुदेवकृष्णरूपेण महत्त्वपूर्णां भूमिकां प्रस्तौति। तथा चोक्तं भगवता व्यासदेवेन महाभारतस्य वनपर्वणि—

१. श० ब्रा०—१२।२।१।१७। २. तदेव—३।२।१।१८।

देवदेवो ह्यनन्तात्मा विष्णुः सुरगुरुः प्रभुः ।
प्रधानं पुरुषोऽव्यक्तो विश्वात्मा विश्वमूर्तिमान् ॥
स एव भगवान् विष्णुः कृष्णेति परिकीर्त्यते ।
अनाद्यनन्तमजं देवं प्रभुं लोकनमस्कृतम् ।
यं देवविदुषो गान्ति तस्य कर्माणि सैन्धव ।[1] (२७२।३१।७२१)

वेदेषु भगवतो विष्णोः सम्बन्धोऽजेयेन गोपेन सह वर्तते । यस्य पराजयो न कथमपि सम्भवति । अत्रापि गोपशब्दः श्रीकृष्णं विष्णुना सह सम्बध्नाति । अमरकोषेऽपि भगवान् विष्णुर्नारायणः श्रीकृष्णनाम्ना प्रोक्तो विद्यते । तथा च—'विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टर-श्रवाः । सूर्यमण्डलेन विष्णोः सम्बन्धस्य कारणं चरमोत्कर्षप्राप्तौ विष्णुद्वारा दुःखानामुन्मूलनं प्रतीयते । आदित्यः प्रकाशद्वारा अन्धकारमपनयति । तिमिराच्छादितायां पृथिव्यां हेमन्त-शिशिरयोः शैत्ये प्रकाशकारणं वसन्त उपतिष्ठते । अनेन समेषां सर्वदुःखमोचनकारणेन विष्णु-रादित्यदेवता मन्यते । गीतायाञ्च भगवान् कृष्ण आत्मानमादित्यं मन्यते 'आदित्यानामहं विष्णुः' गोशब्दस्यार्थं किरणमिति स्वीकारे कृष्णः सूर्यरूपो गोविन्दो निगद्यते ।

ब्रह्मसंहितानुसारं विष्णोः पदं गोलोकमुच्यते (३।२) । नृसिंहतापिन्युपनिषदोऽनुशीलनेन प्रतीयते यद् यो भगवान् षोड्शभिः कलाभिर्युक्तो विचित्रप्रकारकैस्तेजोभिर्व्याप्तो भवति, स एव भगवान् विष्णुर्नृसिंहः पुरुषोत्तमो वासुदेवो देवकीपुत्रश्च जायते ।

गोपालपूर्वतापिन्युपनिषद्यपि भगवान् विष्णुः परमदेवतागोपीजनवल्लभादिविशेषणै-र्विभूष्यते । तथाहि कः परमोदेवः, कुतो मृत्युर्बिभेति, कस्य विज्ञानेनाखिलं विज्ञातं भवति, केनेदं विश्वं संसरतीति मुनीनां संप्रश्ने ब्रह्मदेव उवाच---कृष्णो वै परमं दैवतम्, गोविन्दान्मृत्युर्बिभेति । गोपीजनज्ञानेनैतद्विज्ञातं भवति, स्वाहेदं विश्वं संसरतीति तस्मात् कृष्ण एव परमो दैवतं ध्येयम् 'तं यजेत्, तं रसयेत्, तं भजेत्' । तदिह श्लोका भवन्ति—

सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम् ।
द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम् ॥
गोपगोपीगवां पीतं सुरद्रुमतलाश्रितम् ।
दिव्यालङ्करणोपेतं रत्नपङ्कजमध्यगम् ॥
कालिन्दीजलकल्लोलसङ्गिमारुतसेवितम् ।
चिन्तयन् तेजसा कृष्णं मुक्तो भवति संसृतेः ॥

गोपालोत्तरतापिन्युपनिषदः प्रारम्भे च कामासक्तानां व्रजवनितानां गोपालकृष्णस्य चोल्लेखो वरीवर्ति—एकदा व्रजस्त्रियः सकामाः शर्वरीमुषित्वा सर्वेश्वरं गोपालं कृष्णमूचिरे । तासां मध्ये हि श्रेष्ठा च गोपी गान्धर्वी प्रोक्तास्ति श्रेष्ठा गान्धर्वी । अपि च—

युगानुवर्तिनो लोका यजन्तीह सुमेधसः ।
गोपालं सानुजं कृष्णं रुक्मिण्या सह तत्परम् ॥

---

१. म० भा० वनपर्वणि—२७२।३१-३२ । २. ऋ० सं० १।२२।१८ ।

कृष्णोपनिषदि सविस्तरमध्यात्मरूपकाणां वर्णनं विद्यते—इदं शरीरं हि व्रजभूमिः, इन्द्रियाणि गावः, कश्यप उलूखलः, अदिती रज्जुः, लोभक्रोधादयो दैत्याः, तत्रत्या द्रुमास्तापसाः, ब्रह्मा यष्टिका; रुद्रो वेणुः, इन्द्रः शृङ्गम्, शेषनागो बलरामः, श्रीकृष्णः शाश्वतं ब्रह्म, स्त्रियश्च ब्रह्मरूपा उपनिषदः, ऋचः चाणूरादयो द्वेषादयः, कंसः कलिः, सुदामा शमः, अक्रूरोद्धवादयः सत्यादयः स्मृताः सन्ति—

देवकी ब्रह्मपुत्रा सा या वेदैरुपगीयते ।
निगमो वसुदेवो यो वेदार्थः कृष्णरामयोः ॥
स्तुवते सततं यस्तु सोऽवतीर्णो महीतले ।
वने वृन्दावने क्रीडन् गोपगोपीसुरैः सह ॥
गोप्यो गावः ऋचस्तस्य यष्टिका कमलासनः ।
वंशस्तु भगवान् रुद्रः शृङ्गमिन्द्रः सगोसुरः ॥
गोकुलं वनवैकुण्ठं तापसास्तत्र ते द्रुमाः ।
लोभक्रोधादयो दैत्याः कलिकालतिरस्कृतः ॥
गोपरूपो हरिः साक्षाद् मायाविग्रहधारिणः ।
शेषनागोऽभवद्रामः कृष्णो ब्रह्मैव शाश्वतम् ॥
अष्टावष्टासहस्रेऽब्दे शताधिन्यः स्त्रियस्तथा ।
ऋचोपनिषदस्ता वै ब्रह्मरूपा ऋचः स्त्रियः ॥
द्वेषश्चाणूरमल्लोऽयं मत्सरो मुष्टिको जयः ।
दर्पः कुवलयापीडः गर्वो रक्षः खगो बकः ॥
अघासुरो महाव्याधिः कलिः कंसः स भूपतिः ।
शमो मित्रः सुदामा च सत्याः क्रूरोद्धवादयः ।
यः शृङ्गः स स्वयं विष्णुर्लक्ष्मीरूपो व्यवस्थितः ॥ (८-१६)

नारायणोपनिषदि देवकीपुत्रस्योल्लेखो विद्यते । तत्र स मधुसूदनः पुण्डरीकाक्षः, विष्णुः तथाच्युतः कथितोऽस्ति—

ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः ।
ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युतः ॥

वासुदेवोपनिषदि वा वासुदेवभक्तानां कृते खड्गचक्र-गदा-पद्मधारिणो द्वारिकावासिनः पुण्डरीकाक्षस्य गोविन्दस्य ध्यानमत्यावश्यकमुक्तमस्ति । गोपीचन्दनधारणस्योर्ध्वपुण्ड्रस्य च महन्महत्त्वमुक्तमस्ति—

शङ्ख-चक्र-गदापाणे द्वारिकानिलयाच्युत ।
गोविन्द पुण्डरीकाक्ष रक्ष मां शरणागतम् ॥
ब्रह्मरन्ध्रे भ्रुवोर्मध्ये हृदये चिद्रविर्हरिम् ।
गोपीचन्दनमालिप्य हरिं ध्यात्वाप्नुयात् परम् ॥
ऊर्ध्वं दण्डोर्ध्वरेताश्च ऊर्ध्वपुण्ड्रोर्ध्वयोगतान् ।
ऊर्ध्वं पद्ममवाप्नोति यतिरूर्ध्वचतुष्कवान् ॥

राधोपनिषदि च श्रीराधायाः स्वरूपस्य वर्णनेन सह भगवान् श्रीकृष्णः परमो देवः प्रोक्तोऽस्ति, तथा राधा तस्याह्लादिनी शक्तिर्वर्णिताऽस्ति ।

एवं वैदिकवाङ्मयस्यानुशीलनानन्तरं भगवतः श्रीकृष्णस्य जीवनवृत्तान्तचित्रणं महाभारते सम्यगुपलभ्यते । तत्र हरिनारायणयोरेकं रूपं प्रोक्तमस्ति । यो नरस्तथा हरिरस्ति स एव नारायणो निगदितः—

नरस्त्वमसि दुर्धर्षं हरिर्नारायणो ह्यहम् ।
काले लोकमिमं प्राप्तौ नरनारायणावृषी ॥
अनन्यः पार्थमत्तस्त्वं त्वत्तश्चाहं तथैव च ।
नावयोरन्तरं शक्यं वेदितुं भरतर्षभ ॥

महाभारतस्यादिपर्वणि भगवान् श्रीकृष्ण एवं चराचरस्यास्य जगत उत्पत्तिस्थाः कथितोऽस्ति । स हि परब्रह्मणोऽवतार उक्तो विद्यते । स एव लोकानामनुग्रहार्थं वसुदेवाद् देवक्यां मायामाध्यमेन प्रादुर्भूय जगतो हितं विधत्ते—

अनुग्रहार्थं लोकानां विष्णुर्लोकनमस्कृतः ।
वासुदेवस्तु देवक्यां प्रादुर्भूतो महायशाः ॥
अनादिनिधनो देवः स कर्त्ता जगतः प्रभुः ।
अव्यक्तमक्षरं ब्रह्म प्रधानं त्रिगुणात्मकम् ॥
आत्मानमव्ययञ्चैव प्रकृतिं प्रभवं प्रभुम् ।
पुरुषं विश्वकर्माणि सत्त्वयोगं ध्रुवाक्षरम् ॥ (६३।९९।१००)

शान्तिपर्वणि वासुदेवकथनस्य कारणमेवमुक्तमस्ति—

सर्वेषामाश्रयो विष्णुरैश्वर्यं विधिमाश्रितः ।
सर्वभूतकृतावासो वासुदेवेति चोच्यते ॥ (३३५।८७)

एतेन सम्यक् प्रतीयते यन्नारायण एव कालान्तरे वासुदेवात्मना परिणतः । अपि च धर्मराजेन पृष्टो भीष्मपितामहः पुरातनमितिहासं ब्रुवन्नुवाच- आदिनारायणः सर्वस्य जगत आत्मा चतुर्मूर्तिः सनातनो देवोऽस्ति । स्वायम्भुवमन्वन्तरस्य सत्ययुगे धर्मस्य पत्न्यां तस्य चत्वारोऽवतारा बभूवुः, ते च नरः, नारायणः, हरिः कृष्णश्च । तत्र नरनारायणौ बदरिकाश्रमे स्वर्णमये रथे स्थितौ परमं तपस्तेपतुः । हरिः कृष्णश्च धर्मान्तरे प्रवृत्तौ । एवमेक एव नारायणो धर्मवंश-परम्पराया विस्तराय चतुर्षु विग्रहेष्वाविर्भूतः—

नारायणो हि विश्वात्मा चतुर्मूर्तिः सनातनः ।
कृते युगे महाराज पुरा स्वायम्भुवान्तरे ॥
नरो नारायणश्चैव हरिः कृष्णः स्वयम्भुवः ।

उद्योगपर्वणि पृथिव्याः सुखप्रदानाय भगवान् विष्णुरेव कृष्णनाम्ना व्यवह्रियते । कृष्ण-नाम्नो निर्वचनमपि तत्रैवं दृश्यते—

कृषिर्भूवाचकः शब्दो णश्च निर्वृत्तिवाचकः ।
विष्णुस्तद्भावयोगाच्च कृष्णो भवति सात्वतः ॥ इति ७०।५ ।

वनपर्वणि दीर्घजीवी मार्कण्डेयो महामुनिर्महामायाया लीलादर्शनप्रसङ्गे प्रलयकाले समस्तं जगदात्मसात् कृत्वा वटवृक्षस्य पत्रे शयानं विष्णुमेव श्रीकृष्णं बालस्वरूपं मनुते—

यो हि देवो मया दृष्टः पुरा पद्मायतेक्षणः ।
स एव पुरुषव्याघ्रः सम्बन्धी ते जनार्दन ॥ इति (३।१८९।५२)
तेषां नारायणनरौ तपस्तेपतुरव्ययम् ॥
बदर्याश्रममासाद्य शकटे कनकामये ।
अत्र कृष्णो हरिश्चैव कारणान्तरसंस्थितः ॥ इति (३३४।८-१०)

अत एवोक्तम्—

करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि ॥

शान्तिपर्वणो भीष्मस्तवराजे भगवान् श्रीकृष्णो विष्णुरूपेण स्तुतो विद्यते—

विश्वकर्मन् नमस्तेऽस्तु विश्वात्मन् विश्वसम्भव ।
विष्णो विष्णो हरे कृष्ण वैकुण्ठपुरुषोत्तम ॥ (३८।५)

इति कथनान्तरं कुरुवृद्धो भीष्मपितामहो भगवतः श्रीकृष्णस्य गुणवर्णनपूर्वकं विष्णुस्वरूपमेवं निर्दिष्टवान् प्रदर्शितवांश्च तदैश्वर्यं विपुलं महत्तरम् । तथाहि—

क्षत्रियः क्षत्रियं जित्वा रणे रणकृतांवरः ।
यो मुञ्चति वशे कृत्वा गुरुर्भवति तस्य सः ॥ इति ।

अन्यच्च—

अस्यां हि समितौ राज्ञामेकमप्यजितं युधि ।
न पश्यामि महीपालं सात्वतीपुत्रतेजसा ॥
न हि केवलमस्माकमयमर्च्यतमोऽच्युतः ।
त्रयाणामपि लोकानामर्चनीयो महाभुजः ॥
कृष्णेन हि जिता युद्धे बहवः क्षत्रियर्षभाः ।
जगत्सर्वञ्च वार्ष्णेये निखिलेन प्रतिष्ठितम् ॥
तस्मात् सत्स्वपि वृद्धेषु कृष्णमर्चाम नेतरम् ।
एवं वक्तुं च चार्हस्त्वं मा ते भूद् बुद्धिरीदृशी ॥
ऋत्विग् गुरुस्तथाचार्यः स्नातको नृपतिः प्रियः ।
सर्वमेतद्धृषीकेशस्तस्मादभ्यर्चितोऽच्युतः ॥ इति (३८।७-२२)

गर्गसंहितायामपि परिपूर्णतमस्य विष्णोर्देवादीनां रक्षार्थं दैत्यानां वधार्थञ्च वसुदेवगृहे श्रीकृष्णरूपेणावतरणस्यास्ति चर्चा—

देवानां रक्षणार्थाय दैत्यानाञ्च वधाय हि ।
वसुदेवगृहे जातः परिपूर्णतमो हरिः ॥ (मा० ख० ६। ५)

अपि च—

यो विप्र देवश्रुतिसाधुधर्मरक्षार्थमद्यैव यदोः कुलेऽजः ।
जातोऽस्ति कंसादिवधाय योऽसौ तस्मै नमोऽनन्तगुणार्णवाय ॥ इति (७।४)

तत्रैव कंसं संबोध्य योगमाययाऽपि परिपूर्णतमस्य भगवतः श्रीकृष्णरूपेणावतरणस्य सूचना प्रदत्ता गोलोकखण्डे—

परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् स्वयम्।
जातः क्व वा स ते हन्ता वृथा दीनान् दुनोषि वै ॥ इति (१।११।५९)

एवं महाभारतस्य कियन्तः प्रसङ्गा भगवन्तं श्रीकृष्णमेवं मानवं वा प्रस्तुवन्ति। आश्वमेधिकपर्वणि अणुगीताया उत्तङ्कमुनिद्वारा शापप्रदानोद्योगः कृष्णस्य मानवत्वं सङ्केतयति[1]।

वनपर्वणि शान्तिपर्वणि च भगवतः श्रीकृष्णस्य बालस्वरूपस्य वृत्तान्तं विद्यते—

नैवं परे नापरे वा करिष्यन्ति कृतानि वा।
यानि कर्माणि देव त्वं बाल्ये एव महाबलः ॥
कृतवान् पुण्डरीकाक्षः बलदेवसहायवान्। इति।
(३।१२।४२½।१८।१९४।६६½)

सभापर्वणि चीरहरणसमये द्रौपदीद्वारा प्रयुक्तानि गोपीजनवल्लभ इत्यादीनि विशेषणानि श्रीकृष्णस्य युवावस्थां द्योतयन्ति। द्वारिकावासिश्रीकृष्णस्य नाम्नः प्रसङ्गः सर्वप्रथममादिपर्वणि द्रौपदीस्वयम्वरे समागतोऽस्ति। तथा कृष्णबलरामादीनां यदुवंशिनां तत्रोपस्थितेः चर्चा विद्यते आदिपर्वणि। श्रीकृष्णार्जुनौ पूर्वजन्मनि नरनारायणनामानौ धर्मस्य पुत्रौ प्रियसखायौ ऋषी च प्रोक्तौ स्तः—

आस्तां प्रियसखायौ नरनारायणावृषी ॥ (२२०।५)।

द्रोणपर्वणि च तदेव प्रोक्तमस्ति—

पूर्वदेवौ महात्मानौ नर-नरायणावुभौ ॥ इति (११।४१)।

वनपर्वणि द्वादशाध्याये श्रीकृष्णस्य विविधयोनिषु जन्मग्रहणस्य, असुरवधस्य यज्ञ-दान-तपःकरणस्य च वर्णनं विद्यते। तत्र श्रीकृष्ण ऐतिहासिकप्रसिद्धिप्राप्तमानवरूपेण विशिष्टबलाधानं कुर्वाणो जन्मग्रहणं कुरुते, अतो महाभारतानुसारं भगवान् श्रीकृष्ण एकः परमो योद्धा राजनीतिज्ञो व्यवहारकुशलः, तथा महायोगी सिध्यति। तत्र वासुदेवशब्दस्य विस्तृता व्याख्या कृताऽस्ति—

श्रुतं मे वासुदेवस्य नामनिर्वचनं शुभम्।
यावत्तत्राभिजानेऽहमप्रमेयो हि केशवः ॥
वासनात् सर्वभूतानां वसुत्वादेव योनितः।
वासुदेवस्ततो वेद्यो बृहत्त्वाद्विष्णुरुच्यते ॥

तत्रैव प्रजापतिद्वारा मानवयोनौ वासुदेवावतारग्रहणस्य परमेश्वरं प्रति प्रार्थना कृताऽस्ति। एवं च तत्र परमात्मा नारायणो विष्णुश्च प्रोक्तोऽस्ति, तथा वासुदेवेन सह तस्यैकत्वं च प्रतिपादितमस्ति। शान्तिपर्वणि श्रीकृष्णपरब्रह्मस्वरूपस्य सर्वाधिकं प्रकाशनं वरीवर्ति। तेन वासुदेवः परमात्मा सिध्यति। उक्तञ्च—

---

१. महाभारतम्—आ० प० १४।२६।१०-२७।

छादयामि जगद्विश्वं भूत्वा सूर्य इवांशुमान् ।
सर्वभूताधिवासश्च वासुदेवस्ततो ह्यहम् ॥ (१२।३३१।४१)
सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ।
ततोऽसौ वासुदेवेति विद्वद्भिः परिगीयते ॥

महाभारते च समुपलब्धा या सूर्यं प्रति श्रीकृष्णस्योपास्यभावना, सा तस्य मनुजत्वं साधयति । सत्राजिन्नामा गोपः सूर्यद्वारा प्राप्तं स्यमन्तकमणिं परिधाय यदा श्रीकृष्णस्य सुधर्मसभायामागच्छति, तदा तत्रत्याः सभासदोऽनुभवन्ति यत् सूर्यदेवो भगवन्तं श्रीकृष्णं साक्षात्कर्तुमुपतिष्ठते । प्रसङ्गेनानेनानुमीयते यद् भगवान् आदित्यः श्रीकृष्णं परमात्मानं मत्वा साक्षात्कर्तुं प्रायः प्रत्यागच्छति स्म ।

शान्तिपर्वणि धर्मराजो युधिष्ठिरः श्रीकृष्णस्तुतौ तं विष्णुं मनुते । पाणिनेरष्टाध्याय्यां वासुदेवस्योल्लेखो विद्यते । पतञ्जलेर्महाभाष्ये कंसवधबालिवधनामकयोर्नाटकयोरभिनये वासुदेवद्वारा कंसवधस्योल्लेखो विद्यते । तत्र हि पतञ्जलिः कृष्णवासुदेवयोरन्तरं न स्वीकुरुते । अतो विष्णुभावना कृष्णवासुदेवयोर्निहिताऽस्ति । एवं कंसवधनाटकानुसारं कंसवधकर्ता क्षत्रियो वासुदेव ऐतिहासिको वर्तते । तस्मात् कृष्णवासुदेवौ न भिन्नौ स्तः, तयोरैक्यस्य सर्वत्र दर्शनात् ।

तदनन्तरं सर्वप्रथमं नानाघाटशिलालेखे संकर्षणवासुदेवयोर्नाम समागतं विद्यते । बेशनगरस्य शिलालेखे गरुडध्वजस्य मूर्तिरङ्किताऽस्ति । ग्रीकहोलियोडर आत्मानं भागवतं मनुते । अतस्तदानीं वासुदेवस्य पूजा सुदूरे पश्चिमे प्रचलिताऽऽसीत् । एवं पाणिनि-पतञ्जलि-महाभारत-प्राचीनशिलालेखानामाधारेण पूर्वकाले वासुदेवस्यास्तित्वं विद्वद्भिर्मन्यते, तथा वासुदेवस्य भागवतधर्मेण सम्बन्धोऽपि स्वीक्रियते । घटनामके बौद्धसाहित्येऽपि वासुदेवो मथुराप्रदेशस्योत्तरभागनिवासी राजवंशसन्ततिर्निगदितोऽस्ति । वासुदेव इति श्रीकृष्णस्य गोत्रजं नामाऽस्ति । ललितविस्तरस्यैकादशाध्यायेऽपि श्रीकृष्णस्योल्लेखो विद्यते । पालिग्रन्थे निर्देशेऽपि वासुदेवस्य सत्ता स्थापिताऽस्ति । जैनग्रन्थकारा अपि नागनाथं श्रीकृष्णकालिकं कथयन्ति । गो० कृ० भाण्डारकर ऐतिहासिकदृष्ट्या गोपालकृष्णस्य सम्बन्ध आभीराणां बालदेवतया सह साधयति । आभीराणां बालदेवता-श्रीकृष्णस्योल्लेखो हरिवंशेऽपि प्राप्यते । एवं पद्मपुराणे भगवान् विष्णुः कथयति यन्ममाष्टमोऽवतार आभीरकुले भविष्यति ।[1]

मेगस्थनीजस्य कथनमस्ति यत् श्रीकृष्णस्य पूजा बुद्धकालात् पूर्वतः प्रचलिताऽऽसीत् । स मथुरापरिसरे भगवानपि मन्यते स्म ।

इत्थं समस्तवैदिकवाङ्मय-महाभारत-पाणिनेरष्टाध्यायी-पतञ्जलेर्महाभाष्य-बौद्ध-जैनवैदेशिकयात्रि-पालिग्रन्थानां पर्यालोचनया निष्कर्षो निस्सरति यद् वैदिको विष्णुरेव चरमावस्थायां श्रीकृष्णरूपेणोपस्थाय भागवतानां भक्तानामुपास्यदेवो जातः । स च समस्तेभ्यो देवेभ्यो विशिष्टः प्रदर्शितोऽस्ति । स एव हि देवशत्रुभिरसुरैः पीडितं लोकं समये समये चाविर्भूय परिपालयति । तदुक्तं श्रीमद्भागवते—

अन्ये चांशकलापुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे[2] ॥

१. पद्मपुराणम्—७।२८; २. श्रीमद्भागवतम्—१।३।२८ ।

एवं सत्यपि कृष्णकथायां वास्तविकं लोकानुरञ्जनकारि सर्वप्रियं स्वरूपं पौराणिके साहित्य एवोपलभ्यते। यत्र वासुदेव-श्रीकृष्णो भगवान् एको महान् ऐतिहासिको राजनीतिकः, सामाजिकः, धार्मिकः, सांस्कृतिकः, जनसेवकः, महान् योद्धा, शरणागतवत्सलः, लीलाविहारी, प्रणयी, महापुरुषः, शास्त्रसम्मतधर्मोपदेशकः सद्गृहस्थश्च प्रोक्तोऽस्ति। वासुदेवस्य एषामेवोदात्त-स्वरूपाणां स्थापना मुख्यतया श्रीमद्भागवत-विष्णुपुराण-पद्मपुराण-ब्रह्मवैवर्तादिपुराणेषु गर्ग-संहितायां च कृताऽस्ति।

वस्तुतः श्रीमद्भागवते राधाकृष्णयोः केलिक्रीडायाः परवर्तिस्वरूपं नोपलभ्यते, प्रत्युत व्रजे बाललीलाया एव माधुर्यमुपस्थापितमस्ति, किन्तु राधा-कृष्णयोः परवर्तिन्याः कल्पनायाः प्राञ्जलं रूपं ब्रह्मवैवर्ते, गर्गसंहितायां च समवाप्यते। अतो राधाकृष्णकथाया औचित्य-विचारस्य चर्चाया नितान्तमस्त्यावश्यकता येन वास्तविकस्थितेः परिज्ञानं भवेत्। गर्गसंहितानुसारं भगवान् श्रीकृष्णः परात्परतरः, परिपूर्णतमः, असंख्यब्रह्माण्डाधिपतिः, साक्षात् पुरुषोत्तमोऽस्ति। स च सर्वदा गोलोके निवसति। स ह्येककार्यार्थं भूमण्डलेऽस्मिन् समागत्य अनेकानि कार्याणि च कृतवान्। स एव पुरुषोत्तमो विद्वद्भिः श्रीकृष्ण इति कथ्यते—

परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान् स्वयम्।
असंख्यब्रह्माण्डपतिर्गोलोके धाम्नि राजते॥ (१।१।१९)
परिपूर्णतमः साक्षाच्छ्रीकृष्णो नान्य एव हि।
एककार्यार्थमागत्य कोटिकार्यं चकार ह॥ (१।१।३६)
पूर्णः पुराणः पुरुषोत्तमोत्तमः
परात्परो यः पुरुषः परेश्वरः।
स्वयं सदानन्दमयः कृपावित्
स एव कृष्णः प्रणिगद्यते बुधैः॥

यथा पौराणिकः श्रीकृष्णो देवक्या अष्टमः पुत्रोऽस्ति, तथैव सूर्यमण्डलस्वरूपेण विष्णुरपि अदितेरष्टमः पुत्रो मन्यते। पौराणिककृष्णवद् मातृ-पितृद्वारा निष्कासनस्य प्रसङ्गोऽत्राप्यस्ति। आदित्यस्य देवतास्वीकारकरणात् कृष्णस्य सूर्यलोकात् परं गोलोके निवासस्थानं कथितमस्ति। भगवति श्रीकृष्णे देवत्वस्य प्रतिष्ठापना विष्णोर्मूलभूतगुणानामाधारेण सर्वोत्कृष्टत्वं सूचयति। ऋग्वेदे विष्णुर्महत्त्वपूर्णदेवतारूपेण न परिगणितोऽस्ति, किन्तु यजुर्वेदे यज्ञस्य महत्त्वेन साकं विष्णोर्महत्त्वं प्रतिपादितमस्ति। विष्णुः त्रिभिः पादैर्ब्रह्माण्डस्य सङ्क्रमणेन ऋग्वेदे आदित्यमात्रं स्वीकृतमस्ति। अथवा शनैः शनैः चक्रपाणि-कृष्ण-केशव-वासुदेवादीनि तस्य नामानि जातानि। 'कृष्णेन रजसा द्यामृणोति सविता कृष्णा रजांसि दधानः'[1] इति।

बौधायनधर्मसूत्रे विष्णुर्नारायणमाधवादिदेवतासहित एकस्मिन् सन्दर्भे प्रयुक्तोऽस्ति— 'नारायणं तर्पयामि, माधवं तर्पयामि, गोविन्दं तर्पयामि, केशवं तर्पयामि, विष्णुं तर्पयामि' इत्यादिछान्दोग्योपनिषदि देवकीपुत्रः श्रीकृष्णः अङ्गिरसः शिष्यः प्रोक्तोऽस्ति। ;तत्र मानवरूपेण वर्णितोऽपि कृष्णः प्रसिद्धो देव आसीत्, यस्य तादात्म्यं विष्णुना सह जातम्। तेनैव वैष्णवधर्मस्य

---

१. ऋ० सं० १।३५।२। २. बौधायनधर्मसूत्रम्—५।९।१०।

विकासो जातः। छान्दोग्यप्रतिपादितस्य मतस्य भगवद्गीतायाः सिद्धान्तेन साम्यमस्ति। लोकमान्यतिलकानुसारं श्रीकृष्ण एक एवास्ति, नानेकः। स एवैतिहासिको महापुरुष आसीत्, येन पार्थाय भगवद्गीताया उपदेशो दत्तः। भण्डारकरमतेन वैदिकवाङ्मये श्रीकृष्णो देवकीपुत्र आङ्गिरसस्य शिष्यो ब्रह्मविद्याज्ञाता भुवनद्रष्टा चास्ति। वेदस्य कृष्णो न देवता, नाप्यवतारी आसीत्। तैत्तरीयारण्यकदशमप्रपाठस्य नारायणोपनिषदि च विवरणानुसारं नारायण एवास्ति वासुदेवः। तद्यथा—'नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात्' इति।

आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
अयनं तस्य ताः प्रोक्तास्तेन नारायणः स्मृतः॥

स एव स्वकीयेन वास्तविकपरब्रह्मरूपेण व्यापित्वाद् विष्णुः। तत्रैव कूर्मावतारस्य वासुदेवश्रीकृष्णस्य वर्णनमप्यस्ति—

चरमोत्कर्षं प्राप्तो विष्णुर्वैदिकदेवतया इन्द्रेण सह तादात्म्यं भजते। परिणामतस्तद्गुणैः समन्वितः कृष्णोऽपि तेन सम्बद्धो भवति। वैदिकयुगे इन्द्रस्तुत्यनुसारं या इन्द्रकामिन्य आसन्, ता एव द्वापरे गोप्यो भूत्वा कृष्णप्रियतमा बभूवुरिति केषाञ्चन मतं न समीचीनं प्रतिभाति, यतो हि ततोऽतिसुन्दरतमं कमपि कान्तमुपलभ्य तत्प्रेयस्योऽपि प्रसज्जेरन्। तस्मादनर्गलमेव तन्मतम्।

तथा च श्रीमद्भागवतस्य दशमे स्कन्धे यदुवंशेऽवतीर्णस्य भगवतः श्रीकृष्णस्य रुचिरं चरित्रं विस्तारपूर्वकं वक्तुं राज्ञा परीक्षिता प्रार्थितोऽमलात्मा शुकदेवमुनिर्मङ्गलमयस्य भगवतो वासुदेवस्य श्रीकृष्णस्य जन्मकथानकं मुमुक्षूणां तथा विषयिणां पुंसामतिप्रियं प्राणिमात्रस्य बन्धनमोक्षकारणं कथयामास। भगवतः श्रीकृष्णस्य जन्मसमये कालः स्वयं मूर्तिमान् भूत्वा तत्स्वागताय समुपस्थितः सर्वत्र मनोरमं दृश्यमदृश्यत। रोहिणीनक्षत्रेण सर्वत्रालौकिकता स्थापिता, ग्रहनक्षत्रतारादयः शान्तेन भावेन लग्नेशं द्रष्टुमारभत। दिग्भिः शरद्गुणाः प्रकटिताः, मेघैराकाश आच्छादितः। पृथिव्याः प्रसन्नतया नगरग्रामेषु मङ्गलमयानि गीतानि श्रूयन्ते स्म, व्रजे गवां स्तनेभ्यो दुग्धानि स्वयं निःसृतानि, अनुमीये तस्य यत् पृथिवी गोरूपं धृत्वा दुग्धधारया भगवन्तमभिषेक्तुमुपस्थितास्ति। नद्यो विमलेन जलेन, सरांसि सुन्दरैः सरोजैः सुशोभितानि जातानि, पक्षिणो भ्रमराश्च कलरवेण गुञ्जनेन, यज्ञकुण्डेषु स्वयमग्निर्दक्षिणावर्तेन प्रज्वलितो जातः। मन्द-शीतलसुगन्धो वायुश्च प्रावहत्। द्वापरे त्रेतायुगः समागतः। स्वर्गे दुन्दुभयोऽवाद्यन्त। सिद्ध-किन्नर-गन्धर्व-विद्याधरा रम्याणि गीतानि अगायन्त। नमन्तो देवतागणाः पुष्पवृष्टिमकार्षुः। वारिदा अपि मन्दं मन्दं जलबिन्दुमुत्सृजन्तो भगवज्जन्मप्रतीक्षन्ते स्म। एवं स्थितैः पुराणपुरुषोत्तमो दिव्यां मूर्तिं धृत्वा भाद्रकृष्णाष्टम्यां बुधेऽर्द्धरात्रिसमये तथैव देवकीगर्भादाविर्भूतो यथा पूर्वस्यां दिशि पूर्णश्चन्द्रमाः समुदेति—

निशीथे तम उद्भूते जायमाने जनार्दने।
देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः।
आविरासीद् यथा प्राच्यां दिशीन्दुरिव पुष्कलः॥ (१०।३।८)



आचार्यनन्दिकेश्वरो नाट्यप्रयोगविधिश्च

डॉ० पारसनाथद्विवेदी
आचार्योऽध्यक्षश्च पुराणेतिहासविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

भरतार्णवस्य प्रणेता नन्दिकेश्वरः कस्मिन् प्रदेशे कस्मिन् वा काले किञ्च कुलमलङ्कृत्य स्वकीयया कृत्या संस्कृतवाङ्मयस्य गौरवं वर्द्धितवानिति निर्णेतुं सुशकं नास्ति। डॉ० मदनमोहनघोषमहोदयानां मतमस्ति यदाचार्यवर्येणामुना स्वजनुषा सम्भवतो दक्षिणापथः पावितः, यतश्च दक्षिणदेशे देवतारूपेण पूज्यतेऽसौ; किन्तु नाटचशास्त्रे निर्दिष्टमेतद् यत् पुरा वेधसाऽऽदिष्टेन भरतेन हिमालयगिरेः सुरम्ये रजतशृङ्गे त्रिपुरदाहस्याभिनयोऽदर्शि भगवते त्रिपुररिपवे। ततो भृशं तुष्टेन शिवेनादिष्टो तण्डुर्भरताय नानालङ्करणसंयुक्तानङ्गहारानशिक्षयत्। अभिनयदर्पणेऽप्युक्तं यद्भरतमुनेरुद्धृतप्रयोगानवलोक्य भगवान् कैलासपतिः स्वगणाग्रगण्या तण्डुना भरताय न्यदीदिशत्। एतावद्विवरणानुसारेणापरे विद्वांस एनं कैलासपर्वतवासिनं भगवतो विश्वनाथस्यान्तेवासिनं मन्वते।

एवमनुश्रूयते वैवस्वतमनोस्त्रेतायुगस्यादौ 'क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेद्' इति विविधकार्यविश्रान्तिभरितैरिन्द्रादिभिस्त्रिदशैः सम्प्रार्थितेन करुणार्द्रचेतसा वेधसा 'ऋग्वेदात् पाठचम्, सामवेदाद् गीतम्, यजुर्वेदादभिनयान्, अथर्ववेदाच्च रसान्'[1] सङ्गृह्य नाटचशास्त्रमाविष्कृतमित्येषाऽऽख्यायिका भरतमुनिप्रणीते नाटचशास्त्रे समुपलभ्यते। तेन च लोकपितामहेन सर्वप्रथमं महर्षये नारदाय गीतम्, स्वातये वाद्यं भरतमुनये च नाटचमशिक्षि। तेषु स्वाति-नारदौ तस्य प्रथमशिष्यौ भारते सङ्गीतं विस्तारयामासतुः। भरतमुनिश्च तेभ्योऽधिगम्य नाटचविद्यां प्रथमम् 'अमृतमन्थनम्' नाम नाटचं प्रायुङ्क्त। तत्रामृतमन्थनस्य सफलतामालोच्य वेधसाऽऽदिष्टेनाचार्यभरतेन त्रिपुरदाहस्याभिनयोऽदर्शि भगवते पार्वतीपतये। प्रयोगमिममवलोक्य भृशं तुष्टेन शिवेनाभ्यधायि यन्मयाऽऽविष्कृतं नानाकरणैरङ्गहारैश्चान्वितं नृत्यं पूर्वरङ्गे योजयतु भवान् इति। ततश्च भगवताऽऽदिष्टो तण्डुः पूर्वरङ्गशोभाभिवृद्धयेऽङ्गहारं प्रयुक्तवान्। तेन प्रयुक्तं नृत्यमिदं ताण्डवनाम्ना च प्रथितम्।

अभिनयदर्पणानुसारं जगत्स्रष्टा भगवान् प्रजापतिर्नाटचवेदं निर्मायाभिनयार्थं भरताय प्रायच्छत्। स च भरतमुनिः नाटच-नृत्य-नृत्तभेदैस्त्रिधा प्रकल्प्य तन्नाटचवेदं गन्धर्वाप्सरोभिस्साद्धं शिवस्य पुरस्तादर्शयत्। भरतमुनिना प्रयुक्ते तस्मिन्नभिनये उद्धृतप्रयोगानालोक्य भगवान् शङ्करः स्वगणाग्रगण्या तण्डुना भरताय न्यदीदिशत्। प्रीत्या च पार्वत्या तस्मै लास्यमप्युपदिष्टम्।[2]

---

१. जग्राह पाठचमृग्वेदात् सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि॥

२. अभिनयदर्पणः २–६।

कोऽसौ तण्डुरिति विचारचर्यायामभिनवगुप्तमहोदयानां कथनमस्ति यत्तण्डुरेव नन्दिनामा शिवगणः, नन्दिन एवापरं नाम तण्डुरित्युक्तं तेनाभिनवभारत्याम्।[1] तत्रैव च तेन नन्दिमतेन रेचिताङ्गहारस्योल्लेखोऽप्यकारि[2]। अपरत्र चापि पिण्डीबन्धनिरूपणप्रसङ्गे पिण्डीबन्धलक्षण-विधायिनो नन्दिन उल्लेखः कृतस्तेन। नाटयशास्त्रेऽपि लिखितं वर्तते यद् दक्षयज्ञविध्वंसानन्तरं कदाचित् संध्यायां तालुलयानुगैरनेकैरङ्गहारैस्सह प्रानृत्यद् भगवान् पार्वतीपतिः। तदा नन्दि-वीरभद्रादयो गणाः पिण्डीबन्धानालोक्य तेषां लक्षणनामानि चक्रुः—'ईश्वरस्येश्वरी पिण्डी नन्दिनश्चापि पट्टसी'।[3]

एवं च नाटयशास्त्रेऽभिनवभारत्यां चानेकस्थलेषु नन्दिनस्तथा नन्दिनोऽपरपर्यायस्य तण्डोर्वा नाम्नोऽवलोकनेन प्रतीयते यदयं नन्दी तण्डुर्वा ताण्डवनृत्यप्रयोक्ता भरतसमकालिको भगवतो विश्वनाथस्य मुख्यगण एवासीत्।

रत्नाकरप्रभृतयः केचन विद्वांसस्तण्डुनन्दिनोः पार्थक्यं प्रतिपादयन्ति। तेषां कथनमस्ति यत्ताण्डवनृत्यप्रयोक्ता तण्डुर्भगवतः शिवस्य शिष्य आसीत्, नन्दी च तस्य भगवतो मुख्यगण आसीत्। किन्तु शब्दकल्पद्रुमे तण्डु-नन्दि-नन्दीश्वर-नन्दिकेश्वराणामेकव्यक्तिरूपेण प्रतिपादन-मस्ति।[4] हरिवंशपुराणे च—'ततो नन्दि महादेवः प्राह गम्भीरया गिरा। नन्दिकेश्वर संयाहि' इत्युल्लेखो वर्तते। तेनापि ज्ञायते यद् नन्दी नन्दिकेश्वरश्चायमेक एव पुरुषो महादेवानुचरश्चासीत्[5]। कूर्मपुराणे नन्दिना शिलादमुनेः पुत्ररूपेणोल्लेखो वर्तते।[6] वाराहपुराणे चैकाऽऽख्यायिका वर्त्तते यत् त्रेतायुगे नन्दिनामा कश्चन मुनिस्तपस्यन्नासीत्। तस्य तपसा तुष्टो भगवान् शङ्करस्तं प्रत्याह—'त्वं मम पार्षदेषु श्रेष्ठो नन्दीश्वरनाम्ना च प्रख्यातो भविष्यति'[7] इति। महाभारतेऽपि चोक्तम्—

पुरस्ताच्चैव देवस्य नन्दि पश्याम्यवस्थितम्।
शूलं विष्टभ्य तिष्ठन्तं द्वितीयमिव शङ्करम्॥[8]

वात्स्यायनकामसूत्रेऽपि महादेवस्य शिवस्यानुचररूपेण नन्दिन उल्लेखो वर्तते।[9] येन च सहस्रेणाध्यायैः पृथक् कामसूत्रं प्रोक्तमिति। एभिः प्रमाणैर्ज्ञायते यदयं नन्दी नन्दीश्वरो नन्दि-केश्वरो वा शिवद्वारपालविशेषो महादेवस्य शिवस्यानुचरश्चासीत्।

कस्मिन् काले चाविर्भूयाचार्यवर्येणामुना स्वजनुषा पावितेयं भारतभूरिति विमृशामः। मतङ्गनामकेन सङ्गीताचार्येण स्वीये बृहद्देशीनामके ग्रन्थे नन्दिकेश्वरमतस्योल्लेखो विहितः[10]। 'सिलप्पादिकरण' नामके तमिलग्रन्थे मतङ्गाचार्यस्योल्लेखेन तस्य समयस्थितिः ईसवीया पञ्चमशताब्दी मन्यते विपश्चिद्भिः। तदाधारेण नन्दिकेश्वरस्य स्थितिकालश्चतुर्थशताब्दी

---

१ तण्डुमुनिशब्दो नन्दिभरतयोरपरनामनि।
(नाटयशास्त्रम्, अभिनवभारती, गायकवाडसंस्करणम्–पृ० ७८)

२. तदेव १६९ पृष्ठे।
३. तदेव १६५ तमे पृष्ठे।
४. शब्दकल्पद्रुमे, पृष्ठ ५८०, ६०२–६०३, ८२४।
५. हरिवंशपुराणम् १८२।८६।
६. कूर्मपुराणम्, अध्यायः–४०।
७. शब्दकल्पद्रुमे, पृष्ठ ८२४।
८. महाभारतम् १३।१४।२९५।
९. कामसूत्रम्, ४।
१०. बृहद्देशी० पृष्ठ ३२।

निश्चीयते विज्ञैरिति । किन्तु नाट्यशास्त्रे पञ्चमाध्याये 'पुनश्चित्र' इत्यादितोऽध्यायान्तभागो ध्रुवानिरूपणं नाट्यशास्त्रस्यानेकसंस्करणेषु नोपलभ्यते । अत एवाभिनवगुप्तमहोदयैर्न व्याख्यात् इति मन्यन्ते विद्वांसः; किन्तु नाट्यशास्त्रस्य प्रथमसम्पादकेनास्य भागस्य काचित् पारिभाषिकपदटीका विरचिता ।

विषयेऽस्मिन्नभिनवगुप्तमहोदयानां मतमस्ति यन्नन्दिकेश्वरस्य कृतिरियं प्रतीयते, यतश्च नाट्यशास्त्रस्याधिकारिणा विदुषा कीर्त्तिधरेणैकोनत्रिंशत्तमेऽध्याये नन्दिकेश्वरमतानुसारेण चित्रपूर्वरङ्गविधिर्निरूपितः ।[1] नाट्यशास्त्रेऽपि चतुर्थाध्याये पिण्डीबन्धनिरूपणावसरे नन्दिनो नामोल्लेखो वर्तते ।[2] एभिः प्रमाणैर्नन्दिकेश्वरस्य भरतात् प्राक्तनत्वं स्वत एव सिद्धयति ।

म० म० रामकृष्णकविः—डा० मदनमोहनघोषप्रभृतिभिर्नाट्याधिकारिभिर्विद्वत्प्रवरैर्नाट्यशास्त्रप्रणेतुर्भरतस्य स्थितिकालः पञ्चमशताब्दी ईसातः पूर्वं स्वीक्रियते, अतो नन्दिकेश्वरस्य स्थितिकालस्ततः पूर्वं षष्ठशताब्दी ईसापूर्वं निश्चेतुं शक्यते । यच्चाभिनयदर्पणे भरतस्य नामोल्लेख उपलभ्यते, तच्च नाट्यशास्त्रप्रणेतुर्भरतस्य नाम न प्रतीयते । यतोऽभिनयदर्पणेऽन्यत्रोल्लिखितैः—'भरतागमकोविदैः',[4] 'भरतागमवेदिभिः',[5] 'भरतागमदर्शिभिः',[6] 'भरतवेदिभिः',[7] 'भरतोत्तमैः',[8] 'नाट्यशास्त्रविशारदैः',[9] 'नाट्यतन्त्रविचारज्ञैः',[10] 'नृत्यकर्मविशारदैश्च' इत्यादिशब्दप्रयोगैः प्रतीयते यदयं भरतशब्दो नाट्यपर्याय एव । तेन नन्दिकेश्वरस्य भरतादर्वाक्तनत्वे न किमपि प्रमाणमुपलभ्यते । अपरं चाभिनयदर्पणे दशावतारमुद्रानिरूपणप्रसङ्गे बुद्धावतारस्योल्लेखो न व्यधायि नन्दिकेश्वरेण । तेनानुमीयते यदाचार्यनन्दिकेश्वरस्ततः पूर्वमासीत् । बुद्धकालश्च पञ्चमशताब्दी ईसापूर्वं स्वीक्रियते बुद्धैः । अतो नन्दिकेश्वरस्य स्थितिकालस्ततः पूर्वं षष्ठशताब्दी ईसापूर्वं निश्चेतुं शक्यते ।

भावप्रकाशनकारस्य शारदातनयस्य मतमस्ति नाट्यवेदस्याविष्कर्त्ता भगवान् शङ्करोऽस्ति । भगवान् चतुरानन आब्रह्माण्डस्तम्बपर्यन्तं सृष्टिं विधाय विश्रान्तिसुखाधिगमाय जगद्रक्षकं लोकनायकं विष्णुमुपागतः । तेन प्रभविष्णुना विष्णुना शङ्करान्तिकं प्रहितः सः । तत्खेदं परिज्ञाय भगवता शङ्करेण च स्वरचितस्य नाट्यवेदस्य शिक्षा नन्दिकेश्वराय प्रादायि । ततश्च भगवताऽऽदिष्टेन नन्दिकेश्वरेण तन्नाट्यवेदो ब्रह्माणे समुपदिष्टः । ब्रह्मा च भरतानशिक्षयत् । एतेनावगम्यते यन्नन्दिकेश्वरो भरतात् प्राक्तनः शिवस्यान्तेवासी चासीत् ।[11]

---

१. यत्कीर्तिधरेण नन्दिकेश्वरमतमत्रागामित्वेन दर्शितं तदस्माभिः साक्षान्न दृष्टम्, तत्प्रत्ययात्तु लिख्यते संक्षेपतः······स्वयं नन्दिकेश्वरमतानुसारेणायं चित्रपूर्वरङ्गविधिरिति निबद्धः ।
(नाट्यशास्त्र — गायकवाड़ संस्करण, भूमिका, पृ० १०)

२. नाट्यशास्त्रम्, गायकवाड़संस्करणम्, अध्यायः–४ ।

३. नाट्यशास्त्रम्—चौखम्भासंस्करणम्, भूमिका, पृ० ४३ ।

४. अभिनवदर्पणम् २ ।　५. तदेव—१२८, १६६ ।　६. तदेव—२५८ ।

७. अभिनवदर्पणम् ३०० ।　८. तदेव—१०२ ।

९. तदेव–५०, ५१, २१२, २४३, २५६ ।　१०. तदेव–८५ ।

११. भावप्रकाशः—गायकवाड़संस्करणम्, पृष्ठम्–२८५ ।

डॉ० कान्तिचन्द्रपाण्डेयमहोदयानां मतमस्ति यद् नन्दिकेश्वरो स्वातन्त्र्यवादिशैवमतानुयायी पाणिनेः समकालिक आसीत् । तेन 'नन्दिकेश्वरकाशिका' इति शैवमतप्रतिपादको ग्रन्थो व्यलेखि । नन्दिकेश्वरकाशिकाया व्याख्याकारस्योपमन्योर्व्याख्यानेन ज्ञायते—यथा पाणिनिना माहेश्वरात् चतुर्दशसूत्राण्यधिगत्याष्टाध्यायी विरचिता, तथैव नन्दिकेश्वरोऽपि तानेवाधारीकृत्य नन्दिकेश्वरकारिकायां स्वग्रन्थे शैवदार्शनिकमतं प्रतिपादितवान् । नन्दिकेश्वरेण माहेश्वरसूत्राणामेकाऽपरा व्याख्या संगीतकलादृष्ट्याऽपि 'रुद्रडमरूद्भवसूत्रे' कृता । संगीतकलादृष्ट्या च ग्रन्थोऽयमतीव महत्त्वपूर्णो राजते । तदनुसारं माहेश्वरसूत्रेषु प्रथमसूत्रचतुष्टये नवस्वराः सन्ति, किन्तु नन्दिकेश्वरमतेन सप्त स्वरा एव ।

'ऋ' 'लृ' इत्येतौ क्लीबध्वनी वर्तेते । तेषु स्वरेषु 'अ इ उ' इत्येते लघुस्वराः, 'ए ओ' इमौ दीर्घस्वरौ, 'ऐ औ' इमौ चातिदीर्घस्वरौ । अत एव सप्तस्वरा राजन्ते तेषां मते । नन्दिकेश्वरेण न केवलं स्वरदृष्ट्यैव सूत्रचतुष्टयव्याख्या प्रतिपादिता, किन्तु तालदृष्ट्याऽपि तस्य व्याख्या कृता वर्तते ।[1] एतेन ज्ञायते यन्नन्दिकेश्वरो शैवदर्शनमतावलम्बी संगीताचार्यश्च पाणिनिसमकालिको विद्वानासीत् । पाणिनिमुनेः कालः षष्ठशताब्दी ख्रैस्ताब्दपूर्वं मन्यन्ते विद्वांसः । अतो नन्दिकेश्वरस्य काल ईसापूर्वं षष्ठशताब्दी चैव सिद्ध्यति ।

वात्स्यायनविरचिते कामसूत्रे 'महादेवानुचरश्च नन्दी सहस्रेणाध्यायैः पृथक् कामसूत्रं प्रोवाच[2]' इत्युल्लिखितं वर्तते । तेन ज्ञायते यदाचार्यनन्दिकेश्वरेण कामसूत्रमपि लिखितम् । कविराजेन राजशेखरेण काव्यमीमांसायां काव्यविद्योत्पत्तिप्रसङ्गे 'रसाधिकारिकं नन्दिकेश्वरः'[3] इत्यभिहितम् । तेन चावगम्यते यदनेनाचार्यवर्येण रसविषयकग्रन्थोऽपि विरचितः । तमिलभाषायां 'पञ्चभरतम्' नाम्नी रचनैको लभ्यते । एषा नारदेन सम्बन्धिता प्रतिपाद्यते । सम्भवतो नारदेन ग्रन्थेऽस्मिन् संगीतस्य पञ्चप्रकाराणामुपरि विचारो विहितो भवेत्, यस्य नर्तनेन नाट्येन वा सम्बद्धः सम्भवेदत एवास्याभिधानम् 'पञ्चभरतम्' इति वर्तते । यतश्चादिभरतं मार्तंगभरतमर्जुनभरतं हनुमद्भरतं नन्दिभरतमिति भरतसम्बद्धानि पञ्चनामानि श्रूयन्ते । एषु नन्दिभरतः संगीताचार्य आसीत्, येन सङ्गीतविषयमधिकृत्य पुस्तकं लिखितम् । नाट्यशास्त्रे काव्यमालासंस्करणान्ते लिखितमिदम्—'समाप्तश्चायं नन्दिभरतसङ्गीतपुस्तकम्' । एतेनापि ज्ञायते यदासीत् कश्चिद् नन्दिभरतनामाचार्यः, येन संगीतविषयकं पुस्तकमलेखि । कोऽसौ नन्दिभरतः ? किमयमेक उत वा द्वौ पुरुषौ ? किमेकस्य द्वयोर्वाभिधानमिदमिति विचारणीयं वर्तते ।

श्रीमदभिनवगुप्तपादाचार्यो नन्दिनं भरतं च पृथक् पृथक् व्यक्तिद्वयं मनुते, तथा तयोरपरं नाम तण्डुर्मुनिश्चाभिधत्ते । (तण्डुमुनिशब्दौ नन्दिभरतयोरपरनामनी[4]) । महाकविना रामकृष्णकविनाऽपि समर्थितं मतमिदं यन्नन्दिकेश्वरस्तण्डुश्चैक एवासीत् । अनेनैव च 'नन्दिकेश्वरसंहिता' नामको ग्रन्थो व्यलेखि, किन्तु ग्रन्थस्यास्य बहुभागो विनष्टोऽवशिष्टश्चांश एव वर्तमानोऽभिनयदर्पणो वर्तते ।[5]

१. रुद्रडमरूद्भवसूत्रविवरणम् ।
२. कामसूत्रम्–१।१।८ ।
३. काव्यमीमांसा–(राजशेखर) १।१ ।
४. अभिनवभारती, बड़ौदासंस्करणम्, पृष्ठम्–७८ ।
५. दि क्वार्टरली जर्नल आफ दि आंध्र हिस्टारिकल रिसर्च सोसायटी, भाग–३, पृष्ठ–२५-२६ ।

सिंहभूपालमतानुसारं नन्दिकेश्वरस्य प्रथमा कृतिः 'नन्दिकेश्वरसंहिता' वर्तते, किन्तु ग्रन्थोऽयमधुनाऽनुपलब्ध एवास्ति। केवलं समुद्धरणमात्रेण सत्ताऽस्य वरीवर्त्ति। 'नन्दिकेश्वर-संहिता' नाट्यपरो ग्रन्थः प्रतिभासते, यत्र चानुमीयते नाट्यशास्त्रस्य संवादाभिनयगीतवाद्य-रसादिप्रमुखविषयाणां विवेचनं भवेत्? एतदपि सम्भाव्यते यन्नन्दिकेश्वरसंहितायाः कश्चित् खण्डितांशो भवेत् प्राप्तः, यमाधारीकृत्याभिनयपरानध्यायान् संयोज्य च 'भरतार्णवः' सम्पादितो भवेत्। शेषश्च विषयः कालकलया विनाशमुपगतः। यतो ग्रन्थद्वयमदः परस्परं पूरकतया प्रति-भासते। 'भरतार्णवे' प्रारम्भिकाध्यायचतुष्टयमभिनयपरमवशिष्टच च संगीतपरं विद्यते। प्रारम्भिकाध्यायचतुष्टये तु हस्ताभिनयस्य विवेचनं विद्यते। ग्रन्थारम्भश्च हस्ताभिनयेनैव भवति। अतो ज्ञायते यद्ग्रन्थस्य पूर्वभागे केचिदपरे विषया आसन् विद्यमाया, ये केनापि कारणेन विनष्टा उपलब्धांशाश्च प्रकाशिताः। एतद्धि अभिनयदर्पणो भरतार्णवश्चेति ग्रन्थद्वयं नन्दिकेश्वरनाम्ना प्रकाशितं दरीदृश्यते। तत्राभिनयदर्पणो डॉ० मदनमोहनघोषद्वारा सम्पादितो वर्तते। भरतार्ण-वश्च १९५७ खैस्ताब्दे तंजौरस्थसरस्वतीमहलपुस्तकालयतः प्रकाशितो वर्तते।

एवं हि श्रूयते यदेकदा शुक्राचार्यादुपात्तविद्यैरसुरैर्देवेभ्यो नृत्ये प्रतियोगितायाः सस्पर्ध-निमन्त्रणमदायि। अतो देवराजेन नन्दिकेश्वरो भरतार्णवस्य चतुःसहस्रश्लोककलेवरस्य रचनायै प्रार्थितः। नन्दिकेश्वरेण चासुराणां सा प्रतियोगिता स्वीकृता। सुरेन्द्रेण सुमतये भरतार्णवे शिक्षावाप्तये निर्देशो दत्तः। ततो नन्दिकेश्वरेण सुमतये भरतार्णवस्य शिक्षा प्रादायि। अत एव भरतार्णवः 'सुमतिबोधक'पदेनापि व्यपदेशमश्नुते। एवं चाचार्यनन्दिकेश्वरस्याभिनयदर्पणो भरतार्णवश्चेति रचनाद्वयी संराजते संस्कृतनाट्यक्षेत्रे।

एवं चोपर्युक्तविवेचितैः प्रमाणैरनुमीयते यदयं नन्दिकेश्वरो योग-तन्त्र-शैवागम-मीमांसा-संगीत-नाट्यशास्त्रादिविषयाणां विद्वानासीत्। शिवावतारत्वेनापि गण्यतेऽसौ बुधैरिति। अस्यैवापराणि नामानि नन्दी, नन्दिः, नन्दीश्वरः तण्डुश्चेत्यादीनि सन्ति। अनेनैव नाट्यशास्त्रं प्रणीतम्। अनेनैव संगीतशास्त्रं कथितम्। एतेनैवाभिनयनिरूपणं कृतम्। एतेनैव कामसूत्रं विरचितम्। एतेनैव रसविषयकग्रन्थोऽपि विरचितः, किन्तु कालचक्रेण विनष्टानि तानि सर्वाणि नाद्योपलभ्यन्ते।

नाट्यप्रयोगविधिः

नाट्यविद्याया उन्मेपकर्त्राऽऽचार्यनन्दिकेश्वरेणाभिनयदर्पणनामके ग्रन्थे चतुर्वर्गफल-प्राप्त्युपायभूतं ब्रह्मानन्दतोऽप्यधिकानन्दप्रदायकं नाट्यशास्त्रमिति मत्वा नाट्यशास्त्रस्य प्रयोग-दृष्ट्या नाट्य-नृत्त नृत्यरूपेण भेदत्रयं प्रकल्प्य तेषां प्रयोगकालोऽपि निर्दिष्टः। तत्र नाट्यनृत्ययोः प्रयोगो विशेषतः पर्वकाले नृत्तप्रयोगश्च राज्याभिषेकादिमहोत्सवेषु कार्यः। अभिनयदर्पणे पूर्वकथासंयुतोऽभिनयो नाट्यम् भावाभिनये हीनं नाट्यं नृत्तम्, रसभावव्यञ्जनादियुतं नाट्यं नृत्यमित्युच्यते।[1] एवंविधो नाट्यप्रयोगश्च राजसभायामेव कार्यः। तत्र नाट्यसभाया एकः सभानायको निर्वाचयेत्। स च दया-दान-दाक्षिण्यादिगुणविशिष्टो नाट्यविद्याविचक्षणो गुणदोष-विवेकज्ञो न्यायवित् पुरस्कारवितरणकुशलश्च भवेत्। तथैव सर्वविधभाषाभाषणकुशलः, नाट्य-कलाकौशल्यादिगुणयुतः, नीतिनिपुणः कलाविन्मन्त्री चापि निर्वाचयेत्। तत्र च नाट्यसभायां

१. अभिनयदर्पणः-१५-१६।

समानायकः सर्वाभिमुखः संविशेत्। तस्योभयोः पार्श्वयोर्मन्त्री, कविकर्मकुशलाः कवयः, सहृदयहृदयाः सुहृद्जनाश्च तिष्ठेयुः। रङ्गमध्ये नर्त्तक-नर्त्तक्यौ तिष्ठेताम्। तयोर्दक्षिणपार्श्वे तालधारी पार्श्वद्वन्द्वे मृदङ्गवादकौ तयोर्मध्ये गीतकारास्तदन्तिके च स्वरज्ञाः सन्तिष्ठेयुः। एवं च नाट्यारम्भे रङ्गमण्डली क्रमेण तिष्ठेत।[1]

तत्र च नाट्यप्रयोगादौ प्रथमं नाट्याधिष्ठातृदेवतायाः स्तवनं कुर्यात्। अभिनयदर्पणे च निर्दिष्टं वेषभूषाविन्यासादिपूर्वं गीतवाद्यतालादिकलाकुशला नर्त्तक्यादयो विघ्नेश्वरं गणपतिं नटाधिपतिं भगवन्तं शिवं शब्दगुणमाकाशं महींश्चाभिवादयेयुः। अनन्तरं च बहुविधातिमनोहरालापयुतान् वाद्ययन्त्रादीन् विधिवत्संपूज्य गुरूंश्चाभिवाद्य गुर्वाज्ञामधिगत्य च शृङ्गाररचनामारभेयुः।

पश्चाच्च विघ्नबाधाविनिवृत्तये लोकाभ्युदयाय देवानां प्रीत्यर्थं दर्शकानामैश्वर्याभिवृद्धये नायकादिपात्राणां श्रेयसे नाट्यविद्यासिद्धये च पुष्पाञ्जलिमर्पयेयुः।[2] नन्दिकेश्वरेण दैविकमानुषभेदेन द्वैविध्यमुक्तं पुष्पाञ्जलेः, तयोर्दैविके प्रथमं पुष्पाञ्जलिः प्रस्तूयते, पश्चाच्च मौलिकं विषयानुसारं नृत्यं प्रयुज्यते। मानुषे तु पुष्पाञ्जलिविधेरनन्तरं मुखचालिने नृत्यं प्रस्तूयते। शृङ्गनाट्ये च द्वयोरनयोः प्रयोगः प्रारम्भे भवति।[3]

एवं चाभिनयदर्पणानुसारं नाट्यप्रयोगादौ रङ्गपूजां पुष्पाञ्जलिविधिं च सम्पाद्य गीताभिनयतालभावादियुतं नृत्यं समारभेत। नाट्यशास्त्रेऽप्युक्तं गीतवाद्याभ्यां सह नाट्यप्रयोगो विधातव्यः। यतश्च सुष्ठुप्रयुक्ताभ्यां गीतवाद्याभ्यां नाट्यप्रयोगो न विपद्यते। नन्दिकेश्वरमतानुसारेण नृत्यारम्भकाले वाचा गीतमालम्बयेत्, हस्ताभ्याममभिप्रायं प्रदर्शयेत्, नेत्रसंचालनैर्भावं दर्शयेत्, पद्भ्यां च तालमाचरेत। अभिनयप्रयोगे च यस्यां दिशि हस्तसंचालनं कुर्यात्तत्रैव दृष्टिं निक्षिपेत्, यत्र दृष्टिं निक्षिपेत्तत्रैव मनोनिवेशयेत्, यत्र मनस्तदानुसारं भावानभिव्यञ्जयेत्, भावानुरूपं रसान् सृजेत। यथा चोक्तमभिनयदर्पणे—

आस्येनालम्बयेद् गीतं हस्तेनार्थं प्रदर्शयेत्।
चक्षुर्भ्यां दर्शयेद् भावं पद्भ्यां तालमाचरेत्॥
यतो हस्तस्ततो दृष्टिर्यतो दृष्टिस्ततो मनः।
यतो मनस्ततो भावो यतो भावस्ततो रसः॥[4]

एवं च नृत्यगीताभिनयादिषु नाट्याङ्गेष्वभिनयस्य प्राधान्यमुपलभ्यते। तत्राभिनयस्य चातुर्विध्ययुक्तमभिनयदर्पणे—

आङ्गिको वाचिकस्तदाहार्यः सात्त्विकोपरः।

तत्राङ्गैर्निदर्शित आङ्गिकोऽभिनयो वाचा निर्वर्तितो वाचिकाभिनयः सात्त्विकैर्भावैरभिभावितः सात्त्विकाभिनयः, हारकेयूरादिभिरलङ्कृतमाहार्याभिनयश्चोच्यते।[5] अभिनयस्येमे चत्वारः प्रकारा भगवतो नटराजस्य शिवस्य चत्वारि रूपाणि सन्ति। उक्तं चाभिनयदर्पणे मङ्गलश्लोके समस्तेयं सृष्टिर्यस्याङ्गिकोऽभिनयः, समस्तं वाङ्मयं यस्य वाचिकोऽभिनयः, चन्द्र-

१. अभिनयदर्पणः—१७–२२। २. अभिनयदर्पणः—३१–३४।
३. भारतार्णवः, अध्यायः—१५।८८९–८९७।
४. अभिनयदर्पणः—३६–३७। ५. तदेव–३८–४०।

तारादिमण्डितं नमो यस्याहार्याभिनयः, स्वयं च यः सात्त्विकाभिनयरूपेण राजते, तं नटराजं शिवं नमस्कुर्मः ।

एवं चतुर्विधाभिनयेषु प्राधान्यत आङ्गिकाभिनयस्य विवेचनं दृश्यतेऽभिनयदर्पणे। स चाङ्ग-प्रत्यङ्गोपाङ्गैः प्रदर्शितोऽभिनय आङ्गिकोऽभिनय उच्यते। अभिनयदर्पणे नाट्यभाष्येऽपि शिरोहस्तोरःपार्श्वकटीपादाश्चेति षडङ्गानि निरूपितानि सन्ति। केचित्तु ग्रीवां सप्तममङ्गं निरूपयन्ति। स्कन्धौ बाहू पृष्ठमुदरमुरू जङ्घे षडिमानि प्रत्यङ्गानि निर्दिष्टानि, अपरे नाट्याचार्या मणिबन्धकौ जानुनी कूर्परौ ग्रीवा चेत्यतिरिक्तानि प्रत्यङ्गानि निरूपयन्ति। नन्दिकेश्वरमते दृष्टि-भ्रू-पुत्तलिका-कपोल-नासा-जानु-दन्ताधर-जिह्वाऽऽस्य-मस्तक-चिबुकानि चेत्युपाङ्गानि विनिर्दिष्टानि। एतदतिरिक्तानि पूर्वाचार्योपात्तानि पार्श्वौ गुल्फावङ्गुल्यः करपादानां तलानि चाप्युपाङ्गानि निर्दिष्टान्यभिनयदर्पणे। केचित्तु स्कन्ध एव उपाङ्गमिति निरूपयन्ति। यद्यपि भेदोपभेदैरनेकविधानि सन्त्यङ्गोपाङ्गानि, किन्त्वत्राभिनयदर्पणे नृत्यमात्रोपयुक्तान्येवाङ्गप्रत्यङ्गोपाङ्गानि विवेचितानि सन्ति। यतश्च नृत्ये आङ्गिकाभिनयस्यैव प्राधान्यं भवति।

शिरोदृष्टिभेदाः

अभिनयदर्पणे शिरोऽभिनयस्य सममुद्वाहितमधोमुखमालोलितं धुतं कम्पितं परावृत्तमुत्क्षिप्तं परिवाहितं चेति नवभेदा निरूपिताः। भरतार्णवे च नन्दिकेश्वरमतेन चतुर्दशधा मतान्तरेण च पञ्चधा। एवं चैकोनविंशतिविधाः शिरोभेदा निरूपिताः सन्ति, किन्तु भरतार्णवे रस-स्थायि-सञ्चारिभावानां दृष्ट्या तस्य त्रैविध्यमुक्तम्। तत्राष्टौ रसदृष्टयोऽष्टावेव स्थायिभावदृष्टयो विंशतिधा संचारिभावदृष्टयः। एवं च षट्त्रिंशद् दृष्टिभेदा विवेचिताः सन्ति। तथैव ग्रीवाभिनयस्य चत्वारो भेदा वर्णिता अभिनयदर्पणे।

हस्ताभिनयाः

सर्वैरेव नाट्याचार्यैर्हस्ताभिनयस्य भेदद्वयं प्रतिपादितम्—असंयुतहस्ताः, संयुतहस्ताश्च। तत्रैकेन हस्तेन प्रयुक्तोऽभिनयोऽसंयुतहस्ताभिनयः, द्वाभ्यां हस्ताभ्यां प्रयुक्तोऽभिनयः संयुतहस्ताभिनयश्चोच्यते। तत्रासंयुतहस्तस्य सप्तविंशतिभेदाः, निरूपिताः, भरतार्णवेऽभिनयदर्पणे तु तस्याष्टाविंशतिभेदाः परिगणिताः। भरतार्णवे निरूपिताः सप्तविंशतिभेदास्तु तथैव विवेचिता अभिनयदर्पणे, किन्तु त्रिशूलनामैकोऽतिरिक्तभेदोऽपि वर्तते तत्र। नाट्यशास्त्रे त्वसंयुतहस्तस्य चतुर्विंशतिभेदा निरूपिताः सन्ति। संयुतहस्तस्य तु षोडशभेदा निरूपितास्तत्र भरतार्णवे अभिनयदर्पणे तु त्रयोविंशतिभेदास्तथा नाट्यशास्त्रे त्रयोदशभेदाश्चोक्ताः संयुतहस्ताभिनयस्य। एवमेव षोडशविधा देवहस्ता दशविधा दशावताारहस्ताः, पञ्चविधा विभिन्नजातीयहस्ताः, एकादशविधा बान्धवहस्ताः, नवधा नवग्रहहस्ता अपि विवेचिताः सन्त्यभिनयदर्पणे, भरतार्णवे तु संकरहस्तानां सप्तदशभेदा निरूपिता सन्ति। तत्र केचनाभिनयदर्पणेऽपि विवेचिताः सन्ति। एतदतिरिक्तं भरतार्णवे बृहस्पतिमतेनापि हस्ताभिनयस्य सप्तविंशतिभेदा निरूपिताः सन्ति।

पादाभिनयः

आचार्यनन्दिकेश्वरेण हस्ताभिनयस्येव पादाभिनयस्यापि महत्त्वमङ्गीकृतम्। भरतार्णवे चतुस्त्रिंशत्पादभेदाः सन्ति निर्दिष्टाः। अभिनयदर्पणे तु मण्डलमुत्प्लवनं भ्रमरी पादचारिका चेति चतुर्धा पादभेदा निरूपिताः। नाट्यशास्त्रेऽपि एत एव पादभेदाः सन्ति वर्णिताः; किन्त्वेते

भेदोपभेदैरनेकविधा भवन्ति। अन्येऽभिनयभेदा अभिनयदर्पणे भरतार्णवे च नोक्ताः सन्ति। मन्ये हस्तपादशिरोदृष्ट्यभिनयानामेव निरूपणं नन्दिकेश्वरस्य मुख्यमुद्देश्यमासीत्; उत वा त एवाभिनया निरूपितास्तैः, ये तदानीं लोकजीवने प्रचलिता आसन्।

नृत्यविवेचनम्

भारतीयनाट्यपरम्परायां नृत्यस्य महत्त्वपूर्णा भूमिका वर्त्तते। नृत्यमभिनयस्य जीवनाधायकं तत्त्वमस्ति। नृत्येन सह प्रयुज्यमानोऽभिनयः समधिकं मनो रञ्जयति। अत एवाचार्यनन्दिकेश्वरेण नाट्येन सह नृत्यमपि विचारितम्। अभिनयदर्पणे नाट्ये पूर्वरङ्गविधानानन्तरं नृत्यप्रयोगविधिर्विहितः। नाट्यशास्त्रानुसारं नाट्ये नृत्यस्य प्रयोगो भगवतः शङ्करस्य प्रेरणया सञ्जातः। यथोक्तम्—'भगवता शङ्करेण नाट्यं तालगीतवाद्यादियुतस्य नृत्यस्य प्रयोगेण समलङ्कृत्य चित्ररूपेण प्रस्तुतीकरणाय समाज्ञप्तस्तण्डुर्यत् स भरताय नृत्यं शिक्षयतु। स च भरताय नृत्यमुपादिशत्'।[1] तण्डुना प्रयुक्तं तन्नृत्यम् ताण्डवनाम्ना प्रथितम्। ताण्डवनृत्यं च नानाविधैरङ्गहारैः करणैश्च युक्तं भवति। इत्थमङ्गहारः करणं रेचकमित्यादीनि नृत्यसम्बन्धीनि तत्त्वानि सन्ति।

अङ्गहारः

आचार्यनन्दिकेश्वरेण भरतार्णवेऽङ्गहाराः सविस्तरं वर्णिताः। प्रयोगविधिश्चैषां नन्दिकेश्वराय (तण्डवे) शिवेन निर्दिष्टः। नन्दिकेश्वरश्च भरतानशिक्षयत्। भरतार्णवेऽङ्गहाराणां निष्पत्तिरित्थं वर्णिता—

आश्चर्यशब्दवचनैस्तत्तत्तालल्योद्यतैः।
करणानां मेलनं स्यादङ्गहारनृतिक्रमः॥[2]

भरतार्णवेऽन्यमतेनापि निगदिताङ्गहाराणां निष्पत्तिः। तत्र केचन विचक्षणाः प्रातःकालीनकार्यक्रमे क्रियमाणं नृत्यमङ्गहारं निरूपयन्ति। अपरे चाभिनयैकभागसमाप्तौ हावभावादियुताभिर्मुद्राभिः क्रियमाणं नृत्यमङ्गहारं वदन्ति।[3] भरतार्णवे नवधाऽङ्गहारा विवेचिताः। तत्र च प्रत्येकस्याङ्गहारस्य सम्बन्धो रसेन योजितः सौन्दर्यशास्त्रेणापि सम्बद्धा निरूपिता इमे। भरतार्णवे प्रदर्शिता अङ्गहारा रसपरत्वाद् रससंख्यानुगततया प्रतीयन्ते। वस्तुत इमे विषया अपि भवितुमर्हन्ति। प्रत्यङ्गहारे करणसंख्या निर्धारिता वर्तते। भरतार्णवेऽङ्गहारान्तर्गतं करणविवेचनमपि कृतम्। नृत्ये हस्तपादादीनां गतयः करणे व्यपदेशं लभन्ते। स्थानक-चारी-नृत्तहस्तादीनि सन्ति करणानां विभिन्नानि तत्त्वानि। भरतार्णवे विस्तृततया विचारितानि तत्त्वानीमानि।

स्थानकचारीनृत्तहस्तादिनिरूपणम्

स्थानकं करणानामेकं तत्त्वं विद्यते। नृत्ये स्थितेर्मुद्रा स्थानकमुच्यते। स्थितेर्मुद्रा विद्यते एकविधा पादस्थितिरेव। भरतार्णवे द्वात्रिंशद्विधानि स्थानकानि प्रतिपादितानि।[4] यत्र च स्थितेर्विभिन्नानां मुद्राणां स्वरूपाणि विस्तृतया विवेचितानि। तत्र सप्त पुरुषजातीयाः सप्त स्त्रीजातीया अष्टादश च मिश्रजातीयाः सन्ति। चारी इत्यपि विद्यते करणानामेकं तत्त्व-

१. नाट्यशास्त्रम्—गायकवाड़संस्करणम्—४।१२-१८।
२. भरतार्णवः—९।५७९। ३. तदेव-९।५८०-५८१। ४. तदेव—५।३३३-३३८।

मिति। भरतार्णवे नन्दिकेश्वरेण पादैकेन क्रियमाणस्याभिनयस्य चारीति व्यपदेशः कृतः। चारीद्वारैवाङ्गहाराणां करणानां रचना जायते। अभिनयदर्पणे तु केवलमष्टावेव चार्यो निर्दिष्टाः, न तत्राकाशचारी भूचारीति विभागो दृश्यते। भरतार्णवे चाकाशचारी भूचारीति भेदद्वयं प्रकल्पितम्। तत्राकाशचार्या नवधा भूचार्याश्च षोडशभेदा निरूपिताः। आकाशचार्यामाकाश-मभिलक्ष्य भूचार्याञ्च भुवमभिलक्ष्य प्रयोगो विधीयते। एतदतिरिक्तं भरतार्णवे चारीयुक्तस्य हस्तस्यापि निरूपणं कृतम्। एवं नन्दिकेश्वरमतानुसारं नृत्ये हस्तप्रचारस्य पादप्रचारस्य चोभयोरपि प्रयोगो विधीयते। एवमेव नृत्तहस्ता अपि करणानां महत्त्वपूर्णानि तत्त्वानि निरूपितानि। करणेष्वेव नृत्तहस्तानां प्रयोगो विधीयते। भरतार्णवे नृत्तहस्तानां सूच्यां तु षोडश-प्रकारका नृत्तहस्ता उल्लिखिताः, किन्तु ग्रन्थमध्ये द्वाविंशतिप्रकारा नृत्तहस्ताः सन्ति विवेचिताः। अभिनयदर्पणे त्रयोदशविधा नृत्तहस्ताः, नृत्तहस्तानां पञ्चधा गतयश्च सन्ति निर्दिष्टाः।

तालविवेचनम्

नृत्ये तालस्यापेक्षा सविशेषा वर्तते। भरतकोषे लिखितमस्ति यत् 'ता' इति शिवस्य 'ल' इति शक्तेश्च प्रतीकतां बिभर्त्ति। एवं शिवशक्तिसमायोगेन च तालस्योत्पत्तिर्भवति। भरतार्णवेऽष्टोत्तरशततालाः निरूपिताः सन्ति। ताण्डवेन लास्येन च सम्बद्धा इमे।

सप्तलास्यविवेचनम्

नाट्यशास्त्रे ताण्डव-लास्यभेदेन द्विधा नृत्यनिरूपणं कृतम्। ताण्डवं शिवेन लास्यं च पार्वत्या सह सम्बद्धम्। एवमुच्यते यद्भरतार्णवे यौ द्वौ ताण्डवौ निर्दिष्टौ, तयोः शुद्धनाट्यस्य शिवेन देशीनाट्यस्य च पार्वत्या विहितोऽभिनयः। अत एव नन्दिकेश्वरेणानयोरुत्पत्तिराभ्यां शिवपार्वतीभ्यां प्रतिपादिता। 'शुद्धनाट्यं शिवश्चक्रे देशिनीं पार्वती तथा' इति।

भारतार्णवे ताण्डवस्य लास्यस्य च प्रयोगः स्त्रीपुरुषसंयोगनिर्वाह्ये नृत्ये कृतः प्रतिभाति। प्रारम्भे द्वयोरेतयोर्देशीशुद्धनाट्योर्मौलिकतत्त्वं ताण्डवनाम्नाऽभिहितम्। आभ्यां भिन्नाः पेरण-प्रेङ्खणी कुण्डलीं-दाण्डिक-कलशाश्चेति पञ्च लास्यतया परिगणिताः। एषां पञ्चलास्यानां सम्मिश्रणं चारीनामभाग् भवति। शुद्धदेशीनाट्ययोः संयोगश्चारीभूषणपदाभिधेयो भवति।[1] एषां समष्टिः सप्तलास्यपदाभिधेया भवति।

शृङ्गनाट्यम्

भरतार्णवे निर्दिष्टमेतद् यद् द्विविधानां चारीणामङ्गहाराणां स्थानकानां च संयोगेन यन्नृत्यं प्रयुज्यते, तदेव शृङ्गनाट्यं निगद्यते। अस्य शृङ्गनाट्यपदाभिधेये हेतुरयं यत्कदापि वसन्ततौ भगवता शिवेन मनोरमोद्यानसुशोभिते कैलासगिरेः सुरम्ये शृङ्गे पार्वतीप्रार्थनया नृत्यप्रयोगोऽयं विहितः शिवेन च स्थानकैः सार्धं तालध्वनीनामनुसारेण नर्त्तनं विहितम्। नृत्येऽस्मिन्नादावाकाशचारीणां मध्येऽङ्गहाराणां समवसाने च भूचारीणां प्रयोगो भवतीति[2] शम्।

---

१. भरतार्णवः—७३२–७५६।

२. चारीद्वयैरङ्गहारैः स्थानकानां तु मेलनात्।
शृङ्गनाट्यमिदं सर्वे वदन्ति सुमते बुधाः॥ (भरतार्णवे—अध्यायः—११–१२)

वैदिकवाङ्मये अलङ्काराः

डॉ० हरिनारायणदीक्षितः,

एम्० ए०, पी-एच्० डी०, व्याकरणाचार्यः, सांख्य-योगाचार्यः, साहित्याचार्यः, साहित्यरत्नम्,

अध्यक्षः, संस्कृतविभागे

कुमायूँविश्वविद्यालयः, नैनीताल (उ० प्र०)

यद्यपि काव्यशास्त्रस्य वेदशास्त्रेण सह कोऽपि साक्षात्सम्बन्धो न दरीदृश्यते, यतो हि प्रभुसम्मितशब्दप्रधानेभ्यो वेदशास्त्रेभ्यः शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणस्य लोकोत्तरवर्णनानिपुणस्य कान्तासम्मितोपदेशदायकस्य काव्यस्य शास्त्रं सर्वथा भिन्नमेवास्ति, तथा शिक्षा-कल्प-व्याकरण-निरुक्त-ज्यौतिष-छन्दोनामभिः षड्भिर्वेदाङ्गभूतशास्त्रैरपि सह काव्यशास्त्रस्य न कापि साक्षात् सङ्गतिर्नयनपथमवतरति; तथापि 'देवस्य पश्य काव्यं न ममार न जीर्यति'[1] इत्यथर्ववेदवचो विचिन्त्य एवञ्च तत्कर्तृकृते 'कविर्मनीषी परिभूः स्वयम्भूः' इत्यृग्वेदस्य अंशे समुपलब्धं कविशब्दं विश्लिष्य वेदानामपि अजरामरकाव्यत्वसिद्धौ सत्यां तत्रापि काव्यत्वदर्शनाभिलाषी विदुषां विलसतितराम्। प्राचां भारतविदुषामपि इदमेव तात्पर्यमासीद् यदशेषाणां सत्यतावच्छिन्नविद्यानां प्रादुर्भावविकासौ वेदेभ्य एव भूतवन्तौ स्तः। एतादृशं किमपि ज्ञानं नास्ति सम्प्रति यस्य मूलं वेदेषु न भवेत्। विण्टरनित्स-मैक्समूलर-पीटरपिटर्सन-याकोबिराथप्रभृतयो नूत्नाः पाश्चात्यविपश्चिदपश्चिमा अपि ऋग्वेदं विश्वसाहित्यस्य प्राचीनतमं ग्रन्थं मन्यन्ते। वेदशब्दोऽपि ज्ञानार्थक एवास्ति। अस्माद्धेतोः संसारस्य सर्वविधं नाम ज्ञानं ज्ञानप्रकारो वा वेदेषु लब्धुं शक्यते।

भारतीय-ज्ञान-सूर्योऽपि ऋग्वेदकाले एवोदयं प्राप्तवानासीत्। अहं सर्वप्रथमं तु ऋग्वेदस्य ऋक्ष्वेव प्रारम्भिकीं साहित्यिकीं सुषमामवलोकयामि। अस्माकीनाः पूर्वजा उद्दामित्या निरङ्कुशायाः प्रकृतेरुन्मुक्ते मनोहरे प्राङ्गणे निवासं कुर्वन्ति स्म। अतः काले काले प्रकृतिः स्वीयकृपाकोपाभ्यां तान् प्रभावयति स्म। तदानीं प्रकृतिप्रभावितास्ते पूर्वजाः प्राकृतिकीं शक्तिं तस्याः कृपावृद्धये कोपशान्तये वा एकाग्रमनसा स्तुवन्ति स्म। हृदयान्तरालात् विनिर्गतास्तेषां ताः स्तुतयो भृशं मार्मिक्यः सौन्दर्यवत्यश्च भवन्ति स्म। अत एव तत्र सर्वत्रानायासेनैवागतं स्वाभाविकं काव्यत्वं विदुषां मनोहरणाय कल्पतेतरामेव।

केषाञ्चिद् विदुषां तु कथनमस्ति यद् वेदेषु ध्वनि-गुण-रस-रीत्यलङ्काराः सर्वे एव काव्यशोभाधायका भेदाः सन्ति, एवञ्च ते रूपक-उत्प्रेक्षा-अतिशयोक्ति-व्यतिरेक-श्लेषादीनामलङ्काराणां

---

१. अ० वे० १०।८।३२।

तु केचित् सङ्केता अपि प्रदर्शिताः सन्ति[1]; किन्तु डॉ० एस० के० डे–महोदयाय वेदेष्वलङ्कार-बाहुल्यदर्शनं नैव रोचते[2]। अयं महोदयो वेदेषु काव्यत्वमलङ्कारवत्वं वा मन्यते तु, किन्तु काव्यत्वस्यालङ्कारवत्वस्य वा तत्र किमपि विशिष्टं महत्त्वमुररीकर्त्तुमयं न सज्जितो भवति।

मामकीना अल्पीयसी शेमुषी त्विदमेव निश्चेतुमीहते यल्लौकिकसंस्कृतकविताकामिनी-कान्तकलेवरक्रान्तमानसाः कालिदासीयोपमामाधुरीमत्ता महाकविदण्डिपदलालित्यलीनचेतसो बाणभट्टीयरसभावपेशलतापाशबद्धा भावुकाः सहृदयहृदयाः सुकुमारमतयो विपश्चितो भवन्तु नाम वेदवाङ्मये काव्यमाधुरीप्राप्तिप्रयत्ने व्यर्थपरिश्रमाः; किन्तु निर्विशेषमतयो विद्वांसस्तु तत्रापि स्थाने स्थाने काव्यात्मकं सौन्दर्यं नयनपथातिथीकर्त्तुं प्रभवन्त्येव।

अथाहं कतिपयान्येतादृशान्युदाहरणानि प्रस्तुतीकरोमि, यानि वैदिकवाङ्मयेऽलङ्कारा-णामव्याजमनोहरीं हृत्तन्त्रीझङ्कारिणीं सत्तां सूचयितुमेव नहि, अपि तु निर्धारयितुमपि क्षमन्ते।

सर्वप्रथमं सर्वालङ्काराणां मूलभूता[3] उपमा[4] एव भवन्नयनयोरुपहारीक्रियते। यथा—'सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात्'[5] इति।

अत्रायं भावः—सरणशीलः सूर्यो देदीप्यमानाम् उषसं तथैव अनुधावति अनुसरति वा, यथा (रिरंसुः) मनुष्यः सुन्दरीं युवतिमनुसरति। अत्र ऋषिदृष्टौ सूर्यः उपमेयः, तस्य मनुष्यः उपमानम्; एवमेव उषा उपमेया, तस्या युवतिः (योषा) उपमानम्; इवार्थको वैदिकः 'न' शब्द एवोपमावाचकः शब्दः, अनुधावनमनुसरणं वा साधारणधर्मः। विचार्यतां नाम तावद् यदत्रोप-मायाः सर्वेषामेवाङ्गानां विद्यमानत्वात् पूर्णोपमा केषां सचेतसां मनो नाहरति?

यथा वा—परा हि मे विमन्यवः पतन्ति वस्य इष्टये। वयो न वसतीरुप[6]॥

अस्यामृचि ऋषेः शुनःशेपस्य मन्युरहिता बुद्धयो वसुमते जीवनाय तथैव परापतन्ति, यथा पक्षिण नीडाय परापतन्ति। अत्राप्युपमेयोपमानभावो हृदयहरः प्रतिभाति। यथा बुद्धय उपमेयाः, तासां पक्षिण उपमानम्; इवार्थको 'न'शब्द एवात्राप्युपमावाचकः शब्दोऽस्ति, परापतनं प्रत्यावर्तनं च साधारणधर्मो दृश्यते।

---

१. (क) आचार्यविश्वेश्वरः स्वकृतकाव्यप्रकाशटीकाभूमिकायाम्।
(ख) पी० वी० काणे–महोदयः स्वकृते 'हिस्ट्री आफ संस्कृत पोइटिक्स' ग्रन्थे हिन्द्यामनूदिते ४०५-४०८ पृष्ठेषु।
(ग) श्री एच्० एस्० डिवेकरः, 'ले फ्ल्योर द रेतोरिक द लोंद' नाम्नो ग्रन्थस्य द्वितीय-परिच्छेदे। अयं ग्रन्थः पेरिसे १९३० ख्रिष्टाब्दे प्रकाशितोऽस्ति।

२. दृश्यतां तस्य 'हिस्ट्री आफ संस्कृत पोइटिक्स' ग्रन्थस्य प्रथमभागे ३४१ तमं पृष्ठम्।

३. उपमैका शैलूषी संप्राप्ता चित्रभूमिकाभेदान्।
रञ्जयति काव्याङ्गे नृत्यन्ती तद्विदां चेतः॥
(अप्पयदीक्षितः, चित्रमीमांसायामुपमानिरूपणारम्भे)

४. "सादृश्यं सुन्दरं वाक्यार्थोपस्कारकमुपमालंकृतिः"—(पण्डितराजजगन्नाथो रसगङ्गाधरे)

५. ऋ० सं० १।११५।२; ६. ऋ० सं० १।२५।४।

यथा वा—

प्रतद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥

अस्मिन् मन्त्रे तु श्लेषपुष्टोपमायाः सौन्दर्यं हृदयहृत्त्वं वा दर्शनीयतायाः सीमानमेव स्पृशति; हृदयतन्त्र्याश्च ताराणि झङ्करोति ।

ऋचो भावोऽस्ति यद् भीम आकृत्यैव भयङ्करः, कुचरः कुत्सितं जीवघातपुरस्सरं चरति यः स कुचरः कुत्सिताचरणशीलः; गिरिष्ठाः पर्वतादिप्रदेशवर्त्तिगह्वरवासी मृगः सिंह इव भीमः शत्रुभयदः कुचरः=कुषु सर्वासु भूमिषु (त्रिषु लोकेष्विति भावः) चरति यः स कुचरः सर्वव्यापी, गिरिष्ठाः गिरि=मन्त्ररूपायां वाचि तिष्ठति यः स गिरिष्ठाः (सप्तम्या अलुक्) विष्णुर्वीर्येण (हेतुना) सर्वैः स्तूयते ।

अत्र विष्णुः उपमेयः, तस्य मृगः (सिंहः) उपमानम् । सादृश्यार्थको वैदिको 'न' शब्द एवोपमावाचकः शब्दः, तथा स्तुतिविषयता एवोभयोः साधारणधर्मः । भीमत्वं कुचरत्वं गिरिष्ठत्वञ्च श्लेषसाहाय्येनोभयधर्मिणि सन्ति ।

यथा वा—'रथीव कशयाश्वाँ अभिक्षिपन् आविर्दूतान् कृणुते वर्ष्याँ अह'[२] इति ।

एष भावः—यथा रथी कशया अश्वान् अभिक्षिपन् प्रेरयन् स्वदूतान् भटान् आविष्कुरुते, तद्वदेव असौ पर्जन्योऽपि मेघान् प्रेरयन् वर्ष्यान् वर्षणशीलान् तान् मेघान् दूतान् इव आविष्कुरुते ।

अत्र पर्जन्य उपमेयः, तस्य रथी उपमानम् । एवमेव मेघा उपमेयाः, अश्वा उपमानम् । इवशब्द उपमावाचकः, आविष्करणमुभयोः साधारणधर्मः ।

यथा वा—

एषा शुभ्रा न तन्वो विदानोर्ध्वेव स्नाती दृशये नो अस्थात् ।
अप द्वेषो बाधमाना तमांस्युषा दिवो दुहिता ज्योतिषागात्[३] ॥

अस्याम् ऋचि तिमिरमपाकुर्वती दिवो दुहिता मनोहरी उषाः स्नातोत्थिता समलङ्कृता युवतिरिव प्राच्यामुदेति । उदीयमानाया उषसो देव्या उपमा स्नातोत्थितया अलङ्कृतया युवत्या सह अतीव मनोहरी भाति ।

यथा वा—'इमा उ त्वा पुरुवसोऽभि प्र नोनुवुर्गिरः गावो वत्सं न धेनवः[४]' इति ।

ऋषेराशयोऽस्त्यस्यामृचि यत् हे इन्द्र ! यथा धेनवो गावो वत्सं प्रमोदयन्ति, तथैव मत्कर्तृका इमा स्तुतिवाचो भवन्तं प्रमोदयन्तु ।

अत्र स्तुतिवाच उपमेयाः, तासां गाव उपमानम्; एवमेव इन्द्र उपमेयः, तस्य वत्स उपमानम्; वैदिको 'न शब्द उपमावाचकः शब्दः; तथा प्रमोदनं साधारणधर्मः । उपमायाः सर्वाङ्गानामत्र सत्त्वात् पूर्णोपमा मोदयति मनीषिणां मनः ।

यथा वा—'अयमु ते समतसि कपोत इव गर्भधिम् । वचस्तच्चिन्न ओहसे'[५] इति ।

अयं भावो यद् यथा कपोतः सत्वरं स्वकपोतीं प्राप्नोति, तथैव इन्द्रोऽपि सत्वरं स्वयज्ञ (स्वयज्ञवेदिम्) प्राप्नोति । अत्रापि उपमानोपमेयाद्युपमावयवा न कस्यापि तद्विदो निगूढाः ।

१. ऋ० सं० १।१५४।२; २. ऋ० सं० ५।८३।३ ।
३. ऋ० सं० ५।६१।५; ४. सामवेदः—२।६।२; ५. तदेव—२।९।९ ।

न केवला उपमा एव लभ्यते वेदेषु, अपि तु मालोपमा[1] अपि दरीदृश्यते—

अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम् ।
जायेव पत्ये उशती सुवासाः उषा हस्रेव निरणीते अप्सः[2] ॥

अत्रैकस्या एव उषसश्चत्वारि उपमानानि राजन्ते ।

अथाहमेकमेतादृशमुदाहरणं प्रस्तौमि यस्मिन् न केवलाया उपमाया एव चाकचिक्यता, अपि तु विरोधाभासस्यापि मनोरमा सत्ता आन्दोलयति तद्विदां चेतः । दृश्यताम्—

उत त्वः पश्यन् न ददर्श वाचम् उत त्वः शृण्वन् न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्ये उशती सुवासाः[3] ॥

अयं भावः—अनेके जना विद्यां पठन्ति, किन्तु तस्या रहस्यं न विदितं भवति; एवमेव अनेके जना वाचो रहस्यं शृण्वन्ति, किन्तु तेषां बुद्धौ तद्रहस्यं स्फुरति नैव । किन्तु केचिदेतादृशो बुद्धिमन्तो भाग्यवन्तो वा सन्ति, येषां समक्षं वाणी स्वीयं सर्वमपि गुप्तरहस्यं तथैव प्रकटीकरोति यथा रिरंसुः काचिद् अलङ्कृता पत्नी पत्युः समक्षं स्वीयं सर्वस्वं समर्पयति ।

अत्र वाग् उपमेया, तस्या उपमानमस्ति जाया; 'इव' शब्द एव उपमावाचकः, आत्मसमर्पणमुभयोः साधारणधर्मोऽस्ति ।

अत्र उपमानमतीव शृङ्गारप्रेरकमस्ति; किन्त्वस्ति हृद्यानवद्यम् ।

अस्या ऋचः पूर्वभागे (उत त्वः पश्यन् न ददर्श वाचम्, उत त्वः शृण्वन् न शृणो येनाम्) विरोधाभासालङ्कारस्यापि महत्सुन्दरमुदाहरणद्वयं वरीवृत्यते । 'पश्यन्नपि न पश्यति', 'शृण्वन्नपि न शृणोति' इत्यहो कीदृशो मनोहरो विरोधः ? एवञ्च परमरहस्यभूना सा वाक्, अत एव दृष्ट्वाप्येनां न द्रष्टुम् (ज्ञातुम्) पारयति कश्चिद्, एवमेव श्रुत्वापि एनां न श्रोतुं प्रभवति कोऽपीति तत्परिहारोऽप्यत्याह्लादकरो मनोरमश्च ।

एतदनन्तरं मया एका एतादृशी ऋक् प्रस्तूयते यस्यामतिशयोक्ति-अनुप्रास-विभावना-विशेषोक्तिनाम्नां चतुर्णामलङ्काराणां मनोहारी सत्ता पाठकानां मनांसि हठादावर्जयति । दृश्यतां सेयम्—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति[4] ॥

मन्त्रस्य भावोऽस्ति यत् शोभनपक्षवन्तौ सहनिवासिनौ सखायौ द्वौ पक्षिणावेकमेव वृक्षमभिश्रयन्तौ स्तः । तयोरन्यतरस्तु वृक्षस्थितं फलं भुङ्क्ते, किन्त्वन्यः फलम् अभुञ्जान एव स्वीयं तेजः प्रकटयतीति ।

वस्तुतस्त्वस्मिन् मन्त्रे दर्शनशास्त्रस्य ईश्वर-जीव-प्रकृतिसंज्ञकानां त्रयाणां मूलभूतानां तत्त्वानां प्रतिपादनं रूपकालङ्कारस्य समाश्रयेण कृतमस्ति । यथा हि—ईश्वरः प्रकृतिमाध्यमेन सृष्टिमुत्पादयति, जीवश्च तस्यां सृष्टौ स्वकीयकर्मानुसारेण सुखदं दुःखदं वा फलं भुङ्क्ते; किन्वी-

---

१. "मालोपमा यदेकस्योपमानं बहु दृश्यते" (विश्वनाथः साहित्यदर्पणे १०/२६ पूर्वार्धे) ।
२. ऋ० सं० १।१२४।७ ।
३. ऋ० सं० १०।७१।४ ।   ४. तदेव—१।१६४।२० ।

स्वर: प्रकृतिजं फलमभुञ्जान एव सर्वं शास्ति, सर्वं च द्योतयतीति भावः। परन्तु ऋषिणा मन्त्रेऽस्मिन्नीश्वर-जीव प्रकृतीनां वर्णनम्, तेषां नामानि न गृहीत्वा पक्षिद्वयवृक्षनामभिर्विहितमस्ति। अहमाशङ्के यदस्यामृचि केचिद् विद्वांसो रूपकालङ्कारं सम्भाव्य अस्या इत्थम्भूतां व्याख्यां कर्त्तुकामा भवितुं शक्नुवन्ति यत् प्रकृतिरेकविशालवृक्षरूपा विद्यते। ईश्वरजीवावपि पक्षिद्वयरूपौ स्तः; तौ च पक्षिरूपौ ईश्वरजीवौ वृक्षरूपां प्रकृतिमाश्रयेते। तयोरीश्वरजीवयोरन्यतर एको जीवस्तु कर्मानुसारेण सुखं दुःखं वा अश्नाति; किन्त्वन्यः पक्षी अर्थाद् ईश्वरस्तु फलमभुञ्जान एव सर्वतः स्वीयं सौन्दर्यं तेजो वा वितनोतितराम्। किन्तु मह्यं त्वत्र अतिशयोक्तिरेव रोचते, न तु रूपकम्। यतो हि मम मतेन रूपक-अतिशयोक्तिभेदिका संस्फुटा रेखा उपमेयस्य सत्ता असत्ता एव वर्तते, न त्वभेदप्रतीतिः। यतो हि सा तूभयत्र लभ्याऽस्ति। मामकोऽयं भावोऽस्ति यद् यत्रोपमेयं शब्दोपात्तं भवेत् तत्र रूपकमेव, न त्वतिशयोक्तिः, यत्र चोपमेयं शब्दोपात्तं न भवेत्, अर्थात् तस्य दर्शनमेव न भवेत् केवलमुपमानमेव शब्दोपात्तं स्यात्, तत्रातिशयोक्तिरेव ज्ञातव्या।

'मुखचन्द्र उदेति' इत्यत्र रूपकम्, यतो ह्यत्रोपमेयभूतस्य मुखस्य शब्दोपात्तता अर्थात् शब्दत उपादानम् (ग्रहणम्) विद्यते; किन्तु मुखं निगीर्य, अर्थात् शब्दतोऽनुदीर्य 'चन्द्र उदेति' इति कथने त्वतिशयोक्तिरेव मान्यास्ति, यतो ह्यत्रोपमेयभूतस्य मुखस्य शब्दोपात्तता, अर्थात् शब्दत उपादानम् (ग्रहणम्) नैव विद्यते।

एवंभूतया स्पष्टेक्षिकया विचारे विहिते सति दृश्यते यत् प्रकृते मन्त्रे परमात्मजीवात्मरूपोपमेयस्य (विषयस्य) दर्शनम् (शब्दोपात्तता) नास्ति। अत्र तु केवलं पक्षिद्वयरूपोपमानमेव (विषयी एव) दरीदृश्यते। तेन च पक्षिद्वयरूपोपमानेनेश्वरजीवरूपोपमेयस्य सर्वथा निगरणं विहितमस्ति। तस्मादत्रातिशयोक्तिरेव अङ्गीविधेयाऽस्ति बुधैः, न तु रूपकम्। श्रीमदप्पयदीक्षितेनैतादृशी अतिशयोक्ती रूपकातिशयोक्तिसंज्ञया व्याख्याताऽस्ति[1]।

न केवलं तावदेतावदेव, अपि तु अस्मिन् मन्त्रे 'सुपर्णा'-'सयुजा',-'सखायः'-'समानं' 'परिषस्वजाते' इत्यादिशब्देषु सकारस्य अनुप्रासेन स्वर्णे सौरभसंयोगोऽपि सम्पादितोऽस्ति। एवमेव मन्त्रस्थिते 'अनश्नन्नन्यः' इति स्थले नकारस्य पौनःपुन्येन प्रयोगोऽपि सचेतसां चेतस्सु अनुप्रासस्य मधुरिमाणं परिवर्धयन्नस्ति। अत्रैव च—'अनश्नन् अन्य अभिचाकशीति' (अर्थात् फलमभुञ्जानः सौन्दर्यं वितनोति) इति शब्दपुञ्जे विभावनालङ्कारस्यापि स्थितिर्द्रढीयसी दरीदृश्यते। यतो हि यत्र हेतुं विनापि कार्यं भवेत् तत्र विभावना मन्यते[2]। अत्र सौन्दर्यप्रकाशनरूपस्य कार्यस्योत्पत्तिः सौन्दर्यहेतुभूतफलभक्षणं विनैव वर्णिता। अतो विभावना दुर्निवाराऽस्ति।

एवमेव विशेषोक्तिरप्यस्मिन् मन्त्रे लोचनगोचरीभवति। यतो हि कारणे सत्यपि यत्र कार्योत्पत्तिर्न भवेत् तत्र विशेषोक्तिर्मन्यते[3]। फलाभक्षणं सौन्दर्याभावरूपकार्यस्य कारणमस्ति।

---

१. रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः।
पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः॥ (कुवलयानन्दकारिका—३६)

२. "विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते" (विश्वनाथः साहित्यदर्पणे १०।६६ पूर्वार्धे)।

३. "सति हेतौ फलाभावे विशेषोक्तिः......" (विश्वनाथः साहित्यदर्पणे १०।६७ पूर्वार्धे)।

अत्र 'अनश्नन्' इति पदेनेश्वरकर्तृकफलाभक्षणरूपकारणे सत्यपि 'अभिचाकशीति' इति सौन्दर्य-बोधकक्रियापदेन सौन्दर्याभावरूपकार्योत्पत्तेरभावो द्योत्यमानोऽस्ति । अतोऽत्र विशेषोक्तिरलङ्कारोऽप्यपरिहार्योऽस्ति ।

अपि च, अस्मिन् मन्त्रे 'सयुजा' 'सखायाः' इति विशेषणद्वयेन परमात्मजीवात्मनो-र्नित्यत्वं सच्चिद्रूपत्वञ्चापि ध्वन्येते । अस्मादेवेतोरिमौ शब्दौ पदद्योत्यध्वनेरप्युदाहरणं भवितुमर्हतः । ईषद्विमर्शे कृते सत्येव चात्र माधुर्यगुणोऽपि स्फुटो भवन्नयनपद्धतिमवतरति ।

इत्थमहमवलोकयामि यदस्यामेकस्यामेव ऋचि काव्यस्य भूयांसि तत्त्वानि विलसन्ति, यानि सहृदयहृदयप्रीणनाय सर्वथालं सन्तीत्यत्र न केषामपि धीजुषां विसंवादः सम्भवति । एवमेव अन्या अपीदृश्योऽनेका ऋचो वर्तन्ते यासु सुधियां काव्यातत्त्वावलोकनाभिलाषः पूर्त्तिमेति । अत्र तासु कतिपया प्रस्तूयन्तेऽपि । यथा—

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यां आविवेश[1] ॥

स्पष्टमस्ति यदस्यामृचि व्यतिरेकातिशयोक्तिनामानावुभावलङ्कारौ राजेतेतराम् ।

अस्मिन् मन्त्रे वैयाकरणानां ब्रह्मसहोदरस्योपमेयभूतस्य वर्ण्यस्य अर्थाद् विषयस्य 'शब्दस्य' अध्यवसानं निगरणं विलीनीकरणं वा एकेनोपमानभूतेन विषयिणा महता वृषभेण कृतमस्ति । उपमेयं नात्र शब्दोक्तम्, अतोऽत्रातिशयोक्तिर्निर्बाधैव राजते ।

यदि च शृङ्गचतुष्टयवान् त्रिपात् सप्तहस्तयुक्तः शिरोद्वयसमेतः त्रिधाबद्धोऽयं वृषभः शृङ्गद्वयवतः चतुष्पद एकशिरोवतः एकत्र बद्धस्य च लौकिकस्य वृषभस्य अपेक्षया विलक्षणो मन्येत, तदा तु व्यतिरेकालङ्कारमत्र[2] को नाम वारयितुमीष्टे ? एवमेव—'द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य'[3] इति ।

इत्यत्रापि द्वादशारम् ऋतचक्रमन्यलौकिकचक्रापेक्षया विलक्षणं सद् व्यतिरेकालङ्कार-द्योतनाय कल्पतेतराम् ।

उदात्तसम्पद्वर्णनरूपस्य उदात्तालङ्कारस्योत्कृष्टमुदाहरणमपि[4] अथर्ववेदे तत्र लभ्यते, यत्र ऋषिणा भारतभूमेः स्वरूपं वैभवं महत्त्वञ्च समुपवर्णितानि सन्ति[5] । इदं स्थलमतीव हृदयहरं

---

१. ऋ० सं० ४।५८।३ ।
२. "उपमानाद् यदन्यस्य व्यतिरेकः स एव सः"(मम्मटः काव्यप्रकाशे) ।
३. ऋ० सं० १।१६४।११ ।
४. (क) "उदात्तं वस्तुनः सम्पत्......" (मम्मटः काव्यप्रकाशे) ।
(ख) लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते ।
यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत् ॥
(विश्वनाथः साहित्यदर्पणे १०।९४)
५. अथर्ववेदे १२।१।३–१० ।

तथा देशभक्तिबीजाङ्कुरपोषकं विद्यते। एवमेव क्रियादीपकालङ्कारोऽपि[1] तत्र द्रष्टुं शक्यते[2]। परमेषोऽस्ति अपरिपक्वरूपेणैव।

वर्णानुप्रासप्रियता शब्दानुप्रासप्रियता च वैदिकेषु ऋषिषु बाहुल्येन दृश्यते। लौकिककाव्यकाराणामनुप्रासालङ्कारस्य[3] प्राणवती तनुस्तत्र नितरां परिस्फुटन्ती परिलक्ष्यते। तथाहि-

(क) रक्षाणो अग्ने तव रक्षणेभो रारक्षाणः सुमख प्रीणानः।
प्रति स्फुर वि रुज वीड्वंहो जहि रक्षो महि चिद् वावृधानम्॥
(ऋग्वेदे ४।३।१४)

(ख) हंसः शुचिषद् वसुरन्तरिक्षसद् होता वेदिषद् अतिथिर्दुरोणसत्।
नृषद् वरसद् ऋतसद् व्योमसद् अब्जा गोजा ऋतजा अद्रिजा ऋतम्॥
(ऋग्वेदे ४।४०।५)

(ग) धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामः।
- देवानामसि वह्नितमं सस्नितमं पप्रितमं जुष्टतमं देवहूतमम्॥
(यजुर्वेदे-१।८)

(घ) वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूयाः।
देवा गातुविदो गातुं वित्त्वा गातुमित···· ···· ···· ···· ····॥
(यजुर्वेदे-२।२१)

(ङ) पवते हर्यतो हरिरति ह्वरांसि रंह्या।
···· ··· ···· ··· ···· ··· ··· ॥ (सामवेदे उत्तरार्चिके-२।६।४)

(च) इन्द्रो जयाति न परा जयाता अधिराजो राजसु राजयातै।
···· ··· ··· ··· ···· ···· ··· ···· ··· ··· ··· ॥
(अथर्ववेदे-६।९८।१)

(छ) पलालानुपलालौ शर्कुं कोकं मलिम्लुचं पलीजकम्।
···· ··· ··· ···· ··· ···· ··· ··· ···· ··· ॥ (अथर्ववेद-८।६।२)

(ज) ओजश्च तेजश्च सहश्च बलं च वाक् चेन्द्रियं च श्रीश्च धर्मश्च।
ब्रह्म च क्षत्रं च राष्ट्रं च विशश्च त्विषश्च यशश्च वर्चश्च द्रविणं च॥
आयुश्च रूपं च नाम च कीर्त्तिश्च प्राणश्चापानश्च चक्षुश्च श्रोत्रं च।
पयश्च रसश्चान्नं चान्नाद्यं चर्तं च सत्यं चेष्टं च पूर्त्तं च प्रजा च पशवश्च॥
(अथर्ववेदे-१२।५।७-१०)

---

१. "वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः" (अप्पयदीक्षितः कुवलयानन्दे ४८ कारिकायाः पूर्वार्धे)। २. अथर्ववेदे १२।१।१।
३. (क) "वर्णसाम्यमनुप्रासः" (मम्मटः काव्यप्रकाशे)।
(ख) "अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्" (विश्वनाथः साहित्यदर्पणे १०।३ पूर्वार्धे)।

प्रतीयते यल्लाटानुप्रासालङ्कारम्[१], यमकालङ्कारञ्चापि[२] विदन्ति वैदिका ऋषयः, यतो हि यजुर्वेदस्य (१।३) तथा (१।३०) सन्दर्भस्थलयोरथर्ववेदस्य च (१४।२।५३–५८) स्थले लाटानुप्रासस्यापरिपक्वं स्वरूपमुपलभ्यते। एवमेव ऋग्वेदस्य (५।२७।४) तथा (५।७६।२) स्थलयोः, यजुर्वेदस्याष्टादशेऽध्याये तथा (२३।१९) स्थलयोः, सामवेदस्योत्तरार्चिके (१।५।१) स्थले, अथर्ववेदस्य च (१२।२।१४) स्थले यमकालङ्काराङ्कुरा लोचनातिथीभवन्ति। उपरि प्रदर्शितेष्वनुप्रासोदाहरणेषु 'ख'–'ग' इति संकेतितयोरुदाहरणयोरपि यमकं समुपलभ्यते।

ब्राह्मणग्रन्थेषु मूर्द्धन्यतां गते शतपथब्राह्मणे हितशब्दे (१।३।१।२५), वर्षशब्दे (२।२।३।७) महिषीशब्दे च (६।५।३) अनुभूयमानः श्लेषालङ्कारो विदुषां ध्यानाकर्षणाय सर्वथालमेवास्ति।

उपनिषत्स्वप्यलङ्कारवैभवं दरीदृश्यते। तत्र उपमा-रूपक-अनुप्रास-विरोधाभाससदृशानामलङ्काराणां स्थितिश्चमत्करोत्येव सचेतसां चेतांसि। दृश्यताम्—

आसीनो दूरं व्रजति शयानो याति सर्वतः।
कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति॥
(कठोपनिषदि—१।२।२१)

अत्र विरोधाभासो मनो रमयति सुधियाम्।

रूपकस्य निदर्शनं त्वतीव हृदयावर्जकं विद्यते। शरीरावयवेषु रथावयवानामारोपः कियान् मनोहर इति दृश्यतां तावत्—

आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥
(कठोपनिषदि—१।३।३–४)

अत्र आत्मनि रथिनः, शरीरे रथस्य, बुद्धौ सारथेः, मनसि प्रग्रहस्य, इन्द्रियेषु हयानाम्, विषयभोगेषु गोचरभूमिभागानामारोपः कथ्यतां कस्य साहित्यरसमर्मज्ञस्य चेतश्चमत्कर्तुं नालम्? अथागम्यतां कृपया, भवतां समक्षमहमौपनिषदीम् उपमामुपस्थापयामि—

अरण्योर्निहितो जातवेदा गर्भं इव सुभृतो गर्भिणीभिः।
दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः॥
(कठोपनिषदि—२।१।८)

---

१. (क) "शब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः" (मम्मटः काव्यप्रकाशे)।
(ख) शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्यमात्रतः।
लाटानुप्रासः……… …. … ……… ॥ (विश्वनाथः साहित्यदर्पणे १०।७)

२. (क) अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः।
यमकं… … …. …. … ….॥ (मम्मटः काव्यप्रकाशे)
(ख) सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते॥ (विश्वनाथः साहित्यदर्पणे १०।८)

अत्र अरणिस्थितस्य अग्नेः उपमा गर्भिणीस्थितेन गर्भेण सह दत्तास्ति । अग्निरुपमेयः, तस्य गर्भं उपमानम् । यद्यप्यत्र काचित् सहृदयहृदयाह्लादकता न दरीदृश्यते, तथापि उपमा-प्रयोगप्रवृत्तेः अक्षुण्णताद्योतनाय इदमुदाहरणं महिमशालि विद्यते । यथा वा—

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ।।
वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ।।
सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चक्षुषैर्बाह्यदोषैः ।
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ।।

(कठोपनिषदि २।२।९-११)

दृश्यताम्, अत्र सर्वभूतान्तरात्मा उपमेयोऽस्ति, तस्य अग्नि-वायु-सूर्याः उपमानानि सन्ति; 'यथा' उपमावाचकः शब्दो विलसत्येव, प्रतिरूपभवनशीलता च साधारणधर्मोऽस्ति । इदं सर्वमेवोपमावैभवं महता म्रदिम्ना प्राकाश्यमानीतमस्तीति सुधियो विदन्तु ।

अथ मौण्डकोपनिषदीं रूपकच्छविमपि नयनविषयीकुर्वन्तु भवन्तः—

धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं संधयीत ।
आयम्य तद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सौम्य विद्धि[1] ।।

अत्रायं भावो यदुपनिषद्रूपिणि धनुष्युपासनारूपिणं शरं निधाय भावनारूपिण्या शक्त्या आकृष्य ब्रह्मरूपं लक्ष्यं वेधनीयम् । कथयन्तु महाशयाः, उपनिषदि धनुषः, उपासनायां शरस्य, भावनायां शक्तेः, ब्रह्मणि लक्ष्यस्य च आरोपो वस्तुतश्चेतश्चमत्कारी अस्ति न वा ?

मम मतेन त्वत्र दृढाकाट्यसिद्धान्तवतीषूपनिषत्सु धनुरारोपो धनुषो दाढ्र्यं सूचयति, यल्लक्ष्याप्तये परमावश्यकं भवति धनुर्धरस्य कृते, उपासनाया दैनन्दिनपरिष्कारात् तत्रारोपितशरे तीक्ष्णताभिव्यज्यते; इयं शरतीक्ष्णतापि लक्ष्यवेधाय महत्त्वपूर्णा, भावनायाः प्राबल्यं धनुराकर्षण-सौविध्यद्योतनाय समर्थमस्ति । अक्षरपदेन 'न' क्षरति (नश्यति) यत् तद् अक्षरमिति व्युत्पत्त्या लक्ष्यस्य दुर्भेद्यतापि द्योत्यते । अतोऽहं ब्रवीमि यदत्र पदद्योत्यध्वनेरपि हृदगहरश्चमत्कारो राजतेतराम् ।

उपसंहारः—

एतावता गवेषणात्मकेन विश्लेषणेन मन्ये यद् वैदिकवाङ्मयेऽपि काव्यालङ्कारा सन्ति । किन्तु मदीयस्यास्य कथनस्येदं तात्पर्यं नास्ति यत्तत्रापि लौकिकसाहित्ये इवैवानेकविधाः कवि-कल्पनाकान्तिकलितकलेवरा अलङ्काराः सन्तीति । यतो हि वैदिकवाङ्मयकालिका ऋषयो निजाध्यात्मविषयकभावाभिव्यक्तये यथा प्रयासं चक्रुः, न तथा स्वमानसकोमलकान्तकामकल्पना-

---

१. मु० उ०—२।२।३ ।

कलाकौशलकीर्त्तये। अत एव तेषां कृतिषु भावानामतिसारल्येनाभिव्यक्तिकरणाय सहजरूपेण प्रयोगविषयीविधीयमाना उपमा-रूपक-व्यतिरेकातिशयोक्तिसदृशा अङ्गुलिगण्याः केचिदेवालङ्काराः समुपलभ्यन्ते, न तु सर्वविधाः। एतेषामप्युपलभ्यमानानामलङ्काराणां तत्र यत्र कुत्रचिदेव प्रयोगो नयनावनिमवतरति, न तु बहुत्र; यतो हि तत्र भूयिष्ठस्तु अंशो निरलङ्कार एवास्ति। अनुप्रासस्तु ध्वन्यात्मकताधायकत्वात् समेषामेव पुरातनानां नूतनानां च लेखकानामतिसहजोऽलङ्कारबन्धः।

अतो नेदं विस्मयावहं यदि एष बाहुल्येन लभ्यते वेदेषु। आम्, इदन्तु अहं मनोबुद्धिभ्यामुभाभ्यामेवोररीकरोमि यद् क्वचित् क्वचिद् उपमारूपकयोः प्रयोगलौकिककविकृता एतदीयाः प्रयोगा इवैवातीव रमणीयाः सन्ति, ये षां कानिचिन्निदर्शनानि अस्मिन्नेव लेखे उपरिष्टाद् मयोद्धृतेषूदाहरणेषु द्रष्टुमपि शक्यन्ते। परमीदृशानि स्थलानि समस्ते एव वैदिके वाङ्मये सन्ति न्यूनान्येव। अतोऽहमिममेव निष्कर्षं प्राप्नोमि यद् वैदिकवाङ्मये न तु सर्वविधानामाधुनिकानामलङ्काराणामाशा विधेया, न वा तत्र सर्वथा अलङ्कारराहित्यमेव परिकल्पनीयम्। स पुरातनो युग आसीत्; तस्मिन् ब्राह्मी सृष्टिरिव कविसृष्टिरपि सरलासीत्; मानवसम्पदिव कविसम्पदपि विरलासीत्; लौकिकजगदिव च साहित्यिकसंसारोऽपि स्वल्पसंभार एवासीत्। अत एवातिचिरन्तने तदानीन्तने समये यथा साम्प्रतिकस्य लौकिकस्य भौतिकस्य वा युगस्य नानाविधानां पदार्थजातानामविकलायाः सत्ताया आशा-विश्वासौ नैव विधीयेते निष्पक्षैर्धीधनैः, तथैव साम्प्रतिकस्य साहित्यिकसंसारस्यापि नानाविधाया अलङ्कारसम्पत्तेरपि तत्राशा-विश्वासौ नैव विधेयौ। किन्त्विदं निश्चप्रचमेव ज्ञेयं यत् तदानीन्तने युगे साम्प्रतिकस्य साहित्यिकक्षेत्रस्यालङ्कारमहीरुहो जन्म लब्धवानासीत्, स च स्वीयविभिन्नभेदशाखा-प्रशाखोद्भेदोन्मुखोऽप्यासीदित्यत्र नास्ति कश्चित् संशीतेरवसर इति स्वमनसि निर्णीय विरमामि विस्तरात्।



सर्वङ्कषाया व्याकरणविवेचनस्य समीक्षणम्

श्रीशशिधरशर्मा, वाचस्पतिः

प्राध्यापकः—पञ्जापविश्वविद्यालये

संस्कृतकाव्यटीकाकृतां सुकृतभृतां सहृदयविद्वद्धुरीणानां मतल्लिका किल मल्लिनाथः। रससिद्धानां कवीन्द्राणामम्भोजदलमञ्जुलानि पदानि तदीयः करस्पर्शः सहसैव समुद्घाटयति, हृदयञ्च समुन्मीलयति। स खलु कोशः कोशानाम्, समाहृतिरनन्तपाराया व्याकृतेः, विलासभूमिरास्तिकनास्तिकाखिलदर्शनानाम्। स्वयमाह स्म—

वाणीं काणभुजीमजीगणदवाशासीच्च वैयासिकी-
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत्।
वाचामाचकलद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूद् यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः॥[1]

तस्य कनिष्ठसूनुः कुमारस्वामी च—'चुलुकितत्रिस्कन्धशास्त्रसमुद्रत्वम्' तदीयं युक्तमेवोक्तवान्[2]। तेन हि दुर्व्याख्याविषविमूर्छिता[3] कविकुलगुरुगवीसञ्जीविन्या समजीवि; भारविरविं समासादयितुं घण्टापथोऽसर्जि, नैषधीयचरिते जीवातुं तन्वता च सत्यं सहृदयहृदयानां जीवातुर्नैवाऽजन्यत। तथा च तादृशोऽमन्दसंविदानन्दनिष्पन्दः कस्य वा सचेतसो नाभिनन्द्यः?

यथा च संस्कृतकाव्यव्याख्यातॄणां नाथो मल्लिनाथः, तथैव तदीयासु टीकासु महाकवेर्माघस्य शिशुपालवधं महाकाव्यमाश्रित्य कृतसन्दर्भा भाववैभवगर्वा सर्वङ्कषैव निकषायते। माघो हि मौलिमणिर्महाकवीनाम्। तदीयस्य काव्यतल्लजस्य निगमागमानां ज्ञानविज्ञानयोश्च सदनसमानस्य करतलबदरायमाणमाशयं कर्तुं प्रवृत्तान्वर्थनामधेया ननु सर्वङ्कषा।

किञ्च, कविकुलगुरोः कृतिषु सञ्जीवनीं सहृदयहृदयकमलावलिरवेर्भारवेः किरातार्जुनीये घण्टापथं च कृतवतैव सर्वङ्कषा प्राकाश्यतेति। तथा च 'विकासिभक्तिभिः'[4] इत्यस्य व्याख्याने

---

१. घण्टापथसर्वङ्कषयोश्चतुर्थोऽवतरणश्लोकः।

२. त्रिस्कन्धशास्त्रजलधिं चुलुकीकुरुते स्म यः।
तस्य श्रीमल्लिनाथस्य तनयोऽजनि तादृशः॥
प्रतापरुद्रीयरहस्यविवृतेर्मङ्गलश्लोकानन्तरः श्लोकः। वे० राघवसम्पादिते १९७० संस्करणे पृ० २।

३. भारती कालिदासस्य दुर्व्याख्याविषमूर्छिता।
एषा संजीवनी व्याख्या तामद्योज्जीवयिष्यति॥
मेघदूतकुमारसम्भवयोः रघुवंशस्य च सञ्जीविन्या अवतरणिकायाः।

४. शिशुपालवधस्य १३–२४ पद्येषु।

तदेतत् सर्वमस्माभिः कालिदासत्रयसञ्जीविन्यां दृढभक्तिरिति ज्येष्ठे इत्यादिषु विवेचितमिति ।[1] आरोहयते हस्तिनमित्यस्य[2] व्याख्यायाञ्च तदेतत् सम्यग् विवेचितमस्माभिः किरातार्जुनीयटीकायां घण्टापथे 'स सन्ततं दर्शयते गतस्मयः'[3] इत्यत्र अन्यत्र[4] च व्यक्तमूचिवान् । एवञ्च कृतिवरस्य परिमार्जिततरात् कराग्रात् प्रसूताया निसर्गप्राप्तमुत्कृष्टतरत्वम् । अद्भुतं विवृतावस्यां पराक्रान्तं सूरिवरेणैतेन, यत्र हि न कोशाशेषदर्शनव्याकरणालङ्करणानामेव, चतुर्णां वेदानां धनुर्वेदगन्धर्व-वेदायुर्वेदानामुपवेदानां वेदाङ्गानां करितुरगादि रहस्यविद्यानामपि च पाण्डित्यं पुरत इव नरीनृत्यते । तथा च सर्वङ्कषां रसयतां रसज्ञानाम्—

वाणीं काणभुजीमजीगणदवाशासीच्च वैयासिकी-
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत् ।
वाचामाचकलद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूद् यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥[5]

इति स्वविषये ।

ये शब्दार्थपरीक्षणप्रणयिनो ये वा गुणालङ्क्रिया-
शिक्षाकौतुकिनो विहर्तुमनसो ये च ध्वनेरध्वगाः ।
क्षुभ्यद्भावतरङ्गिते रससुधापूरे मिमङ्क्षन्ति ये
तेषामेव कृते करोमि विवृतिं माघस्य सर्वङ्कषाम् ॥[6]

इति स्वकृतिविषये वा कृतिवरस्य तस्योक्तिः नाल्पमप्यत्युक्तिरिति सर्वसहृदयहृदयसाक्षिकमिदम् ।

अथापि, गभीरे मल्लिनाथकृतीनां कृताङ्गीकारेऽवगाहनेऽसाक्षात्कृतपूर्वं विस्मयमुत्पाद-यन्त्यो गिरिगुर्व्यश्च्युतयोऽपि पदे पदे आपेदिरे दृक्पथम् । नैव तासु प्रत्ययः सहसा समजायत । पौर्वापर्याविपर्यासितेन तन्मनस्कमननेन तु बलादिव स मनसि न्यवेश्यत "महतां प्रमादा अपि महान्तः' इति प्राचां प्रवादश्च नानाधार इति साक्षादक्रियत । तत्र महतः सङ्ग्रहाद् अलूक्षाणां क्षपितपक्षपातपातकानां शेमुषीजुषां पुरतः स्थालीपुलाकन्यायेन कतिचिदुद्ध्रियन्ते । व्याकृति-विवेचनमत्र नः परं सीमा ।

शिशुपालवधस्य मनोहरतरं पद्यम्—

चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम् ।
विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः ॥[7] इति ।

एतद्व्याख्याने 'नारदस्य कर्मत्वेऽपि निपातेनाभिहितत्वान्न द्वितीया' इति मल्लिनाथः प्राह । न त्विदं विचारसहम् । 'नारद इति' इति हि श्रीमद्वासुदेवज्ञानानुकरणम् ।

---

१. उक्तपद्ये सर्वङ्कषा, वेङ्कटेश्वरीयसंस्करणे—पृ० ३३१ ।
२. शिशुपालवधम्—१२ ।
३. उक्तपद्ये सर्वङ्कषा वेङ्कटेश्वरीयसंस्करणे-पृ० ३०१ ।
४. सर्वङ्कषा ।
५. सर्वङ्कषाया अवतरणश्लोकः ४ ।
६. सर्वङ्कषाया अवतरणश्लोकः—१ ।
७. शिशुपालवधम् १।३ ।

तेन 'नारद' इत्यस्य कर्मत्वाभावाद् द्वितीयाविभक्तेः प्रसर एव कथं यं निवारयितुं मल्लिनाथो निपातेनाभिहितत्वं युक्तीकरोति ? 'इति' इतिशब्देनोपढौकिताकार एव हि कर्म 'अबोधीत्यस्य'। तेन नारदात् प्रातिपदिकार्थमात्रे प्रथमैव प्राप्तावसरा। इयमेव गतिरन्येष्वनुकरणेषु 'वयः, शरीरी, पुमान्[१]' इत्येतेष्वपि। अन्यथा 'विभावितात्कृतिम्' इति द्वितीयान्ते सामानाधिकरण्यात्तत्र द्वितीया दुष्परिहारैवापतेत्। अत एवापारशब्दशास्त्रपारावारपारदृश्वा श्रीमान्नागेशभट्टः स्पष्टमाचष्ट— 'अमुं नारद इत्यबोधि सः' इत्यादौ 'नारद इति' इति श्रीकृष्णीयज्ञानानुकरणम्। नारद इत्येतच्छब्दाभिलप्यमानाकारो बोध इत्यर्थं इति प्रथमान्तस्य 'नारदस्य' प्रातिपदिकत्वान्न तत्र द्वितीयेति[२]। "इति शब्दः सर्वत्र प्रातिपदिकार्थमात्रेऽवस्थापनार्थः। यदि हि 'नारदमबोधि' इत्युच्यते, तदा कर्मान्तरयोगे सति नारदस्य कर्मभावः प्रतीयते। अत एव प्रातिपदिकार्थत्वे सति नारदाद् द्वितीया न भवति। नारद इत्यतः पदसमुदायादसौ भवितुं नार्हति, अप्रातिपदिकत्वात्। अर्थवत्समुदायानां हि समासग्रहणं नियमार्थमुक्तम्। प्रातिपदिकाच्च विभक्तय उक्ताः। यत्तु कर्म प्रातिपदिकञ्च, ततो भवन्त्येव—यथाऽनुमितिः। एवमन्यत्र" इत्येतस्य सन्देहविषौषधि[३]-व्याख्यानस्याऽयमेवाभिप्रायः।

पुण्यस्मरणा बालशास्त्रिणस्तद्गुरुणा राजारामशास्त्रिणश्चान्यथैवेदं व्याचख्युः[४]। तद्यथा—अत्र नारद 'इति' शब्दार्थः। 'इति'शब्दस्य बुद्धिस्थत्वोपलक्षिततत्तद्धर्मावच्छिन्ने शक्तत्वात्, तस्य तदर्थत्वं नारदपदं तात्पर्यग्राहकम्। 'इति' पदाच्चोत्पन्नद्वितीया 'अव्ययादाप्सुपः[५]' इति लुगिति न दोष इति। एवञ्चाऽस्थाने एव मल्लिनाथस्य भ्रमः श्रमश्च।

पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः।
विगृह्य चक्रे नमुचिद्विषा वली य इत्थमस्वास्थ्यमहर्दिवं दिवः॥[६]

रावणस्य लोकरावणतां चित्रयन्नवद्यहृदयमिदं पद्यं माघकवेः। अत्र तदीया वैयाकरण-मूर्धन्यधन्यता झङ्कारमिवाचरति। अत्र पद्ये शब्दार्थयोर्द्वयोरपि चमत्कारः समं सम्यक् संरक्षितः कविना। क्रियाव्यङ्ग्यध्वनेस्तु कथैवाऽन्या। अत्र व्याकरणमात्रसीमनि तु पर्यालोचने 'अवस्कन्द, लुनीहि, मुषाण, हर' एषु चतुर्ष्वपि 'स्कदि—लूञ्–मुष्–हृञ्' धातुभ्यः 'समुच्चयेऽ-न्यतरस्याम्, 'इति'[७] कालसामान्येऽनेन लोट्। तस्य च 'लोटो हि स्वौ वा च'[८] इत्युक्तेः सर्वपुरुषवचनसामान्येन द्विरादेशः। त्रिषु 'अतो हेः'[९] इति हेर्लुक्। 'अवस्कन्द' 'हर' इत्यनयोः शप्, लुनीहीत्यत्र तु क्र्यादित्वात् श्ना, 'मुषाण' इत्यत्र च श्नः शानच्, 'समुच्चये सामान्य-वचनस्य' इति विधेः[१०], चक्रे इति क्रियासामान्यवाचिनः करोतेरनुप्रयोगः, अनुप्रयुज्यमानाच्च

---

१. उक्तपद्यस्य सर्वङ्कषा, वेङ्कटेश्वरसंस्करणे–पृ० ३।
२. "कर्मणि द्वितीया" (२।३।२) इति सूत्रस्थो लघुशब्देन्दुशेखरः।
३. शिशुपालवधम् "सन्देहविषौषधौ"–पृ० ४।
४. श्रीगुरुप्रसादशास्त्रिसम्पादिते सप्तव्याख्योपेते लघुशब्देन्दुशेखरे वरवर्णिनी, १९३६, पृ० ६५९।
५. अष्टाध्यायी—२।४।८२।
६. शिशु० १।५१।　७. अष्टा० ३।४।३।　८. अष्टा० ३।४।२ सूत्रस्य द्वितीयं वाक्यम्।
९. अष्टा० ६।४।१०५।　१०. अष्टा० ३।४।५।

यथाकालं लकारा इति भूतानद्यतनपरोक्षार्थविवक्षायां लिट्। अवस्कन्दन-लवन मोषण-हरणानां क्रियाविशेषाणां क्रियासामान्येन कृधात्वर्थेन सहाभेदान्वयः, सामान्यविशेषयोरभेदान्वय इति व्युत्पत्तेः। अत एवावस्कन्दन-लवन-मोषण-हरणरूपा भूतानद्यतनपरोक्षा एकरावणकर्तृका दिवः अस्वास्थ्यक्रिया इत्यर्थः पर्यवस्यति।[1]

अत्र मल्लिनाथस्तु—"अत्रावस्कन्देत्यादौ क्रियासमभिहारे लोट् 'लोटो हिस्वौ वा च तध्वयोः' इत्यनुवृत्तौ 'समुच्चयेऽन्यतरस्याम्'[2] इति विकल्पेन कालसामान्ये लोट्, तस्य यथोपग्रहं सर्वलिङ्गादेशो हिस्वौ च, प्रकरणादिना त्वर्थे विशेषावसानम्। 'अतो हेः' इति यथायोग्यं हि लुक्। पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः। तत्सामान्यस्य करोतेः समुच्चये सामान्यवचनस्येत्यनुप्रयोगः 'चक्रे'[3] इति। न चैतद् युक्तम्, 'समुच्चयेऽन्यतरस्याम्' इत्यत्र सूत्रे क्रियासमभिहारानुवृत्तिर्नोक्ता महाभाष्यकृता। तदनुवृत्तिवादिनश्च 'अवस्कन्द, लुनीहि, मुषाण, हरेति लोडन्तानां द्वितीयापत्तेर्दुर्वारत्वात्, 'क्रिया समभिहारे द्वे वाच्ये' इति वार्त्तिकानुशासनात्। एतदभिप्रायेणैव भट्टोजिदीक्षिताः स्पष्टमेव भ्रममात्रतां मल्लिनाथव्याख्यानस्याहुः[4]।

एवम्, अवस्कन्देत्यादौ कालादिसामान्ये 'समुच्चयेऽन्यतरस्याम्' इति लोट्। कालकारकविभक्तिवचनविशेषावगमस्तु वक्तुः प्रयोगवशात्। अनुप्रयोगस्तु चक्रे इति "समुच्चये सामान्यवचनस्य"[?] इत्यनेन। इत्येवं सन्देहविषौषधेरत्राऽपि निरवद्यता। तत्र स्थितायामपि मल्लिनाथो भ्राम्यति। हन्त! चित्रम्।

प्रकरणादिनाऽत्र कालविशेषस्य प्रतीति[6]रित्यपि मल्लिनाथोक्तं न युक्तम्, अनुप्रयुज्यमानेन धातुना तस्यावगमो न्यायसिद्धत्वात्। अत्र 'समुच्चयश्चालङ्कारः'[7] इति मल्लिनाथोक्तिरपि न युक्तिसहा, क्रियासमुच्चयोऽतिशयोक्तिमूलकत्वावश्यकत्वात्। अत्र तु तदभावात्[8]। तस्माद् दीपकमत्रालङ्कृतिः। व्याकृतिकृतसीमत्वात् तु तत उपरम्यत एव।

रावणप्रसङ्गेनैव माघेनोक्तम्—

परेतभर्तुर्महिषोऽमुना धनुर्विधातुमुत्खातविषाणमण्डलः।
हृतेऽपि भारे महतस्त्रपाभराद् उवाह दुःखेन भृशानतं शिरः॥[9]

अत्र 'उवाह' इत्यत्र असंयोगाल्लिटः कित्त्वात् 'वचिस्वपि'[10] इत्यादिना सम्प्रसारणम् इति सर्वङ्कषा[11] निकषासहैव। न हि तिप्स्थानिकस्य णलः कित्त्वमनुजानते वैयाकरणाः। 'असंयोगाल्लिट् कित्'[12] इति हि दाक्षीपुत्रस्यानुशासनम्। तत्र च 'सार्वधातुकमपित्'[13]

१. विस्तरार्थं द्र० महाकाव्यसङ्ग्रहः पृ० ८७। २. अष्टा० ३।४।३।
३. शिशु० सर्वं० १।५१ (वें०) पृ० २१।
४. सिद्धान्तकौमुदीलकारार्थप्रकरणस्याऽन्त्योंऽशः।
५. शिशु० सन्देहविषौषधिः, पृ० ३०। ६. शिशु० १।५१ सर्वं० (वें०) पृ० २१।
७ शिशु० १।५१ सर्वं० (वें०) पृ० २१। ८. द्र० हरिदासकृता माधुरी।
९. शिशु० १।५७। १०. अष्टा० ६।१।१५। ११. शिशु० सर्वं० (वें०) पृ०।
१२. अष्टा०—१।२।५। १३. अष्टा०—१।२।४।

इत्यतोऽपिद् इत्यस्यानुवृत्तेः। तत एवासंयोगात्परोऽपिल्लिट् कित् स्यादिति वृत्तिकारः प्राह[१]। 'लिट्यभ्यासस्योभयेषाम्'[२] इत्यनेनात्र सम्प्रसारणम्। मल्लिनाथस्त्वमूल एव।

विदग्धलीलोचितदन्तपत्रिकाविधित्सया नूनमनेन मानिना।
न जातु वैनायकमेकमुद्धृतं विषाणमद्यापि पुनः प्ररोहति[३] ॥

इत्यत्र आद्ये एव पदे समासविषये जातभ्रमेण मल्लिनाथेन माघेऽत्याहितमेवाहितं यत् पाठ एव तदीयः परिवर्तितः 'विदग्धलीलाश्चतुरविलासिन्य इत्यर्थः। तासामुचिताश्च ता दन्तपत्रिकाश्च कर्णभूषणानि। विलासिनीविभ्रमदन्तपत्रिकेति साधीयान् पाठः। अन्यथा विप्रकृष्टार्थप्रतीतिकत्वेन कष्टाख्यार्थदोषापत्तेः' इत्यादि वदता। तत्र विदग्धा लीला यासां ता इति बहुव्रीहिं समासमभिप्रेत्य तस्य कल्पना प्रासरद् जल्पना च। विदग्धानां लीलोचिता या दन्तपत्रिका इत्येवं षष्ठीतत्पुरुषादिमं त्विममङ्गीकुर्वतां कष्टस्य दूरादपि कष्टमुपसर्तुम्। तथैव चाभ्युपयन्ति स्म मार्मिकाः।[४] बहुव्रीहिमुखे समासेऽभ्युगतेऽपि नास्ति कष्टस्य प्रसरः प्रकरणादिविदाम्, अन्यथा यत्र कुत्रापि तदापत्तेः। वस्तुतः—

विलासिनीविभ्रमदन्तपत्रमापाण्डुरं केतकबर्हमन्यः।
प्रियानितम्बोचितसंनिवेशैर्विपाटयामास युवा कराग्रैः ॥

इति[६] रघुपद्यप्रथमपादसंस्कारवशान्मल्लिनाथस्य तथोक्तिः। न त्वविकलप्रायं परकीयपदानुहारः स्पृहणीयः सहृदयानाम्, न वा यथास्थिते पाठेऽनुपपत्तेर्लेशोऽपीति विदाङ्कुर्वन्तु कृतविद्याः।

परस्य मर्माविधमुज्झतां निजं द्विजिह्वतादोषमजिह्मगामिभिः।
तमिद्धमाराधयितुं सकर्णकैः कुलैर्न भेजे फणिनां भुजङ्गता[७] ॥

इत्यत्र '···कर्णाभ्यां सह वर्तन्त इति सकर्णकाः। तैः चक्षुःश्रवस्त्वं विहायाविष्कृतकर्णैरित्यर्थः। 'तेन सहेति तुल्ययोगे'[८] इति बहुव्रीहिः। शेषाद्विभाषेति कप्[९]—इति मल्लिनाथः[१०], तच्चाऽयुक्तम्। शेषाधिकारस्थादेव बहुव्रीहेः 'शेषाद्विभाषा' इति सूत्रेण कपोविधानात्[११]। अतश्च कर्णाभ्यां सह वर्तन्ते इति सकर्णाः। सकर्णा एव सकर्णकाः—इत्येवं तुल्ययोगे बहुव्रीहेः स्वार्थे 'क'प्रत्ययेनैव निष्पादयितुमुचितम्।

---

१. सिद्धान्तकौमुदी मूलम् (चौ०), पृ० ३४५ (१९५८)।
२. अष्टा०—६।१।१७ वि० द्र० बालमनोरमा।
मोतीलालबनारसीदासप्रकाशने पृ० २४७ (भा० ३)।
३. शिशुपालवधम्—१।६०।
४. सर्वङ्कषा—पृ० २८।
५. महाकाव्यसङ्ग्रहः—पृ० १०१।
६. रघु०—६।१७।
७. शिशु०—१।६३।
८. अष्टा० २।२।२८।
९. अष्टा० ५।४।१५४।
१०. सर्वं० (वें०) पृ० २५।
११. अत एव 'शेषाद्विभाषा' इत्यस्य प्रत्युदाहरणत्वेन सपुत्रः इत्यप्युपात्तं भट्टोजिदीक्षितेन। सि० कौ० मूलम्, चौ० पृ० १७०।

स बाल आसीद्वपुषा चतुर्भुजो मुखेन पूर्णेन्दुनिभस्त्रिलोचनः।
युवा कराक्रान्तमहीभृदुच्चकैरसंशयं सम्प्रति तेजसा रविः[1] ॥

इत्यत्र 'वपुषा मुखेन चेति येनाङ्गविकारः[2] इति तृतीया'हानिवदाधिक्यस्यापि विकारत्वात्। तथा च वामनः–हानिवदाधिक्यमप्यङ्गविकारः' इति। 'तेजसा' इति प्रकृत्यादिभ्य उपसंख्यानमिति[3] तृतीया इति सर्वङ्कषाकारः[4]।

इदमत्र विचारणीयम्—अङ्गशब्दोऽयं समुदायशब्द इति भाष्याद् येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया स्यादित्येव येनाङ्गविकार इत्यस्यार्थः[5]। तत्र हानिवदाधिक्यस्यापि विकारत्वं भवतु नाम विकारो वैरूप्यमेव[6]। न ह्यविरूपं विकृतं जानन्ति केऽपि। अत एवाक्ष्णा काण इत्युदाहरणं कौमुद्याम्[7]। शब्दरत्ने च 'पादेन खञ्जः' इत्यपि[8]। न चात्र पद्ये चतुर्भुजत्वादिविकारतया विवक्षितं कवीन्द्रस्य 'मुखेन पूर्णेन्दुनिभः' इति लिङ्गात्। इन्दूपमां हि सौन्दर्यमवगमयितुमुपाददते कवयः। अरविन्दमिन्दुश्चानतिशयितसुन्दरे स्रष्टुः सृष्टौ। यदाह विमौलिमणिः श्रीहर्षः—'अतद्द्वयीजित्वरसुन्दरान्तरे',[9] कुतः परं भव्यमिति च[10]। स्वयं महाकविर्माघश्च पुराणर्षेः (श्रीकृष्णस्य) देवर्षेरभिमुखमुपसेदुषश्चन्द्रमसैवौपम्यं निबध्नाति स्म। यथा—

महामहानीलशिलारुचः पुरो निषेदिवान् कंसद्विषः स विष्टरे।
श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच्चन्द्रमसोऽभिरामताम् ॥[11]

इन्द्रप्रस्थसुन्दरीश्च निशाकरमनोहरैर्मुखैः स लक्षयति स्म—'प्रमदाश्च यत्र खलु राजयक्ष्मणः पुरतो निशाकरमनोहरैर्मुखैः'।[12] पूर्णचन्द्रः प्रत्युत सन्तमपि विकारं तिरोदधत् सौन्दर्यातिशयं पुष्णंश्चानुभाविको भावुकैर्भूरि विभावितश्च। 'मलिनमपि हिमांशोर्लक्ष्मलक्ष्मीं तनोति'[13] इति। 'एको हि दोषो गुणसंनिपाते निमज्जतीन्दो'[14] इति च मधुमयभणितीनां मार्गदर्शी कालिदास एव न्यदर्शयत्।

किञ्च, सूर्याचन्द्रमसोर्युगपदेकत्र स्थितेः दुर्लभां स्पृहणीयाञ्चापि शोभां कामपि भावयति स्म कविः—

उदयाद्रिमूर्ध्नि युगपच्चकासतोर्दिननाथपूर्णशशिनोरसम्भवाम्।
रुचिमासने रुचिरधाम्नि बिभ्रतावलघुन्यथ न्यषदतां नृपाच्युतौ ॥[15]

---

१. शिशु० १।७०।　　२. अष्टा० २।३।२०।
३. अष्टा० २।३।१८ सूत्रे वार्त्तिकम्।　४. शिशु० सर्वं० (वें०) पृ० २८।
५. सिद्धान्तकौमुदीवृत्तिः चौखम्भीये मूलसंस्करणे पृष्ठ० ११५।
६. परिणामो विकारो द्वे समे विकृतिविक्रिये—इत्यमरः ३।२।१५; व्याधितो विकृतोऽपटुरिति च मनुष्यकाण्डे ५८।　७. सिद्धान्तकौमुदी पृ० ११५ (चौखं० गुटका)।
८. सरलप्रभे शब्दरत्ने १९४७ तमे संस्करणे पृ० ७२४, काशिकायाञ्चाभ्यामुदाहरणाभ्यां सह कुष्ठः (कुणिः) वा इत्यप्युपात्तम्। चौखम्भीये काशिकायाः १९६९ संस्करणे पृ० १२३।
९. नैषधीयचरितम् १।३३।　१०. तदेव।　११. शिशुपालवधम् १।१६।
१२. तदेव १३, २९।　१३. अभिज्ञानशाकुन्तलम्–१।१७।　१४. कुमारसंभवम्–१।३।
१५. शिशुपालवधम्–१३।६४।

प्रकृते पद्ये तु 'मुखेन पूर्णेन्दुनिभः, असंशयं तेजसा रविः' इति समानाधिकरणां तां निर्वर्णयतः। कथन्नु सा विकार इति विचारणीयमिदं विचारणाचणैः। तत्त्वतः पुनः 'वपुषा चतुर्भुजः, मुखेन त्रिलोचनः' इति चतुर्भुजत्रिलोचनपदाभ्यामभिधामूलको हरिहरयोस्ताभ्यां शिशुपालोपमायाश्च ध्वनिरिति काव्यमर्मविदः।[१] एवञ्चाऽत्राङ्गविकाराय चर्चाऽपि न विचारसहा। 'हरिहरतुल्यमहिमत्वादतिदुर्धर्षं इति भावः' इति सर्वङ्कषाकारः स्वयमाह[२]। तेजसेति च 'प्रकृत्यादिभ्य उपसंख्यानम्'[३] इति तृतीयेत्यपि स एव।[४] एवञ्च तेनैवाऽत्र सर्वत्र तृतीयासिद्धौ किमङ्गः। अङ्गविकारकल्पना विकारेण।

हृदयमरिवधोदयादुदूढद्रढिम दधातु पुनः पुरन्दरस्य।
घनपुलकपुलोमजाकुचाग्रद्रुतपरिरम्भनिपीडनक्षमत्वम्॥[५]

इत्यत्र पृथ्वादित्वाद् दृढशब्दादिमनिजिति सर्वङ्कषाकारः[६]।

अथ कोऽयं पृथ्वादिः, पृथु-मृदु-महत्-पटु तनु-लघु-बहु-साधु-आशु-उरु-गुरु-बहुल-दण्ड-चण्ड-अकिञ्चन-बाल-होड-पाक-वत्स-मन्द-स्वादु-ह्रस्व-दीर्घ-प्रिय-वृष-ऋजु-क्षिप्र-क्षुद्र-अणु-वेणुशब्दात्मकः[७]। न चाऽत्र (पृथ्वादि) गणे दृढशब्दं गणयामास महर्षिः। अतो द्रढिमशब्दं पृथ्वादित्वादिमनिचा प्रतिपादयतः सर्वङ्कषाकृतो भ्रान्तिरेवेति बोध्यम्। द्रढियशब्दे इमनिज्विधानाय तु 'वर्णदृढादिभ्यः ष्यञ्च'[८] इति पृथगेवाऽनुशासनम्। अत्र 'गुणवचनत्वादेव ष्यञि सिद्धे इमनिजर्थं वचनम्'। 'चादिमनिच्' इति स्पष्टं तत्र वृत्तिः।[१०] एवञ्च प्रकृते पृथ्वादीमनिचा द्रढिमशब्द व्युत्पादनं मल्लिनाथकृतमनुशासनविरुद्धमेवेति व्यक्तम्।

एतच्चानुशासनविषयकं सर्वं सर्वङ्कषाया व्याकृतिविवेचनसमीक्षणदिग्दर्शनम्। तद्व्युत्पादितार्थदृशापि न खलु सूक्ष्मदृशां सविशेषमाशाबन्धाय भवति भूयसा सा। तथाहि—

जगत्यपर्याप्तसहस्रभानुना न यन्नियन्तुं समभावि भानुना।
प्रसह्य तेजोभिरसङ्ख्यतां गतैरदस्त्वया नुन्नमनुत्तमं तमः[११]॥

इतीदं प्रह्वस्य देवर्षिं प्रति वचः श्रीपतेः। तत्र पर्युंसर्गकादाप्नोतेर्व्याप्त्यर्थकस्य[१२] निष्ठान्तस्य नञ्समासे निष्पन्नस्य अपर्याप्तैरित्यस्य 'अपरिच्छिन्नैः' इत्यर्थमाह सर्वङ्कषाकारः[१३]।

न च प्रकृतिप्रत्ययाभ्यामयमर्थः सुकरो लब्धुम्। सुजनसन्तोषन्यायेन स्वीकृतोऽपि च सोऽर्थोऽग्रेतनीं सर्वङ्कषां व्याहन्ति। 'अत्रोपमानाद् मानोर्मुनेराधिक्यप्रतिपादनाद् व्यतिरेकालङ्कारः' इति तत्रोक्तम्[१४]। असंख्य(अपरिच्छिन्न)तेजोविभ्राजमानस्य मुनेः परिच्छिन्नतेजस्क-

---

१. म० का० सं० पृ० १७७।
२. सर्वं० (वें०) पृ० २८।
३. वार्त्तिकाङ्काः १३८।
४. सर्वं० (वें०) पृ० २८।
५. शिशु० १।७४।
६. सर्वं० (वें०) पृ० २९।
७. पाणिनिकोशः पृ० ६९४।
८. अष्टा० ५।१।१२३।
९. उक्तं तत्त्वबोधिनी।
१०. सि० कौ० (चौ०) पृ० २१५।
११. शिशु० १।२७।
१२. आप्लृ व्याप्तौ परस्मैपदी स्वादिः, धात्वङ्काः १२६०, पाणिनिकोशे तु धात्वङ्काः १२६१, पृ० ६६२।
१३. सर्वं० (वें०) पृ० ११।
१४. तत्रैव०।

भानोरपेक्षया सङ्कटतेतरां व्यतिरेकः। भानुरपि चेदपरिच्छिन्नतेजस्कः, तदा कथङ्कारं स सङ्कटताम् ?

'अपर्याप्तैः' इत्यस्याऽपूर्णैरितीदृशश्चेदर्थः क्रियते तदा तद्व्याघाताद्रक्षणं सम्भवेदपि।

तमर्घ्यमर्घ्यादिकयादिपूरुषः सपर्यया साधु स पर्यपूपुजत्।
गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः॥[1]

इत्यत्रत्यव्याख्यायां गृहान् प्रणयादुपैतुमभीप्सवः प्राप्तुमिच्छवः। आप्नोतेः सन्नन्तादुप्रत्यय इत्यादि दिशति सर्वङ्कषा[2]। परन्तु, उपैतुमित्यस्यार्थः प्राप्तुमिति, 'अभीप्सवः' इत्यस्यापि प्राप्तुमिच्छव इत्थमर्थकरणे स्वयमिवाहूताऽर्थपुनरुक्तिः। इच्छामात्रार्थत्वं तु सन्नन्तस्याप्नोरत्रादाय शक्या सा परिहर्तुम्। तथा च तदा अभीष्टेऽभीप्सितं हृद्यमिति कोषोऽपि[3] सम्यगनुकूलः स्यात्। एवम्—

पतत्पतङ्गप्रतिमस्तपोनिधिः पुरोऽस्य यावन्न भुवि व्यलीयत।
गिरेस्तडित्वानिव तावदुच्चकैर्जवेन पीठादुदतिष्ठदच्युतः[4]॥

इत्यत्र पतेरधःसंयोगानुकूलं व्यापारमर्थमभिप्रेत्य 'पतत्पतङ्गः' इत्यत्र पतङ्गस्य पतनासम्भवादियमभूतोपमेत्याचार्यदण्डिप्रभृतयो बभणुः। अत एवाप्रसिद्धस्योपमानत्वायोगादुत्प्रेक्षेत्याधुनिकालङ्कारिकाः सर्वे वर्णयन्ति इति मल्लिनाथः।

एवञ्च पतधातोरधोगतिमर्थमाशयानोऽभूतोपमोत्प्रेक्षा वेति मतभेदेन व्यवस्थापयन्नपि तथात्वे प्रसह्यापतन्तममङ्गलरूपमश्लीलाख्यदोषमलङ्कारवर्णनैकनिहितदृष्टिर्न निर्वर्णयाम्बभूव सर्वङ्कषाकारः। पत्लृ गतौ धातुर्भौवादिकः। गतेश्च विविधा अर्थाः। यथाहुरेकदेशेन—

भ्रमणं रेचनं स्पन्दनोर्ध्वज्वलनमेव च।
तिर्यग्गमनमप्यत्र गमनादेव लभ्यते॥[6]

ज्ञानार्था अपि भवन्ति गत्यर्थाः।

एवञ्च गतिरिति सामान्यत्वेन भ्रमणादयः—ऊर्ध्वगमनाधोगमनादयश्च तस्याः विशेषाः। तत्र यथौचित्यं क्वचन सामान्यस्यार्थस्य ग्रहणं क्वचन च विशेषस्य। तत्र सामान्यार्थे निर्दुष्टमुपपद्यमाने स एवादेयः, विशिष्टे च विशिष्टः। अत्र गतिसामान्यं चेद् व्याख्यानं स्यान्नाश्लीलं श्रयेत। न चाप्रसिद्धस्योपमानता—नानाविधैरभिप्रायैः सौर्यगतेः श्रुतिस्मृतीतिहासादौ प्रसिद्धत्वात्। तदेव भगवान् यास्कः सूर्यपदं गत्यर्थकात् सर्तेरपि व्युदपीपदत्—सूर्यः सर्यः सर्तेर्वा, सुवतेर्वा स्वीर्यतेर्वेति। प्रथममत्र सर्तेरेव ग्रह इत्यपि प्रणिभालनीयम्[8]। भुवो भ्रमणमभ्युपयन्तो नव्या वैज्ञानिका अपि न खल्वेकान्तं स्थेमानं कमलिनीकान्तस्य कामयन्ते। गतिसामान्यं चेत्मान्य-

---

१. शिशुपालवधम्—१।१४। २. वेङ्कटेश्वरीये संस्करणे पृ० ७।
३. अमरकोषः, विशेष्यनिघ्नवर्गे ५३। ४. शिशुपालवधम्—१।१२।
५. शिशु० वेङ्कटेश्वरीये पृ० ६–७। ६. भ्वादिः परस्मैपदीधात्वङ्काः ८४५।
७. कारिकावली चौ० दिनकरीये पृ० ५५।१९५३।
८. निरुक्तम् (वें०) सदुर्ग-विवृतिः पृ० ८३५।

तमस्य सर्वंकषाकृतोऽभिप्रेतम्—का तदाऽप्रसिद्धस्योपमानत्वासंभवमूलिकाऽभूतोपमायाः तत्कृतापत्तेः सङ्गतिः ? न चाधोगतिरेव पततेरर्थं इत्येकान्तः[1]। नाप्यत्र कथमप्युत्प्रेक्षासम्भावनमपि विचारणासहम्—प्रतिपदं स्वारस्यभङ्गापत्तेरिति[2] तु व्याकृतिकृतसीमभिरुपेक्ष्यत एव सम्प्रति ।

उक्तस्य दुरुक्तत्वं यथा दोषः, तथैव वक्तव्यस्यावचनमपि । मल्लिनाथश्च यत्रैकतः 'गतं तिरश्चीनमनूरुसारथेः[3] इत्यादौ 'गतमिति भावे क्तः' इत्यादिरूपेण स्पष्टप्रायाण्यपि पदानि विवेचयति तत्राऽपरतः—

दधानमम्भोरुहकेसरद्युतीर्जटाः शरच्चन्द्रमरीचिरोचिषम् ।
विपाकपिङ्गास्तुहिनस्थलीरुहो धराधरेन्द्रं व्रततीततीरिव[4] ॥

इत्यादौ समस्तानि पदान्यप्युपेक्षते । बहुखल्वीदृशेषु विद्यते विवेचनीयम्[5] । किञ्च—

विहङ्गराजाङ्गरुहैरिवायतैर्हिरण्मयोर्वीरुहवल्लितन्तुभिः ।
कृतोपवीतं हिमशुभ्रमुच्चकैर्घनं घनान्ते तडितां गणैरिव[6] ॥

इत्यत्रत्ये प्रथमपदेऽपि पूर्वपद्य इव रुहशब्दं समुपेक्षमाण एव परस्तात् पठितोर्वीरुहांशं 'रुहं' स इगुपधालक्षणः 'कप्रत्ययः' इत्येवं व्याचख्यौ[7] ।

तत्र पूर्वं व्याख्यातस्य पश्चादव्याख्यानं युज्येत । पूर्वक्रमप्राप्तमव्याख्याय पश्चाददद एव पदं व्याकर्तुं प्रवृत्तस्त्वनौचित्यं चुम्बत्येव । अपेक्षितव्युत्पादकानां पदानामुपेक्षणं दोपस्त्वनुवर्तत एव । 'अथोपपत्तिं छलनापरोऽपरामवाप्य शैलूष इवैष भूमिकाम्'[8] इत्यत्र 'अवाप्य' इति ल्यबन्तपदम् । समासेऽनञ्पूर्वे क्त्वो ल्यप्[9] इति चानुशासनम् । समानकर्तृकयोः पूर्वकाले क्त्वेति च ।

न च पद्ये कर्तुः समानं कर्तृत्वं क्रियाद्वये दर्शितम् । तथा च कथमत्र ल्यबित्यादि च स उपेक्षितैव विवेचयितुम् ।

अथ द्वितीयसर्गादप्येकमुदाहरणम्[10] । 'अल्पाच्तरम्'[11] इत्यस्ति पूर्वनिपातविषयेऽनुशासनम् ।

सार्धमुद्धवसीरिभ्यामथासावासदत्सदः ।
गुरुकाव्यानुगां बिभ्रच्चान्द्रीमभि नभः श्रियम्[12] ॥

इत्यत्र तु सीरिशब्दस्याल्पाच्तरत्वेऽपि न कवीन्द्रेण पूर्वनिपात आदृतः शिरोमुकुटेनापि शाब्दिकानाम् । तच्चोद्धवस्याभ्यर्हिततामभिव्यङ्क्तुम्—'अभ्यर्हितञ्च' इत्यनुशासनं स्मरता[13] ।

---

१. प्रयुञ्जते हि निःसंशयं प्रयोगविदः—''नभः पतन्त्यात्मसमं पतत्रिण इत्यादि । वल्लभदेवस्तु 'पतन्निति पृथग् विशेषणं स्वीकृत्य 'आकाशादवतरन्' इति व्याचक्षाणोऽवसरमेवाऽहरद् भ्रमस्य—सन्देहविषौषधिः, पृ० ९ ।
२. न हि तस्य सम्भावनारूपार्थवाचित्वं कुत्राऽपि स्वीकृतम् । ३. शिशु० १।२ ।
४. शिशु० १।५ । ५. वि० द्र० म०—का० सं० पृ० ७ इत्यादि । ६. शिशु० १।७ ।
७. शिशु०, सर्व० वें०, पृ० ४ । ८. शिशुपालवधम् १।६९ । ९. अष्टाध्यायीसूत्रपाठः ।
१०. अष्टाध्यायीसूत्रपाठः । ११. ,, ,, २।२।३४ ।
१२. शिशुपालवधम् २।२ । १३. २।२।३४ सूत्रस्य वार्त्तिकम् ।

तथा चोद्धवशब्दस्य पूर्वंनिपातं प्रयुञ्जता कविवरेण सीरिणो (बलदेवस्य) गदितमनादृत्योद्धवस्यैव पक्षं प्रमाणीकरिष्यति वासुदेव इति ध्वनेरध्वना प्रतिपादितमिति पूर्वनिपातोऽत्र रहस्यं किमपि व्यङ्क्ते[1]। परन्त्वलङ्कारझङ्कारकृतकर्णेन नाकर्णि तत् किमपि लब्धवर्णेनानेन।

शिशुपालवधस्योपक्रमांशमेवाधारीकृत्य कृतेयं सर्वङ्कषाकृता कृताया व्याकृतिनिरूपणाया विवेचना दिङ्मात्रमित्यवसेयम्।

इदं त्वत्रावश्यमवधेयम्—न खल्वेतेन सर्वङ्कषाकारस्य वैदुष्यं महिमा वा क्षीयते। गभीरगभीरां समाहितसर्वशास्त्रसारो महाकवेर्माघस्य गिरं व्याख्यातुं प्रवृत्तिरेव हि महते श्लोकाय, किं पुनर्व्याख्यानान्तरेषु व्याकरणालङ्करणादि तां विशदयितुमनलंभूष्णुषु। मल्लिनाथस्तु प्रायशः सर्वेषामेव शास्त्राणां कविना कृतान्निर्देशान्न स्फुटीकर्तुं प्रयतते। अलङ्कारविषये तु संसृष्टिशङ्करपर्यन्तमग्रेसरति। गुणिगणमनोग्रहणनिपुणायास्तादृशव्याख्याप्रणाल्याः स प्रवर्तकः काव्यक्षेत्रे यदाधारत एव भाविनां समीक्षणानां परीक्षणानाञ्च प्राप्तावसरः प्रखर इति समेऽपि समं विनयेन तस्य कृतज्ञाः। यदाह सहृदयहृदयसमुन्मीलनरविर्भारविः—

विषमोऽपि विगाह्यते नयः
कृततीर्थः पयसामिवाशयः।
स तु तत्र विशेषदुर्लभः
सदुपन्यस्यति कृत्यवर्त्म यः॥ इति।

○ ○ ○

1. पूर्वनिपातस्य पदैकदेशतया व्यञ्जकत्वमाहुराचार्याः, द्र० काव्यप्रकाशे प्रदीपे चतुर्थोल्लासे आनन्दाश्रमीये पृ० १०।

पात्रचयनचातुर्यं भट्टबाणस्य

श्रीछोटेलालत्रिपाठी

अनुसन्धाता—सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

कविकोविदेन बाणभट्टेन विरचितायां कादम्बर्यां निर्दिष्टेषु पात्रेषु केषाञ्चन स्वरूपं विमृशन् तैः पात्रैस्समाजस्य कीदृश उपकारो विहित इति लेखेऽस्मिन् प्रस्तुतः।

कादम्बर्यां पुरुषेषु स्त्रीषु चेमानि सन्ति घटितानि पात्राणि—वैशम्पायननामा शुकः, तस्य पिता इन्द्रायुधनामा तुरगः, राजा शूद्रकः, अवन्तीपतिस्तारापीडः, शुकनासो ब्राह्मणस्तस्यामात्यः। तारापीडस्य सुतश्चन्द्रापीडः कथानायकः, शुकनासात्मजो वैशम्पायनः, महर्षिर्जाबालिः, तत्पुत्रो हारीतः, श्वेतकेतुपुत्रः पुण्डरीक उपनायकः, तन्मित्रं कपिञ्जलः, हंसश्चित्ररथश्च गन्धर्वराजौ, केयूरको गन्धर्वदारक इत्यश्व-शुक-नृपति-ब्राह्मण-महर्षि-गन्धर्वदारकरूपेण विभिन्नजातीयानि पुरुषेषु पात्राणि घटितानि कविना।

स्त्रीषु च—चाण्डालकन्यका, राजमहिषी, अमात्यपत्नी, गन्धर्वराजसुता कादम्बरी नायिका, तस्यास्सखी मदलेखा, महाश्वेता गन्धर्वपुत्री उपनायिका, महाश्वेतायाः सखी तरलिका, चन्द्रापीडस्य ताम्बूलकरङ्कवाहिनी पत्रलेखा इति नैकविधानि स्त्रीपात्राणि।

विभिन्नजातीयानां पात्राणां कविकृतमिदं चयनमस्मभ्यमुपदिशति यदेकस्य महतः कार्यस्य साधनाय नैकजातीयानां नैकस्वभावानाञ्च मिलितानामावश्यकतेति। महतो राज्यस्य सञ्चालनाय राजा विभिन्नजातीयान् मानवान् पशून् पक्षिणश्च नियुनक्ति यथाधिकारमिति वयमनुभवामः। न खल्वितरनिरपेक्षो राजा एकाकी कार्याणि साधयितुं क्षमते। राज्यनिर्वहणं नाम महत्कठिनम्। एकीभूय स्थितानां विघटनं सुकरम्, भेदेनावस्थितानामेकीकरणं दुष्करम्। श्रमेण निर्मितस्य महतः प्रासादस्य विध्वंसनं सरलम्, भिन्नाभिरिष्टिकाभिः प्रासादनिर्माणं कठिनम्; विभिन्नैस्तन्तुभिः पटवयनं प्रयाससाध्यम्, एकीभूय विद्यमानानां तन्तूनां पृथक्करणमल्पायाससाध्यम्। कतिपयानामुत्साहवर्द्धनाय राज्ये आरक्षणनीती राज्यविघटनाय कल्पेत। समेषां तुल्यमारक्षणं राज्यसङ्घटनाय स्यात्। कतिपयेष्टकानां दार्ढ्याय स्नुह्या संयोजनम्, कतिपयानाञ्च विनैव स्नुहीयोगेन तथैवोपधानं गृहस्य हानिकारकं खलु भवेत्। अतो राज्यनिर्वहणाय राजा समां दृष्टिमवलम्बेत। राज्यनिर्वहणं काव्यनिर्वहणमिवेत्युपमिनोति कविर्माघः—

> क्षणशयितविबुद्धाः कल्पयन्तः प्रयोगानुदधिमहति राज्ये काव्यवद्दुर्विगाहे।
> गहनमपररात्रप्राप्तबुद्धिप्रसादाः कवय इव महीपाश्चिन्तयन्त्यर्थजातम्[1]॥

उपमानमुपमेयादुत्कृष्टमिति प्रसिद्धम्। राज्यस्य काव्यमुपमानत्वेन राज्ञश्च कवय उपमानत्वेन ददद् राज्यात् काव्यं महत्तरमिति, राज्येभ्यः कवयो ज्यायांस इति, राज्यनिर्वाहादपि काव्यनिर्वाहो दुष्करतर इति च माघोऽवबोधयति। प्रकारान्तरेणेदं बाणभट्टोऽप्यभिधत्ते—

---

१. शिशुपालवधम्—११।६।

'स्वयमुत्पादितानेकचिन्ताशताकुला कविमतिरिव तरलता न किञ्चिन्नोत्प्रेक्षते'[1] इति ।

नीलकण्ठदीक्षिताः पृच्छन्ति—

'कियत्सु दृष्टिः कविना न देया किमस्ति राज्ञामियतीह चिन्ता' इति ।

एवं बहुविधावधानभाजः कवेर्विभिन्नजातीयपात्रनिर्वाहः श्लाघनीय एवेत्यत्र न कश्चन सन्देहः । कवेः पात्रचयनमिदं समदृष्ट्यास्मान् शिक्षयति, अथवा तात्कालिकीं समाजस्थितिमवबोधयति यद् विविधवर्ण-स्वभाव-जातिभेदेन भिन्ना अपि यथाधिकारं सम्भूय कार्याणि साधयितव्यानीति ।

देवयोनावपि जातिभेदमुपदिशति श्रुतिः—

'देवविशः कल्पयितव्या इत्याहुस्ताः कल्पमाना अनु मनुष्यविशः'[2] इति ।

अत्र सायणेन स्वीये भाष्ये सप्रमाणमित्थं देवयोनिषु चतस्रोऽपि जातयः स्पष्टं दर्शिताः । देवेषु ब्राह्मणः, अग्निर्बृहस्पतिश्च । देवता पात्राणि—इन्द्रः, वरुणः, सोमः, रुद्रः, पर्जन्यः, यमः, मृत्युरीशानश्चेति । देवेषु विशः, अष्टावसवः, एकादश रुद्राः, द्वादश आदित्याः, विश्वेदेवा मरुतश्चेति । इमे गणदेवा इत्याख्यायन्ते । देवेषु पूषा शूद्रत्वेन परिगणितः । इमे च देवा स्मार्तश्रौतकर्मसु यथाविधि मिलिता हविर्भाजो भवन्ति । श्रुतिसिद्धं पन्थानमवलम्ब्यैव राजभिः कविभिश्च गन्तव्यमिति हेतोर्बाणभट्टोऽपि स्वप्रबन्धे नैकजातीयानि पात्राणि परिकल्प्य तैः काव्यनिर्वहणं कुर्वन् सामाजिकैर्भवद्भिरपि लोकनिर्वहणं कर्तव्यमित्यवबोधयति । एवं कादम्बर्यां स्थितानां पात्राणां निर्वाहे कविरनितरसाधारणीं शैलीमाबिभर्ति ।

सम्प्रति प्रत्येकं पात्रस्य निर्वहणे कवेः कीदृशं सामर्थ्यमिति पश्यामः । सर्वेषां पात्राणां विवेचने लेखस्य विस्तरभिया कतिपयानामेव पात्राणां निर्वहणं प्रदर्शयामः । पात्रेषु राजा शूद्रको विदिशाया अधिपतिर्गुणगणाभरणैर्भूषितः सर्वशास्त्रशाणोपलकषितशेमुषीकः सकलकलाकलापकुशलो रसिकाश्रयो विदग्धाग्रणीश्च । वलयमिव हेलया स भुजेन भूवलयमारमुदवहत् । विजितेन्द्रियो महासत्त्वस्तृणमिव लघुवृत्तिस्त्रैणमाकलयाम्बभूव । काव्यप्रबन्धग्रथने विविधशास्त्रविषयालापे वीणावादने समागतातिथिमुनिजनचरणशुश्रूषादौ च रतो नक्तंदिवमत्यवाहयच्छूद्रकः । साधारणजन इव मद्यनृत्यादिलीलासु नायं लोलुपोऽभवत् । अस्यामात्या अमरगुरुमपि प्रज्ञयोपहसन्तोऽनेककुलक्रमागताः, असकृदालोचितनीतिशास्त्रनिर्मलमनसः, अलुब्धाः स्निग्धाश्च बभूवुः । अद्यतना इवामात्या यत्किञ्चन वेदिनो यत्किञ्चन कारिणो यत्किञ्चनोपदेशिनो वा नासन् । तस्माद् राज्ञोऽपथप्रवृत्तेरवकाश एव नासीत् । एवं राज्ञोऽमात्यानाञ्च स्वरूपं वर्णयन् कविः शिक्षयति शासनसूत्रधारिणोऽद्यतनान् ।

इदमिह विशेषतः कवेश्चित्रणं ध्यानार्हं यत् प्रतीहार्या चाण्डालकन्यकागमने निवेदिते उपजातकौतुको राजा पार्श्वस्थानां राज्ञां मतं चक्षुषैवावगत्य प्रतीहारीमादिशति 'को दोषः, प्रवेश्यताम्' इति । धर्मासनमधितिष्ठन् राजा स्वायत्तः, अमात्यानां राज्ञां वानुमतिमनपेक्ष्यैव

१. कादम्बरी—पृ० ४११, निर्णयसागरसंस्करणम् । २. ऐ० ब्रा० २।३ ।

समासदनप्रवेशायादेशमर्हति; किन्तु तथा नाकरोदयम्। पार्श्वस्थानां कौतूहलेन तस्याः प्रवेशानुमतिं विज्ञायैवादिशत् तां प्रवेष्टुम्। मातङ्गकुमारीमुखेन धर्मासनोपवेशनानुरूपं राज्ञो वेषमवबोधयति कविः—'अमृतफेनधवले दुकूले वसानः, अतिसुरभिचन्दनानुलेपनधवलितोरःस्थलः, ईषदालम्बि-कर्णोत्पलः, आमोदितमालतीकुसुमशेखरश्च शूद्रको मातङ्गकन्यया ददृश इति। अद्यतनशासकानां वेषं तदानीन्तनशासकानां वेषञ्च पश्यतामस्माकं नूनं विस्मय एव जायते, कियत्परिवर्तनम-भवदिति। राज्ञोऽयं वेषस्तदीयस्वभावमवद्योतयति यदयमत्यन्तशुद्धस्वभाव इति। अकलङ्क-लावण्यवतीं मातङ्गकन्यां निरीक्ष्य राजा सत्यमेव चिन्तितोऽभवत्—'अहो विधातुरस्थाने रूपनिष्पादनप्रयत्नः, सर्वथा धिग् धातारमसदृशसंयोगकारिणम्' इति। चण्डालकन्यानीतस्य शुकस्य मनुजस्येवाभिमतविषये बुद्धिपूर्वां प्रवृत्तिमनुभूयासङ्कीर्णवर्णप्रविभागामभिव्यक्तमात्रानुस्वार-संस्कारयोगां गिरमाकर्ण्य विस्मितस्तं स्वनिवासं नेतुं सेवकमादिश्य धर्मासनादुत्थितो गच्छन् मातङ्गकन्यां स्वयमेवाभिदधे 'विश्रम्यताम्' इति।

अनेन सन्दर्भेण शूद्रकस्य सरलता विमृश्यकारिता च द्योत्यते। चाण्डालकन्यायाः सौन्दर्येण सत्यं समाकृष्टो राजा, किन्तु शास्त्रमर्यादामवलम्ब्य यदाचरितवान् तेन राज्ञो विमृश्य-कारित्वं स्पष्टं प्रतीयते। यज्जातेर्यादृशी मर्यादा तत्परिपालनं राजभिः कर्तव्यमेव, विशेषेण प्रशासकैः। अद्यतनेषु दिनेषु वैपरीत्यमेव पश्यामः। प्रतिलोमविवाहे सङ्करजातिविवाहे च लोकान् प्रेरयन्तः पुरस्कुर्वन्तश्च शासका विलोक्यन्ते। सभामण्डपं सा कन्या प्रवेशिता, समुचिता वासादिपरिकल्पेन सत्कृता च शासकेन शूद्रकेण। इदमनुकरणीयं चरित्रं शूद्रकस्य। अतिसङ्कुलेषु राज्यकार्येषु निरन्तरं संलग्नोऽपि नित्यनैमित्तिककर्मणामाचरणे भगवत्पूजनेऽतिथीनामातिथ्य-सम्पादने च राजा बद्धश्रद्धाभक्तिरासीत्। तदिदम्—'सम्पादितपितृजलक्रियस्य मन्त्रपूततोयाञ्जलिना दिवसकरमभिप्रणम्य देवगृहमुपेत्योपचरितपशुपतिपूजनस्य ततो निष्क्रम्याग्निकार्यं निर्वर्तितवतः' इति वर्णयता बाणेनाविष्कृतम्। तदनु स्वाहारं निर्वर्त्य 'कश्चिदभिमतमास्वादितमभ्यन्तरे भवता किञ्चिदशनंजातम्' इति स्वयमेव शुकं पृच्छन् महीपतिः स्वाहार इव परकीयाहारेऽपि समुचित-मवधानं सहृदयवैशाल्यञ्च प्रकटयति। इदं तदानीन्तनस्य शासकस्य चित्रणम्।

किञ्चात्र कथासन्दर्भे निगूढं विषयान्तरं कविर्घटयति। कथानायकश्चन्द्रापीडः चन्द्रस्यैव रूपान्तरम्, शूद्रकश्च चन्द्रापीडस्य रूपान्तरमिति प्रथमं तद्वर्णनपुरस्सरं कथामुपक्रममाणः कविर्भङ्ग्यन्तरेण कथाया आदावेव नायकसम्बन्धं घटयति। स्वयं चन्द्र एवेति चन्द्रापीड एवेति वा शूद्रकोऽप्यादौ न वेद। यः शुको विदितसकलशास्त्रार्थः स्वगिरा शूद्रकं विस्मापयामास, यश्च स्वयं पुण्डरीकस्य जन्मान्तमिति स्मरत्येव, सोऽपि शूद्रकाय कथां कथयन् प्रियसुहृच्चन्द्रापीड एव स्वकथां पप्रच्छेति लक्ष्मीकृतप्रबोधपर्यन्तं नैवावेदीत्। एवं सति कथं पुनरात्तं कथमनाकर्ण्य श्रोतृवर्गः शूद्रकं चन्द्रापीडरूपान्तरं जानीयात्? शुकमुखात् कथां स्वयमपि त्वरिततरं श्रोतु-मिच्छन् 'शूद्रकस्य कथायां सम्बन्धमधिकृत्य' नैव कश्चिच्चिन्तयेत्। अथ कथञ्चिच्चिन्तयितुं प्रवृत्तोऽपि शुकमुखात् कथां श्रोतुमिच्छुः शूद्रकोऽपि कश्चिदस्मादृशः श्रोतेवेति, न त्वस्य कथायां कोऽप्यवधानार्हः सम्बन्धोऽस्तीति च मन्येत। वस्तुतः शूद्रकस्य स्थितं प्राधान्यमादौ न प्रत्यय-यितव्यमित्यभिप्रायेणैव कविरित्थं निगूहयामासेति प्रतिभाति। इदञ्च निगूहनं कथायां कमपि चमत्कारातिशयमावहत् कवेर्वैदग्ध्यमेव सत्यापयति।

कथानायकश्चन्द्रापीड उज्जयिनीपतेस्तारापीडस्य महिष्या विलासवत्याश्च पुत्रः। दम्पत्योस्तपस एव महतः फलं सदपत्यं चन्द्रापीडः। उचिते वयसि सर्वासु विद्यासु कलाविशेषेषु च निष्णात इति शुकनासवचनात् प्रतीमः। स चन्द्रापीडं गुरुकुलात् समागतं विलोक्य 'विदितवेदितः' इति 'अधीतसर्वशास्त्रः' इति तस्य नाल्पमप्युपदेष्टव्यमस्तीति वदति। अनेन विद्याविनयसम्पन्नत्वं चन्द्रापीडस्य स्पष्टम्। यथाऽस्य बुद्धिबलं तथाऽस्य शरीरबलमपि। दशपुरुषसंवहनयोग्येनायोदण्डेन नित्यं स श्रममकरोदिति कथयन् बाणः शरीरबलमप्यस्यातुलमिति सूचयति। पितरि मातरि शुकनासे चामात्ये चन्द्रापीडस्यातिशयिता भक्तिः श्रद्धा चाभवदिति वर्णयन् बाणः सामाजिकानुपदिशति—यद्विद्याध्ययनस्य विनयसम्पत्तिरेव फलमिति, 'विद्या ददाति विनयम्' इत्यभियुक्तोक्तेः। अधुना तु विद्याध्ययनस्य विपरीतमेव फलं छात्रेष्वनुभवामः।

अधीत्य गुरुकुलात् प्रत्यावर्तनसमये तारापीडः कञ्चनाश्वमिन्द्रायुधनामानं चन्द्रापीडाय प्रेषयामास। इन्द्रायुधस्य दर्शनेन विस्मयोऽस्य हृदयं पस्पर्श। 'दैवतान्यपि मुनिशापवशादुज्झितनिजशरीराणि शरीरान्तराण्यध्यासत एव' इति चन्द्रापीडश्चिन्तयाम्बभूव। 'महात्मन्नश्व यो ऽसि, सोऽसि, नमोऽस्तु ते, सर्वथा मर्षणीयोऽयमारोहणातिक्रमोऽस्माकम्' इत्यामन्त्रयाञ्चक्रे। 'स्वशयनीयगृह एवेन्द्रायुधस्यावस्थानमकल्पयत्'। ऋषिकुमारकः कपिञ्जल एव खल्विन्द्रायुधात्मना अवततार इत्यजानन्नेव चन्द्रापीडः कथयति—'आवेदयतीव मदन्तःकरणमस्य दिव्यताम्' इति। एवमिन्द्रायुधे दिव्यत्वबुद्धिरेवैनं प्रेरयामास यत्स्वयमेव तस्य पुरो यवसदानाय। केचन विद्याविनयसम्पन्ना अपि प्रत्युत्पन्नमतयः प्रबुद्धाश्च न भवन्ति। चन्द्रापीडं प्रबुद्धं चित्रयति कविः। स्वस्य यौवराज्याभिषेकः पित्रा अमात्यैश्च निश्चितः। अस्मिन्नवसरे प्रवयसः प्रणन्तव्याः। तत्रापि विशेषतः शुकनासः। अतस्तस्मादाशिषो गृहीतुमागतं चन्द्रापीडं सदुपदेशयोग्यं निश्चित्य शुकनास उपदिशति। प्रकृत्यैवायं धीरः, पित्रा साधुसमारोपितसंस्कारः, न तरलहृदयः, नाप्यप्रतिबुद्धः, तथापि तद्गुणगण एनं शुकनासं मुखरीकृतवान्।

राज्ञां वर्तनं कीदृशम्, कथञ्च वर्तन्ते सम्प्रति ? गर्भेश्वर्यम्, अभिनवं यौवनम्, अप्रतिमा रूपसम्पत्तिः, अमानुषी शक्तिश्चेत्यादयः प्रत्येकं समुदिताश्च महतीमनर्थपरम्परां जनयेयुः। अत एतेभ्यः सावधानेन भवितव्यमित्याद्युपदेशं शुकनासकृतं चन्द्रापीडः सम्यगवधारयाञ्चक्रे। नायमद्यतन इव गजनिमीलितेन समवधार्य हितोपदेशिनं गुरुमावेदितवान् चन्द्रापीडः; किन्तु ताभिरुपदेशवाग्भिः क्षालित इव, निर्मृष्ट इव, पवित्रीकृत इव च प्रीतमना बभूव। एतेन चन्द्रापीडो विद्यावान्, विनीतः, महासत्त्वः प्रबुद्धश्चेति कविश्चित्रयति।

राजकुमाराः पित्रमात्यादिनियन्त्रणे विद्यमानाः पूर्वोक्तगुणसम्पन्नाः प्रायो भवेयुः। किन्तु स्वदोषं स्वासमीक्ष्यकारित्वञ्च न जानीयुः। अस्माकं कथानायकस्तु न तादृशः। यौवराज्याभिषेकानन्तरं राजभिः कर्तव्यो दिग्विजयः। तदर्थं प्रस्थितोऽयं सर्वान् राज्ञो विजित्य क्रमेण वसुधां प्रदक्षिणीकृत्य निखिलधरणीतलपरिभ्रमखिन्नस्य निजबलस्य विश्रान्तिहेतोररिजनैर्जित्वा स्वायत्तीकृते सुवर्णपुरे कतिपयान् दिवसानतिबाह्यैकदा इन्द्रायुधसहायः कान्तारेषु परिभ्रमणावसरे किन्नरमिथुनं विलोक्य तद्ग्रहणलालसो बहुदूरमगच्छत्। अन्ततो बहुदूरगमनमेव फलं जातम्, किन्नरमिथुनञ्च नासादितवान् सः। इत्थं निरर्थकमायासितमात्मानमवगत्य स्वयमेव जहास। तुरगवेगेन किन्नरमिथुने बद्धदृष्टित्वाच्च तस्मिन् घोरे महावने चन्द्रापीडेन पन्था न

निरूपितः। न तत्र कश्चन मर्त्यधर्मा सुवर्णपुरगामिमार्गोपदेशकः प्रयत्नेनाप्यासादितः। तत्र कविः चन्द्रापीडं चित्रयति—"आत्मकृतानां हि दोषाणां नियतमनुभवितव्यं फलमात्मनैव" इति तत्त्वमवधारयन् चन्द्रापीडः स्वकृतोऽप्ययं दोष एवेति सम्यगवागच्छत्। अन्ते च 'अहो मे मूर्खतायाः प्रकारः' इति वदन् स्वकीय एवात्मा तेन गर्हितः, नात्र तस्य स्वस्मिन् गुणत्वाभिमान आसीत्, न चाप्येवमात्मान आयासे, किन्नरमिथुनमेव कारणमिति तन्निनिन्द।

पश्यति परेषु दोषानसतोऽपि जनस्सतोऽपि नैव गुणान्।
विपरीतमिदं स्वस्मिन् महिमा मोहाञ्जनस्यैषः॥

इत्युक्तं मोहाञ्जनं चन्द्रापीडचक्षुषोर्न लिप्तमिति प्रतीयते। एतेनायं स्वगतदोषज्ञोऽप्यासीदिति सिध्यति। 'दोषज्ञः पण्डितो बुधः' इति ह्यनुशासनम्।

एवमात्मानमसमीक्ष्यकारिणमवधारयन्नविचलितमनाः क्रमेणाच्छोदसरसो दर्शनम्। तत्र प्रथममिन्द्रायुधस्य सान्त्वनम्, मधुरस्य वीणागानस्य श्रवणम्, अतिसुन्दरस्य शिवमन्दिरस्य दर्शनम्, तत्र च षोडशवर्षीयायाः शिवाराधनपरायाः महाश्वेताया विलोकनश्चेत्यादीनि सम्पद्यन्ते स्म। तत्र चन्द्रापीडस्य महाश्वेतायाश्च चित्रणमत्यद्भुतं कवेर्वैदग्ध्यमनुभवामः। विविक्तो देशः, यौवनं वयः, अनितरसाधारणं सौन्दर्यमुभयोः, तथापि मनसिजविकारस्य स्थानमुभावपि न लभेताम्। इदमसमन्नायकस्य चित्रणम्। सत्यवसरे पात्रान्तराणां चित्रणं कवेः कीदृशमिति विवेचनीयो विषयः स्यादिति शम्।



साहित्यदृष्ट्या न्यायस्वरूपमीमांसा

श्रीगिरीशदत्तपाण्डेयः

अनुसन्धाता—सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणसी

प्रमाणैरर्थपरीक्षणं न्यायः

काव्यभारतीयं सुरभारतीति व्यपदिश्यते। तद्द्वारोद्घाटनविधानं तु "आत्मा वाऽरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च"[1] इति साक्षाद् भगवती श्रुतिः श्रावयति। "एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति"[2] इति परमर्षिपतञ्जलिपरिबोधिततया सरण्या ज्ञातशब्दानां सम्यक् प्रयोग एवाभ्यर्हितः। शब्दविषयकसम्यक्त्वप्रतिपादनस्य पदशास्त्रैकबोध्यत्वाद् नवानामपि व्याकरणानां प्रामाण्यं सर्ववादिसम्मतम्। 'यथा लोके तथा वेदे' इति हि सार्वजनीनः समयः। 'वेदाद् धर्मो हि निर्बभौ'[3], 'वेदोऽखिलो धर्ममूलम्'[4] इति मनुवचनावलम्बनाद् जनजीवनस्याधीतिबोधाचारप्रचारादिकं यत्किमपि जगति तदाम्नायमूलमेव। प्रमाणादेव प्रमेयसिद्धिरिति सिद्धान्तपारवश्यात् शास्त्रमूलिकैव प्रमाणव्यवस्था व्यवहारेऽस्माभिरिष्यते। लोकव्यवस्थाऽपि विधिपूर्वकैव भवति। 'वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे'[5] इति मन्वभिभाषणात्। मानवानाम् आचार-विचार-व्यवहारा प्रमाणसापेक्षा एवोचिताः, अप्रमाणस्य सन्दिग्धत्वात्। 'संशयात्मा विनश्यति'[6] इति गीतोक्तेश्च। सन्देहोन्मूलनं मननक्रमेण शास्त्रसिद्धाधारेणैव भवति। तदुक्तं गीतायाम्—

> किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।
> तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥[7]
>
> यः शास्त्रविधिमुत्सृज्य वर्त्तते कामकारतः।
> न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥
>
> तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
> ज्ञात्वा शास्त्रविधानोक्तं कर्मकर्त्तुमिहार्हसि॥[8]

अतः सन्दिग्धे वस्तुन्याचारे विचारे व्यवहारे परमार्थे वा प्रत्यक्षानुमानागमानामेव प्रामाण्यं कवीनामभिमतम्।

नापि केवलं प्रत्यक्षस्यैव तत्त्वम्, जगति उचितानुचितन्यायान्यायादीनामुभयथा प्रत्यक्षरूपत्वात्। सन्ति नैकविधा घटनाः, या न कोऽपि स्वप्नेऽपि द्रष्टुमिच्छति। प्रत्यक्षमात्रस्यैव प्रामाण्याभ्युपगमे स्त्रीषु गम्यत्वागम्यत्वविषयकविचारा ज्येष्ठत्वकनीयस्त्वादिविचारा अपि न

---

१. बृ० उ० २।४।५;४।५।६।
२. म० भा० ६।१।८४।
३. मनु० २।१०।
४. मनु० २।६।
५. मनु० १।२१।
६. गीता–४।४०।
७. श्रीमद्भगवद्गी० ४।१६।
८. तत्रैव–१६।२३–२४।

संगच्छेयुः, प्रत्यक्षतः समवयोवतीनां भगिनीपत्निमातुलानीनां वैशिष्ट्यानुपलम्भात्। अतः प्रत्यक्षमात्रवादिनां चार्वाकादीनां मतमनुपादेयमेव।

नाप्यनुमानं केवलं प्रमाणमिति वाच्यम्, तस्य पौरुषेयत्वेन परिमितत्वात्, पुंदोष-शंका-संशयादिसम्पृक्तत्वेन व्यवहारनिर्णायकत्वे दोषाभावाभावात्। प्रत्यक्षस्यानन्तरमनुमानस्योदयेन प्रत्यक्षाधिष्ठितमनुमानमेव व्यवहारमीमांसायां प्रमाणमित्यपि तुच्छमेव, प्रत्यक्षविचिकित्सिताया पुरुषपण्डाया अनुमापनायोग्यत्वात्, कुतो न्यायावगतिः? क्व वा मीमांसाप्रसरः? एतेन केवल-प्रत्यक्षमूलमनुमानं प्रमाणमिति वदन्तः प्रत्याख्याताः।

नापि केवलं गुरुवाक्यं प्रमाणम्, तेषां बहुज्ञत्वेऽप्यसर्वज्ञत्वात्। न वा केवलमागममेव प्रमाणमिति शक्यं वक्तुम्, तेषामपि सम्प्रति कालकवलीकृतत्वात्, समुपलब्धेष्वपि पाखण्ड-विवादमतमतान्तरविटपाकीर्णत्वात्। केवलप्रत्यक्षतन्मूलानुमानमिति प्रामाण्यपक्षस्येवात्रापि दोषसम्भवात्, न न्यायावगमो न वा मीमांसास्फूर्तिः। एवमेव केवलानामर्थापत्तिसम्भवैतिह्या-दीनामपि विषयं बोद्धव्यम्।

भामहादीनां रीत्या तु मन्त्रब्राह्मणारण्यकोपनिषत्स्मृतिपुराणोपपुराणसंहिताः, आयुर्वेदा-दिकमुपवेदा एव प्रमाणतावच्छेदककुक्षिप्रविष्टाः। वेदशब्दानां नित्यत्वमिव तदर्थभूतानां पुराण-स्मृतिशास्त्राणामप्यर्थतो नित्यत्वम्। अत आह महाकविः—'श्रुतेरिवार्थं स्मृतिरन्वगच्छत्'[1] इति।

मन्त्रभागस्यैव वेदत्वाभ्युपगमे समुपलब्धसंहिताशब्दानां स्वरतोऽर्थतः शब्दतश्च परिगणि-तत्वात् 'अनन्ता वै वेदाः' इति श्रुतिरप्यतिशयोक्तिमात्रमेव स्यात्। वेदस्योपरि अनृतत्वं च प्रसज्येत। व्यवहार-न्याय-मीमांसायां काव्यत्व-शास्त्रत्व-धर्मत्वादिनिर्णये मन्त्राणामुपयोगाभावात्, सति सम्भवे क्वाचित्कत्वाङ्गीकाराच्च। एतेन मन्त्रमात्रप्रमाणवादिनः प्रत्यक्षवादिसब्रह्मचारिणो विचारव्यामुग्धाः प्रत्याख्याताः। अत एव साङ्गाः सरहस्याः सकल्पाः सानुशासना वेदा एव विधिनिषेधावगतौ प्रमाणम्। तदुक्तम् भामहेन—

देशकालकलालोकन्यायागमविरोधि च।
प्रतिज्ञाहेतुदृष्टान्तहीनं दुष्टं च नेष्यते॥[2]
न्यायः शास्त्रं त्रिवर्गोक्तिर्दण्डनीतिश्च तां विदुः।
अतो न्यायविरोधीष्टमपेतं यत्तया तथा[3]॥

निखिलान्यपि शास्त्रजालानि काव्य-न्याय-मीमांसायां नियमादिनिरूपणे च साहाय्य-मारचयन्ति। काव्यमङ्गी शास्त्राण्यङ्गानि। शास्त्रात्मा हि लोकोत्तरवर्णनानिपुणं कविकर्म। तदेव च काव्यम्।

यथा धर्माधर्मादिव्यवहारमीमांसायां धर्मशास्त्राणाम्, ब्रह्मजीवादिमीमांसायां वेदान्तादी-नाम्, दण्डादिनिर्णये विधिशास्त्राणां प्रामाण्यं भवति, तथैव काव्यत्वाकाव्यत्वकाव्याभासत्वादि-मीमांसायां काव्यशास्त्रमेव प्रमाणम्। साहित्य-काव्यानुशासन-काव्यालङ्कार-काव्यमीमांसादयः शब्दाः पर्यायाः। एवं पद-पदार्थ-वाक्य-वाक्यार्थमीमांसावदेव काव्यमीमांसाया अपि प्राची-

---

१. रघु० २।२। २. काव्यालङ्कारे–४।२। ३. काव्यालङ्कारे–४।३९।

नत्वम् । संस्कृतसाहित्येतिहासादौ भामह एवादिमः काव्यमीमांसाप्रवर्तक इति निरूपणपरम्परा तु भामहादिविरुद्धैव[1] ।

वेद-वेदार्थयोर्नित्यत्वमिव काव्यानामपि शिष्टानुगृहीतप्रवाहनित्यत्वमक्षतम् । इत्थं च श्रुतेः, तन्मूलायाः स्मृतेः, तदविरुद्धानां शिष्टाचार-विचार-व्यवहारोपपादकयुक्त्युक्तीनाम्, तदविरुद्धलोकानाञ्च साहित्यदृष्ट्या प्रामाण्यं सिद्धम् ।

शब्दानां सुप्रयोगभूमिः काव्यम्

तत्र प्रकृतिप्रत्ययादीनां संस्कारद्वारा शब्दानामनुशासनार्थं प्रवृत्तं व्याकरणशास्त्रम्, **'अथ शब्दानुशासनम्'**[2] इति शेषोक्तेः । तेषां शब्दानां कथं समुपयोग इति चेत्, काव्याद्युपलक्षितव्यवहारेष्विति गृहाण । न च वेदेषु पौरुषेयशब्दसंघटनसम्भवः, अपौरुषेयत्वात् । जन्यत्वेऽनित्यत्वापत्तेश्च । न चेष्टापत्तिः, मन्वाद्याचार्यपरम्परावैयाकुलीभावप्रसङ्गात् । न वाभ्युपगमः, **'वाचा विरूपनित्यया'**[3] इत्यादिश्रुतिवैयर्थ्यात्, युक्तिहीनत्वाच्च । न च पुराणादीनाम् अनित्यत्वमिति वाच्यम्, श्रुत्यर्थत्वेन तेषामपि नित्यत्वाङ्गीकारात् । आनुपूर्वीपरिवर्त्तनसाहित्यराहित्याभ्यामेव वेदपुराणयोरन्तरम्, नार्थतः ।

वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् ।
वेदाध्ययनसामान्यादधुनाध्ययनं यथा[4] ॥

अध्ययनमात्रं गुरुपूर्वकम्, तच्च सर्वत्रेष्टमेव । अत एव श्रुतिस्मृतिपुराणेषु प्राप्ता गुरुपरम्पराः सङ्गच्छन्ते ।

अथ यदि ऋषिप्रोक्तत्वात्, कविकर्मरूपत्वाच्च पुराणकाव्यादीनां पौरुषेयत्वेन जन्यत्वाच्चानित्यत्वमित्युच्यते, तर्हि वेदानामस्मदुच्चरितत्वेन, काठककालापादिवद् ब्रूहि तेषामप्यनित्यत्वम् । जन्यत्वेन पौरुषेयत्वमनित्यत्वञ्चास्त्येव । यद्वा माऽस्त्वपौरुषेयत्वम्, नित्यत्वन्तु भविष्यति । **'पुरुषविशेष[5] ईश्वरः'**, **'कविरेकः प्रजापतिः'**[6], **'पश्य देवस्य काव्यं न ममार न जीर्यति'**[7] इत्यादयो वाक्ययुक्तयश्चात्रानुसन्धेयाः । प्रवाचक-कर्त्रोरभेदश्च व्यवह्रियत एव । शब्दार्थयोरुभयोरपि काव्याचार्यैर्नित्यत्वमभ्युपगन्तव्यम् ।

न च शब्दो नित्यः, न त्वर्थः, अतः स्मृतिपुराणकाव्यानि अनित्यानि, अर्थानित्यत्वादिति वाच्यम्, उभयनित्यताया काव्यवेदसिद्धत्वात् । न च **'रमणीयार्थप्रतिपादकः शब्दः काव्यम्'**[8] इति रसगङ्गाधरोक्तमसङ्गतम्, तस्य श्रव्यकाव्यपरत्वात् । काव्यत्वं न केवलं शब्दवृत्तिः, न वा अर्थमात्रवृत्तिः । किन्तर्हि ? वाक्यवृत्तिः । नाट्यानामपि कृते काव्यशब्दव्यवहारः, **'दृश्यश्रव्यविभेदेन पुनः काव्यं द्विधा मतम्'**[9] इति साहित्यदर्पणोक्तेर्नाटकानामभिनेयदशायामेव दृश्यत्वम्, अन्यथा श्रव्यत्वमेव । तस्मादितरेतराध्यस्तत्वाच्च शब्दार्थयोरैक्यमभ्युपगम्यैवाचार्येण जगन्नाथेन

---

१. काव्यालङ्कारे १।१०,१३,१४; काव्यादर्शे १।२,३,४ । २. म० भा० ।
३. ऋ० सं० ८।७५।६ । ४. मी० न्या० प्र० पृ० ७ पं० २ ।
५. पा० यो० सू० । ६. अग्निपु० ३३९।१० । ७. ऋ० सं० ।
८. रसगंगाधरे १ आनने १ सूत्रम् । ९. साहित्यदर्पणे ६।१ ।

'यः शब्दः सोऽर्थः, इति न्यायादुक्तं शब्दः काव्यम्' इति । शब्दार्थयोरुभयोरपि 'वाक्'शब्देनैव श्रुतिषु व्यवहारः । अत्र श्रुतिः—

यस्तु प्रयुङ्क्ते कुशलो विशेषे
शब्दान् यथावद् व्यवहारकाले ।
सोऽनन्तमाप्नोति जयं परत्र
वाग्योगविद् दुष्यति चापशब्दैः ॥[1]

अत्र वाक्पदार्थस्तु 'वक्तीति वाक् शब्दः, उच्यते योऽसावर्थः, उच्यतेऽनयेति सम्बन्धः' इति निरूपितं ध्वनिव्याख्याने ।।यत्रार्थशब्दो वा (१।१३ ध्व० लो०) इति ध्वनिं लक्षयतामालङ्कारिकसरणिव्यवस्थापकानां ध्वनिप्रस्थापनपरमाचार्याणामानन्दवर्धनानां वाचोयुक्ति विवेचयद्भिर्महामाहेश्वरैरभिनवगुप्तपादाचार्यैः[2] ।

'वाक् च वाक् च सम्बन्धश्च' वाक्पदार्थः । 'सिद्धे शब्दार्थसम्बन्धे' इत्यत्रत्यं महाभाष्यमपि तथैव योजनीयम् । अत एव च 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः'[3] इति जैमिनिः 'शब्दार्थौ काव्यम्'[4] इति भामहाचार्यश्च सङ्गच्छेते । शब्दाद्बोधः, ततश्चेच्छा, ततः क्रिया । लोके यथा गोधूमबीजस्य फलं गोधूम एव, नान्यः; तथैव शब्दस्य शब्दोऽपि । बीजं शब्दः फलमर्थः । परमार्थतो बीजफलयोरैक्यम् । अत एव वैयाकरणाः शब्दनित्यत्वमिच्छन्ति । तार्किकास्तदनित्यत्वम् । 'काव्यमीमांसा' पराभिधसाहित्यदृष्ट्योभयोरपि नित्यत्वमिति शैवागमानुसारित्वमस्माकम्[5] ।

यद्वा ज्ञानं शब्दः, इच्छाक्रिये चार्थः । तयोर्ज्ञानाभाववतोऽदर्शनात् । ज्ञानस्य चेतनवृत्तित्वाच्च तयोरिच्छाक्रिययोः शब्दान्वयव्यतिरेकानुविधायित्वमेव । वाचि तिष्ठतीति वाक्यम् । शब्दार्थसम्बन्धबोधादेव वाक्यार्थोदयः । अत एवाकांक्षादिवशात् शब्दसमुदायो वाक्यम् । वाक्यमपि प्रबन्धान्तर्गताङ्गवाक्याङ्गभूतपदार्थो वाक्यार्थाङ्गम् । वाक्यार्थश्च महावाक्यार्थाङ्गम् । तदुक्तम्—

स्वार्थबोधसमाप्तानामङ्गाङ्गित्वव्यपेक्षया ।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते[6] ॥ इति ।

साहित्ये मीमांसाशैलीविकासः

सर्वेऽपि प्रेक्षावन्तोऽप्रतिपन्नमर्थमितरेभ्यो ज्ञात्वा इष्टसाधने प्रवर्तन्ते; अनिष्टसाधनेभ्यश्च निवर्तन्तेतराम् । एवं लोकयात्रां निष्पादयति कामधेनुकल्पः शब्दः । तत्रापि प्रत्यक्षादिप्रमाणेभ्योऽतीतानागतवर्तमानविषयप्रकाशकेभ्योऽतिशेतेऽयं शब्दः ।

---

१. महाभाष्ये प्रयोजनभाष्यम् (पस्पशाह्निके) । २. द्रष्टव्यम्—१।१३ कारिकाया लोचनम् ।
३. मी० द० १।१।५ । ४. का० प्र० १ पु० १ सू० ।
५. द्रष्टव्यम्—देव्यथर्वशीर्षम्—'अहं ब्रह्मस्वरूपिणी । मत्तः प्रकृतिपुरुषात्मकं जगत् । शब्दानां ज्ञानरूपिणी ज्ञानानां चिन्मयानन्दा...' इत्यादिः (मं० सं० २, ३२४) ।
६. सा० द० परि० २, पृ० २५ ।

अत एव च—

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् ।[1]
यदि शब्दाह्वयं ज्योतिरासंसारान्न दीप्यते ॥

इति शब्दस्य ज्योतिस्वरूपता दण्डिना काव्यादर्शे प्रोक्ता संगच्छते। यतो हि लोका असकृदवगतमर्थं न बुभुत्सन्ते, न वा प्रतिपादयन्ति, तथा सत्यबुभुत्सितार्थविबोधनेऽनवधेयवचनत्वात् ते न परीक्षकाः, नापि लौकिका इत्युन्मत्तवदुपेक्षणीया स्युरिति दोषं प्रतिपादयन्ति तात्पर्याचार्या मैथिलविद्वन्मण्डलमालालालितचरणयुगलाः श्रीमद्वाचस्पतिमिश्राः। अतोऽनधिगतं वाक्यार्थमेवात्रबुभुत्सन्ते, बोधयन्ति च व्यवहर्त्तारः। तस्मात् पद-पदार्थ-वाक्य-वाक्यार्थान्यवगमयितुं तत्र तत्र प्रमाणप्रमेयसंशयादिक्रमेण न्यायानवगमयितुमेव मीमांसावतारः। तत्र वेदेषु परस्परविरोधविपरीतभावनादिना वेदवाक्यार्थविचिकित्सायां प्रवृत्तायां तदपाकरणेन वास्तवार्थमावेदयितुं विद्वद्गोष्ठीकृतविवेचनापद्धतिरेव मीमांसाख्यामलभत। तत्र निर्णीताः सिद्धान्ताः श्रुत्युक्तियुक्तिदृष्टान्तरूपा न्यायाः समभवन्। अतो मीमांसा मूलम्, न्यायः फलमिति बोध्यम्।

अयं मीमांसाशब्दः 'समेत्य मीमांसां चक्रुः' (छां० ५।११।१) 'सैषाऽऽनन्दस्य मीमांसा' (तै० २।८।१) इत्यादिस्थलेषु विमर्शपूर्वकं व्याख्यानं इत्यस्मिन्नर्थे प्रवृत्तो दृश्यते। अमुमेवार्थमुररीकृत्य मन्त्रब्राह्मणात्मकवेदराशिप्रतिपादितगूढार्थप्रकाशनपरेषु ग्रन्थेषु 'मीमांसा'शब्दोऽनन्तरं प्रचलितोऽभूत्। तत्र-तत्र स्थिताः त्रिविधा ब्राह्मणारण्यकांशा उपनिषदश्च वेदप्रतिपादितातिगहनतत्त्वस्फुटीकरणपराः मीमांसाख्यामलभन्त। तत्र कर्मज्ञानप्राधान्याप्राधान्यपरा ब्राह्मणान्युपनिषदश्च पूर्वोत्तरपक्षरूपा मीमांसाशब्देन व्यपदिष्टाः।

बहुतिथेः कालादनन्तरं बहुशाखाप्रवचनभेदभिन्नेषु ब्राह्मणादिषु यागहवनादीनां स्वरूपे कर्मणि चापाततो दृष्टाद्विरोधात् संशयाः समुदपद्यन्त। तस्मात् संशयानां निराकरणार्थं चाविरोधेन यथास्थितानां वैदिकवाक्यानाम्, बहुभिराचार्यैराश्वलायनशांखायनापस्तम्बबोधायनसत्याषाढकात्यायनद्राह्यायणादिभिः चानेकानि कल्प-गृह्य-मीमांसा-धर्मसूत्राणि रचितानि। तेषां कल्प-गृह्यसूत्रकाराणां मीमांसासूत्रकाराणां च मध्ये महाभारतपूर्वा के के चोत्तरकालीना इति यद्यपि वक्तुं कठिनम्, तथापि जैमिनेः प्राक् केचन सूत्रकारा आसन्, यैः संगृहीता बहवो लौकिकन्यायाः, लौकिकन्यायोपजीव्याः शास्त्रीया न्यायाश्चोपनिबद्धाः। तानाधारीकृत्य तैराचार्यैर्निर्मितानि संशयनिराकरणोपयोगीनि सूत्राणि।

इत्थं 'विमर्शपूर्वकं व्याख्यानम्' इत्यस्मिन्नर्थे शक्तं मीमांसापदं जैमिनेः पूर्वं शास्त्रविशेषे रूढं नासीत्। एवमेव न्यायशब्दोऽपि। मीमांसायाः फलं न्यायः, ततश्च नियमस्य नियामकत्वमित्यप्यतिरोहितमेव। अयं जैमिनिराचार्यो ब्रह्मसूत्ररचयितुर्भगवतो व्यासस्य साक्षात् शिष्यः। तदुक्तं श्रीमद्भागवते—

पराशरात्सत्यवत्यामंशांशकलया विभुः।
अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम् ॥
ऋगथर्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः।
चतस्रः संहिताश्चक्रे मन्त्रैर्मणिगणा इव ॥

---

१. काव्यादर्शः १।४।

तासां स चतुरः शिष्यानुपाहूय महामतिः ।
एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः ॥
पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ।
वैशम्पायनसंज्ञाय निगदाख्यं यजुर्गणम् ॥
साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम् ।
अथर्वाङ्गिरसीं नाम स्वशिष्याय सुमन्तवे[1] ॥ इति ।

शौनकं प्रति पुराणाचार्येण रोमहर्षणिना सुतेन ।

इत्थं लौकिकन्यायानां शास्त्रेषूपयोगपरम्परा सुपुरातनो संस्कृतवाङ्मये विलसति । अष्टादशपुराण-महाभारत-वाल्मीकिरामायणानि संस्कृतकविभिरुपजीव्यत्वेन समाश्रितानीत्यप्यति-रोहितमेव विदुषामपश्चिमानां पुरस्तात् । श्रीमता स्व० वासुदेवशास्त्रि-अभ्यङ्करमहोदयेन मीमांसान्यायप्रकाशभूमिकायाम्—'बोधायनापस्तम्बाश्वलायनकात्यायनानां जैमिनिसूत्रेषूल्लेखाद् जैमिनेः पश्चाद्भावित्वम् उत्तरमीमांसासूत्रे जैमिनेरुल्लेखाज्जैमिनेर्व्यासात् प्राग्भावित्वम्' इति यदुक्तम्, तत्तु श्रीमद्भागवतीयद्वादशस्कन्धीयषष्ठाध्यायप्रामाण्यविरुद्धमेव ।

जैमिनेः पश्चात् पारम्परिकसूत्रव्याख्यातॄणामुच्छेदाद् वृत्तिभाष्यादीनां कालः । उपवर्षभर्तृ-मित्रादिभी रचिता वृत्तयो नोपलभ्यन्ते । पाणिनिरपि महाभारतानन्तरं सहस्रार्थैकसहस्रवर्षा-दुत्तरकाले बभूवेति युधिष्ठिरमीमांसकमतम् । मीमांसाभाष्यकृत् शबरस्वामी तु विक्रमपूर्वभावी जिनमतानुसारिभिः कृतादुपसर्गादात्मानं रिरक्षुः शबरवसतौ भिल्लमिवात्मानं गोपाययन् मीमांसासूत्रं बभाषे । श्लोकश्चात्रानुश्रूयते—

ब्राह्मण्यामभवद्वराहमिहिरो ज्योतिर्विदामग्रणीः
राजा भर्तृहरिश्च विक्रमनृपः क्षत्रात्मजायामभूत् ।
वैश्यायां हरिचन्दवैद्यतिलको जातश्च शङ्कुः कृती
शूद्रायाममरः षडेव शबरस्वामिद्विजस्यात्मजाः ॥[2] इत्युल्लेखः ।

वराहमिहिर-भर्तृहरि-अमरसिंहाः समानकालीनाः । शाबरभाष्यग्रन्थभाषाशैल्या विक्रमार्कनृपपूर्वकालभावित्वं शबरस्वामिनो निर्णीयते । काव्यानां नाटकानाञ्च न्यायानु-सारिणी मीमांसा भरतमुनिनैव प्रारब्धा । भागुरेराचार्यस्याप्युल्लेखो ध्वन्यालोकलोचने श्रीमताभिनवगुप्तेन कृतः । तथा हि 'तथा च भागुरिरपि' किं रसनामपि स्थायिसञ्चारिता-स्तीत्याक्षिप्याभ्युपगमेनैवोत्तरमवोचद्बाढमस्तीति'[3] । एतेन भागुरिरपि काव्यमीमांसाग्रन्थं प्रणिनाय, टीकयाञ्चकार वेति निश्चप्रचम् । अयमेव भागुरिः—

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥[4]

इत्यादिसन्दर्भेण वैयाकरणैः स्मृतः । पाणिनिरपि नटसूत्रम् उल्लिलेख ।

---

१. श्रीमद्भाग० १२।६।४९-५३ ।
२. मीमा० न्या० प्र० भू० पृ० ४ ।
३. ध्वन्यालोकलोचने ४२६ पृष्ठे ।
४. ल० सि० कौ० अव्ययप्रकरणान्ते, पृ० १०२ ।

वस्तुतस्तु उत्तररामचरिते वाल्मीकिभरतयोः समवर्तिता प्रोक्ता[1]। अतो धर्म-ब्रह्म-पद-पदार्थ-वाक्यवाक्यार्थसमैव काव्यमीमांसाऽतितरां प्राचीना इत्यत्र नास्ति सन्देहावकाशः। राजशेखराचार्येण काव्यमीमांसकानामाचार्यपरम्परा निरूपिता। सा च 'कविरहस्यं सहस्राक्षः समाम्नासीत्, औक्तिकमुक्तिगर्भः, रीतिनिर्णयं सुवर्णनाभः, आनुप्रासिकं प्रचेतायनः, (यमकानि) चित्रं चित्राङ्गदः, शब्दश्लेषं शेषः, वास्तवं पुलस्त्यः, औपम्यमौपकायनः, अतिशयं पराशरः, अर्थश्लेषमुतथ्यः, उभयालङ्कारिकं कुबेरः, वैनोदिकं कामदेवः, रूपनिरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः, दोषाधिकरणं धिषणः, गुणोपादानिकम् उपमन्युः, औपनिषदिकं कुचमारः, इति। ततस्ते पृथक् पृथक् स्वशास्त्राणि विरचयाञ्चक्रुः। इत्थंकारञ्च प्रकीर्णत्वात् सा किञ्चिदुच्चिच्छिदे इतीयं प्रयोजनाङ्गवती संक्षिप्य सर्वमर्थमल्पग्रन्थेनाष्टादशप्रकरणी प्रणीता[2]।

न्यायानामुद्भवः

सर्वथापि मानवोत्पत्तिमारभ्यैव मीमांसायाः प्रारम्भः। न केवलं मानवा एव, अपि तु पशुपक्ष्यादयोऽपि 'इदं भक्ष्यम्, इदमभक्ष्यम्' इति विविच्यैव भुञ्जते। ऋग्यजुःसामाथर्वाणो वेदा मन्त्रब्राह्मणात्मकाः, व्याकरणादीनि षडङ्गानि, पुराण-न्याय-मीमांसा-धर्मशास्त्राणि चत्वार्युपाङ्गानि। पुराणान्यष्टादश प्रसिद्धानि तान्येवोपपुराणानि च रामायणमहाभारतसहितानि। न्याय-वैशेषिकौ गौतमीयः कापिलो लौकिकश्च। धर्मशास्त्रं मन्वादीनि।

> पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
> वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश[3] ॥

गीतायां व्यासेनापि—

> तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
> ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि[4] ॥

इत्युक्त्वा शास्त्राणां प्रामाण्यं प्रोक्तम्।

न्यायपदार्थनिर्वचनम्

न्यायानां मीमांसैव परमप्रयोजनम्। मीमांसान्याययोरविनाभावसम्बन्धः, विचारः पूर्वोत्तरपक्षाभ्यामेव प्रसरति। ततश्च न्यायः फलति। अत एव 'मीमांसा मूलं फलं न्यायः' इत्युच्यते। पूजार्थकादपि मान धातोः सनि द्वित्वे टापि निष्पन्नो मीमांसाशब्दः पूजितविचाररूपमर्थं ब्रूते। √माङ् माने शब्दे च, √मा माने इत्येताभ्यां धातुभ्यां निष्पादितोऽयं मीमांसाशब्दः प्रमाणरूपमर्थं जनयति। 'न्यायसिद्धः' इत्यस्य प्रमाणसिद्ध इत्यर्थः। अत एव काव्यप्रकाशे मम्मटाचार्येण—'एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः'[5] इति सूत्रवृत्तौ 'द्वयोर्बहूनामलङ्काराणामेकत्र समावेशेऽपि विरोधाद् न यत्र युगपदवस्थानम्, न चैकतरस्य परिग्रहे साधकम्, तदितरस्य वा परिहारे बाधकमस्ति येनैकतर एव परिगृह्येत' इति सङ्करनिर्वचनप्रसङ्गेनोक्तम्। स्फुटीकृतश्च तेनैव—'न्यायश्च साधकत्वम्, अनुकूलता, दोषोऽपि बाधकत्वं प्रतिकूलता' इति।

---

१. द्र० उत्तररामचरिते अङ्कः ४।　　२. काव्यमीमां०—१।१।
३. या० स्मृ० १।२।३।　　४. गीता० १६।२४।　　५. का० प्र० १०।२०१।

पक्षस्य सिद्धये साधनभूतानि तानि च हेतूदाहरणरूपाणि । तदप्युक्तं तेनैव—**'पक्षधर्मान्वय-व्यतिरेकित्वेन त्रिरूपो हेतुः साधनम्'**[1] । अत्र झलकीकरः—'पक्षधर्मत्वेनान्वयित्वेन व्यतिरेकित्वेन च त्रिरूपो हेतुः साधनपदेनोच्यते' इति । सारबोधिन्यामपि—'त्रिरूप इति । पक्षसत्त्व-सपक्षसत्त्वविपक्षासत्त्वानीति त्रीणि रूपाणि' इति । यत्रानुमिनोति स पक्षः । यथा—**'पर्वतो वह्निमान् धूमात्'** इत्यत्र क्रमशः पक्षसाध्यहेतवः । एवञ्च साध्यसाधनग्रहणादेव पक्षादिकं सङ्गृहीतम् ।

पक्षे सम्बन्धः (पक्षधर्मता, पक्षवृत्तित्वम्) सपक्षवृत्तित्वम्, विपक्षावृत्तित्वं चेत्येतद्रूपत्रय-विशिष्टो हेतुः साधनपदेनोच्यते । यस्य व्यापकत्वाभिमतस्य पक्षे अयोगव्यवच्छेदः (अवश्यं सम्बन्धः) व्यापकसम्बन्धपर्यवसन्नः तत्साध्यम् । पर्वते पक्षे धूमस्य हेतोर्वृत्तित्वमस्ति, एवं वह्निरूपसाध्यनिश्चयवति महानसे धूमस्य हेतोर्वृत्तित्वमस्ति, तथा वह्निरूपसाध्याभावनिश्चयवति ह्रदे धूमस्य हेतोर्वृत्तित्वं नास्ति इति त्रिरूपेण धूमेन हेतुना पर्वते पक्षे साध्यस्य वह्नेरनुमानं भवति । इदमेवानुमानम् (परार्थम्) कविप्रतिभात्वावच्छिन्नम् अनुमानालङ्कार इत्यन्यदेतत् । काव्यानुमित्यापि रसनिष्पत्तिर्भवत्येव, अन्यानुमीयमानविलक्षणत्वात् ।

वेदेषु न्यायबीजम्

ऐतरेयब्राह्मणे—'ताः प्रग्राहं शंसति यथा वृषाकपि-वार्षाकपं हि वृषाकपेयस्तन्न्यायेन'[2] । अत्र यथा वृषाकपिनाम सूक्तं पादशो विगृह्य संशितस्तथा । तत् तस्माद् वृषाकपेर्नाम्नः सूक्तस्य न्यायं प्रकारं विगृह्य संशनरूपमेवेति ।

स ही वाच शुनःशेपः—

यः सकृत् पापकं कुर्यात् कुर्य्यादेनं ततोऽपरम् ।
नापागाः शौद्रान्न्यायादसन्धेयं त्वया कृतम् ॥

सायणः—शौद्रान्न्यायात्-नीचक्रूराचारात्[3] ।

शांखायनश्रौतसूत्रे—'यद्यत् अल्पसंख्यं तत्तत् पूर्वं कुर्वाणाः तां तां संख्यां पूरयन्ति या याः संख्याः पूरयितव्याः । यथा त्रयोविंशरात्रे पञ्चाहः षडहो द्वादशाह इति सोदाहरणम् तां तां संख्यां पूरयति' इति न्यायो व्याख्यातः । गौतमधर्मसूत्रे—'वर्णानाश्रमांश्च न्यायतो रक्षेत्'[4] । 'न्यायतः'—लोकशास्त्राविरुद्धेन मार्गेण इति मस्करिभाष्यम् ।

आपस्तम्बधर्मसूत्रे—'आध्यात्मिकान् योगाननुतिष्ठेद् न्यायसहितान्'[5] । अत्र न्याय-सहितान्—'उपपत्तिसमन्वितान्' इति शाङ्करभाष्यम् । एतेन युक्तिः = उपपत्तिः = न्याय इत्यायाति । 'अङ्गानां तु प्रधानैरव्यपदेश इति न्यायवित्समयः'[6] । अत्र 'अङ्गानां कल्पसूत्राणां प्रधानवाचिभिः छन्दोब्राह्मणं वेद इत्यादिशब्दैर्व्यपदेशो न न्याय्य इति न्यायविदां सिद्धान्तः' इति व्याख्याय शङ्कराचार्यैस्ताविमौ पूर्वपक्षसिद्धान्तौ कल्पसूत्राधिकरणे (मीमां० १३।६) द्रष्टव्याविति प्रोक्तम् ।

---

१. का० प्र०, सूत्रम्—१८२ ।
२. ऐ० ब्रा० ३०।६।५ ।
३. ऐ० ब्रा० ३३।५।४ ।
४. शां० श्रौ० सू० १३।१५।११ ।
५. गौतमधर्मसूत्रे–११।९।२० ।
६. आपस्तम्बधर्मसूत्रे–१।२३।१ ।

एतेन पूर्वपक्षसिद्धान्तसाधकानां बीजभूतानां च युक्तीनां न्यायपदवाच्यता स्पष्टं विज्ञायते ।

श्लोकवार्त्तिकेऽपि—

तस्याश्च सर्वगामित्वं तन्न्यायत्वात् प्रतीयते ।
नैकेषामेव साध्यास्ति केषाञ्चिद्वा न विद्यते[1] ॥

अत्र न्यायसुधा—तस्याः शब्दशक्तेः । तस्मिन् सर्वगामित्वे । न्यायः–युक्तिः । यस्याः शक्तेरस्ति सा तन्न्याया । तद्भावो न्यायत्वम् । कीदृशो न्याय इत्यपेक्षायाम् आह नैकेषामिति युक्तिः न्यायः ।

लौकिकन्यायसंग्रहेऽपि—'सर्वे लौकिकाः दृष्टान्ताः' लौकिक्यः कथाः (योगवासिष्ठाद्याः) न्यायत्वेनोदाहर्तुं शक्यन्ते । इत्थं 'रीतिः पद्धतिः प्रकारः युक्तिः उदाहरणं दृष्टान्तः' इति न्यायशब्दार्थाः ।

न्यायलक्षणम्

यद्यपि शास्त्रीयो लौकिकश्चोभयविधोऽपि व्यवहारः प्रमाणपरीक्षितो भवति, तथापि सर्वेषामशास्त्रज्ञत्वेन शिष्टानामाप्तानां पौरुषेयाणामपि वचसां महानादरो दृश्यते । तुल्यबलविरोधे यत्र विकल्पस्तत्रैव कुलपरम्परा प्रमाणम् । बाधितायाश्च तस्यां तर्कायावकाशो भवति । तदर्थमान्वीक्षिकी विलासः । सा च मननरूपैव । उक्तं च—

न्यायचर्चेयमीशस्य मननव्यपदेशभाक् ।
उपासनैव क्रियते श्रवणानन्तरागता[2] ॥

मननं नाम युक्त्युपपत्तिभ्यां तत्त्वचिन्तनम् । अत एव प्रमाणैरर्थपरीक्षणं न्याय इत्यप्युच्यते । प्रमाणसिद्धोऽर्थो न्याय इत्यपि पक्षः । युक्त्योपपन्नोऽर्थो न्याय इति भावः ।

न्यायस्य शरीरं द्वयङ्गम्—(१) युक्तिः, (२) उपपत्तिश्च । न्यायावयवविशेषो युक्तिः । तल्लक्षणं सरस्वतीकण्ठाभरणे—'शब्दस्यार्थस्य वा परस्परमनुपयुज्यमानस्य योजनं युक्तिः ।' सा षोढा—'पदपदार्थ-वाक्यवाक्यार्थप्रकरणप्रबन्धविषया चेति ।' दुर्बोधन्यायार्थप्रकाशाय युक्त्यालम्बनमावश्यकम् । तदुक्तमभियुक्तैः—

तत्र प्रदर्शयेद्युक्तीर्दुर्बोधोऽर्थो भवेद्यदि ।
बालोऽप्याश्रितसोपानः प्रासादारोहणक्षमः[3] ॥

इति वृद्धोक्त्या न्यायशरीरमेव युक्तिघटितम् । युक्तिमन्तरा न्यायस्वरूपार्थलाभासम्भवादेवोक्तम्—'प्रकाशते स्वरूपेण न्यायो युक्त्योपपादितः'[4] इति ।

तथा च न्यायान् प्रकाशयितुं युक्त्यालम्बनमावश्यकमेव । न्यायशब्दोऽपीदृशस्थले नीयते प्राप्यते तात्पर्यार्थो येनेति व्युत्पत्त्या—

---

१. श्लोकवार्त्तिके १।३।४।८ ।
२. न्या० कु० का० ३ ।
३. मी० न्या० प्र० भू०, पृ० ९ ।
४. मी० न्या० प्र० भू०, पृ० ९ ।

विषयो विषयश्चैव पूर्वपक्षस्तथोत्तरम् ।
पक्षद्वयफलं चैव शास्त्रेऽधिकरणं विदुः ॥

इति लक्षणलक्षितं पचाङ्गमधिकरणं वक्ति ।

वात्स्यायनस्त्वाह—'प्रमाणैरर्थपरीक्षणं न्यायः' तात्पर्यटीकायाम्—'नन्वेवमपि नीयते प्राप्यते विवक्षितार्थोऽनेनेति व्युत्पत्त्या प्रत्यक्षादिकं प्रत्येकमेव न्यायः । न चैतत् प्रत्येकं प्रयोजनमाश्रयते । अजिहासितानुपादित्सितानामप्यर्थानां प्रत्यक्षादिगोचरत्वदर्शनादित्याक्षिपति—कः पुनरयं न्याय इति ? समाधत्ते—प्रमाणैरिति । प्रत्यक्षादिप्रमाणमूलाः प्रतिज्ञाद्यः पञ्चावयवाः प्रमाणानि । तैरर्थस्य लिङ्गस्य परीक्षणं परीक्षा । परीक्षितं तु लिङ्गंपञ्चावयवोपपन्नमनुमेयप्रत्ययफलं भावयत्येव । न त्वनुमेयार्थपरीक्षा । तस्य सन्दिग्धत्वेऽपि परीक्षानास्पदत्वात् । नन्वबयवैश्चेदर्थपरीक्षणम्, न तर्हि प्रमाणैः कार्यकारणयोरभेदाभावादित्यत आह । किमुक्तं भवतीति न साक्षात् प्रतिज्ञादयोऽवयवा अर्थपरीक्षायामुपयुज्यन्ते, अपि तु स्वकारणतत्प्रमाणसूचनेन । तस्मात् प्रमाणानामवान्तरव्यापारः प्रतिज्ञादय इत्युपपन्नं प्रमाणैरर्थपरीक्षणम् । तदिदमुक्तं समस्तप्रमाणव्यापारादिति तस्मान्नैकैकं प्रमाणमिति । समस्तप्रमाणोपकरणत्वादेव चास्य परमत्वम्' इति श्रीवाचस्पतिमिश्रा व्याकुर्वन्ति । (पृ० ४१ सू० १ प्र० १ पं० २३-४२) ।

न्यायानां परिभाषाः

(१) 'अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकं वाक्यं न्यायः' इति चिन्तामणिः ।

(२) उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वमिति शिरोमणिः ।

(३) 'प्रमाणानुग्राहकस्तर्को न्यायः' इति आनन्दगिरिः ।

(४) 'समस्तोपपन्नलिङ्गप्रतिपादकं वाक्यं न्यायः' इति हरिदासः ।

(५) 'युक्तिमूलकदृष्टान्तविशेषो न्यायः' इति न्यायकोशभूमिका ।

(६) 'लोकशास्त्रप्रसिद्धदृष्टान्तविशेषो न्यायः' इति वाचस्पत्यम् ।

(७) 'स्वशक्त्या प्रवृत्तिमत्त्वं न्यायत्वम्' इति भामहः ।

(८) 'साधकं प्रमाणं न्यायः' इति मम्मटः ।

अन्येऽपि—'काकतालीयकदम्बमुकुलोऽन्यपरम्पराप्रभृतयो लौकिकाः, पदार्थवाक्यार्थप्रभृतयो न्यायाश्च दृष्टान्तविशेषा लोकसिद्धा एव न्यायपदवाच्या भवन्ति ।

न्यायभेदाः

सामान्यतो न्याया द्विविधा भवन्ति—शास्त्रीयलौकिकभेदाभ्याम् । प्रमेयभेदात् शास्त्रभेदः । तस्मात् शास्त्रीयानां न्यायानां भेदः । लौकिका अपि नानाविधा भवन्ति ।

न्यायस्वरूपनिर्वचनप्रसङ्गेन कौलोपनिषदि सूत्रितम्—'अन्यायो न्यायः' । अत्र पूज्यपादाः श्रीभास्कररायमहाभागा इत्थं वदन्ति—'यदि कश्चिद्वावदूकः पूर्वोत्तरमीमांसान्यायः कौलिकाचारं दूषयेत्तथापि न मनागपि कोपः कार्यं इत्याशयेनाह—अन्याय इति । अल्पार्थो नञ् । अल्पबलो न्यायः, पूर्वपक्ष इति यावत् । सोऽपि न्याय एव । न हि पूर्वपक्षोऽपि न्यायोपन्यास-

मन्तरेण प्रवर्त्तते। अतस्तादृशन्यायसिद्धोऽपि न्याय्य एवायं पन्थाः। न चैवं सति सिद्धान्त-न्यायेनापवादात् कथमाश्वासः ?

उभयविधो व्यवहारो न्याय इत्युक्तम्। तदुक्तम्—

लोक्येते चात्र शब्दार्थौ लोकस्तेन स उच्यते।
व्यवहारोऽथवा वृद्धव्यवहर्तृंपरम्परा[1] ॥ इति।

न्यायावयवपरम्परा

(१) पञ्चावयवपरम्परा—अस्याः परम्पराया समुपस्थापको महर्षिर्गौतमः। स्मृति-पुराण-ब्राह्मणादिवैदिकग्रन्थेषु गौतम-गोतम-गौतमीत्यादयो शब्दा मिलन्ति। वैदिकी, ऐतिहासिकीयं परम्परा। अस्यामेव परम्परायां वात्स्यायनादयः प्रथितयशस्काः पदार्थवेत्तारो विचारितवन्तः।

(२) दशावयवपरम्परा—समुपलब्धेषु प्राचीनग्रन्थेषु दशावयवव्यवस्थाऽपि दृश्यते। महर्षिणा वात्स्यायनेन स्वभाष्य उपर्युक्तवादसम्बन्धिनी व्यवस्था प्रस्तुतास्ति—(१) प्रतिज्ञा, (२) हेतुः, (३) उदाहरणम्, (४) उपनयः, (५) निगमनम्, (६) जिज्ञासा, (७) संशयः, (८) शक्यप्राप्तिः, (९) प्रयोजनम्, (१०) संशयव्युदास इति।

'निर्युक्तिकगाथा' नामके ग्रन्थे उपर्युक्तदशावयववादस्य व्यवस्था द्विप्रकारिका मिलति। तद्यथा—

(१) प्रतिज्ञा	प्रतिज्ञा
(२) प्रतिज्ञाविशुद्धिः	प्रतिज्ञाविभक्तिः
(३) हेतुः	हेतुः
(४) हेतुविशुद्धिः	हेतुविभक्तिः
(५) दृष्टान्तः	विपक्षः
(६) दृष्टान्तविशुद्धिः	प्रतिषेधः
(७) उपसंहारः	दृष्टान्तः
(८) उपसंहारविशुद्धिः	आशङ्का
(९) निगमनम्	आशङ्काप्रतिषेधः
(१०) निगमनविशुद्धिः	निगमनम् इति।

अत्रेदं विमर्शनीयम्—दशावयववादपरम्परायाः स्वरूपद्वयमुपलभ्यते। वात्स्यायनेन इयं परम्परा खण्डिता। प्रतिज्ञाहेतूदाहरणोपनयनिगमनानीति पञ्चैव तार्किकसम्मतानि।

(३) चतुरवयवपरम्परा—कैश्चिन्मीमांसकैरियं समाहृतेति—अनन्तवीर्यहेमचन्द्रनामक-जैनाचार्यैरुल्लिखितमिति श्रूयते। अस्या विशेषो नोपलभ्यते।

त्र्यवयवपरम्परा—सांख्य-मीमांसा-वेदान्तनयज्ञैरियं स्वीकृता। सांख्यसूत्रस्य माठर-वृत्ताववयवचर्चा कृता। गौडपादभाष्ये-सांख्यप्रवचनभाष्ये तत्त्वकौमुद्यामियं चर्चा नास्ति।

१. म० भा० प्र० उ० ४।१।१।

भाट्टमीमांसकैरियं परम्परा स्वीकृता। अस्याः परम्परायाः रूपद्वयं वर्तते—(१) प्रतिज्ञा, हेतुः, उदाहरणम्, (२) उदाहरणम्, उपनयः, निगमनम्। गुरुमतानुयायिनोऽपि इमामेव परम्परामुपासन्ते। वेदान्तपरिभाषाकारो मीमांसकानुयायी वर्तते। तेनोपर्युक्तावुभावपि विकल्पौ प्रयुक्तौ।

धर्मकीर्तेः पूर्ववर्तिनो बौद्धाचार्या अपि त्र्यवयववादिनः। आचार्यमैत्रेयोऽपीमां व्यवस्थां स्वीकृतवान्। दिङ्नागाचार्यमते पक्षहेतुदृष्टान्तरूपाः त्र्यवयवाः स्वीकृताः। अस्य वादस्य पाश्चात्त्यैरपि ग्रहणं कृतम्।

(५) अवयवद्वयपरम्परा—बौद्धनिकाये धर्मकीर्तिः कतिपये जैनाश्चावयवद्वयवादं स्वीकुर्वन्ति। तत्र—

बौद्धाः	जैनाः
(१) उदाहरणम्	(१) प्रतिज्ञा
(२) उपनयः	(२) हेतुः,—इति वैशिष्ट्यम्।

अत्र जैन-बौद्धतार्किकेषु वैदिकतार्किकेषु च मतभेदाः सन्ति।

(६) एकावयवपरम्परा—दार्शनिके जगत्यवयवप्रयोगकाले केवलमेक एवावयवः सर्वप्राथम्येन धर्मकीर्तिना स्वीकृतः। तेन विशिष्टविदुषां कृते व्यवस्थेयमास्थिता।

इत्थं लौकिक-शास्त्रीयन्यायप्रपञ्चः षड्विधः। काकतालीय-माठरपरिवेषण-श्यालशुनकादयो न्याया दृष्टान्तविशेषा एव। अतस्तेऽप्येकावयववादपरम्परायां समापतिता भवन्ति।

साहित्यशास्त्रे आनन्दवर्धनाचार्येण काव्य-काव्यार्थयोर्व्यङ्ग्यव्यञ्जकभावस्यैव समर्थनात् काव्यात्मनो रसस्य च व्यङ्ग्यत्वेन सर्वथैव वाच्यत्वानालिङ्गितत्वं नियम्य व्यक्तिवादस्थापनायां मीमांसाशास्त्रीयन्यायाः प्रयुक्ताः। भामहेन तर्कशास्त्रीया न्यायाः काव्यनयानुरोधेन काव्यालङ्कारस्य पञ्चमे परिच्छेदे निरूपिताः। तस्य 'न्यायपरिच्छेदः' इति प्रसिद्धिः। न्यायानुसारिणी नियमव्यवस्था दिगपि ध्वन्यालोके प्रथमतो दरीदृश्यत इति दिक्।



श्रव्यकाव्यात्मसमीक्षा

श्रीवैरिष्टरतिवारी

सरस्वतीभवनसदस्यः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालये ।

काव्येषु नाटकं रम्यम्—

रसास्वादेन सुकुमारमतीनां विनेयानां व्युत्पत्तिसिद्धये काव्यान्यारचितानि महाकविभिरिति प्रसिद्धिः । यद्यपि काव्यानां दार्शनिकशैल्या समीक्षा भरतमुनिना प्रारब्धा, तथापि नाट्यानामेव विवेचनं तत्र विशेषादवलोक्यते । नाटकेषु प्रेक्षकेषु सरसत्वापादनार्थं विविधरसनिर्भराणां गीतानां महत्त्वं स्वीक्रियत एव । दृश्यते खलु कालिदासविरचिताभिज्ञानशाकुन्तलेऽन्यत्र च विभावानुभावसञ्चारिव्यञ्जकपदावलीनिर्मितानि सहृदयहृदयाह्लादजननसमर्थानि रसगर्भनिर्भराणि पद्यानि । तानि च नोत्तमोत्तमानि वा सदलङ्कृतानि वेति कः खल्वनुन्मत्तः प्रतीयात् ? अत एव लोकस्वभावस्य शाब्द्यनुकृतिः काव्यम् ।

प्रसिद्धमेव कविसहृदयगोष्ठीगरिष्ठेष्वस्ति यत् काव्येषु नाटकं रम्यम् । नाटकानि काव्यान्येवेति मत्वैव भरताचार्येण प्रोक्तं यत् काव्येषु रसादृते कस्याप्यर्थस्य प्रवृत्तिरेव न भवति[1] । भारतीयपरम्परया भरत-वाल्मीकि-नन्दिकेश्वराः समकालिकाः । तथ्यमेतदुत्तररामचरितस्य चतुर्थेऽङ्के भवभूतिमहाकविनापि स्पष्टीकृतम् । वाल्मीकिरेवादिकविरिति व्यासभासकालिदासप्रभृतीनां कविसम्प्रदायशिरोमणीनां मतम् । भामहदण्डिभ्यामपि सर्गबन्धापरपर्यायेषु महाकाव्येषु सर्वेषां भरतप्रसिद्धानां शृङ्गार-वीर-करुण-शान्तादिरसानामसङ्कीर्णा स्थितिः स्वीकृता । इदमपि प्रसिद्धं यत् काव्यनाटकादीनि समाज-लोकशिक्षणस्य सशक्तानि साधनानि । अद्यापि पौराणिकरामायण-महाभारताख्यानान्याधारीकृत्य निर्मितानि चलचित्राणि सर्वेषामेव मनांसि रञ्जयन्ति ।

काव्यात्मविषये मतानि—

काव्यं सगुणं दोषरहितं सालङ्कारं सदाश्रयश्च भवति । आधुनिकविपश्चिदपश्चिमानां मतानुसारेण काव्यात्मचिन्तकानां सम्प्रदायप्रवर्त्तकोऽस्ति भामहाचार्यः । ५५० ई० वर्षे तस्य स्थितिरासीदिति देवेन्द्रनाथशर्मणां काव्यालङ्कारग्रन्थस्य परिशिष्टे स्पष्टीकृतम्[2] । भामहादपि प्राक् काव्यादर्शकर्त्तुराचार्यस्य दण्डिनः काल इति स्व० पाण्डुरङ्गवामनकाणेप्रभृतीनां मतमस्ति[3] । भामहाचार्यस्य मतानुसारेण काव्येषु सर्वालङ्कारबीजभूताया वक्रोक्तेः प्राधान्यमत एव तदनुसारिणा कुन्तकाचार्येण वैदग्ध्यभङ्गीभणितिरूपाया वक्रोक्तेर्जीवितत्वं (व० जी० १।१०) व्यवस्थापितम् । अयमेव वक्रोक्तिसम्प्रदायः ।

---

१. 'नहि रसादृते कश्चिदर्थः प्रवर्त्तते' ना० शा० ६।७१ ।

२. काव्यालङ्कारपरि० १, पृ० १७७, पं० ६ (विहार रा० भा० परि० पटना) ।

३. काव्यशास्त्र का इतिहास, पृ० १५५, पं० १३ ।

दण्डिमतानुसारेण काव्ये गुणानामेव जीवितत्वम्। वैदर्भमार्गस्य तदुक्ता ओजःप्रसाद-माधुर्यसुकुमारतादयः प्राणाः। तदनुसारिणा वामनाचार्येण सर्वतः प्रथमं रीतेः काव्यात्मत्वं स्पष्टतो व्यवस्थापितम्। दण्डिकृतंगुणनिरूपणं भरतानुसारेणैवास्ति।[1] अयमेव रीतिसम्प्रदायः।

उद्भटाचार्यस्तु[2] गुणालङ्कारयोः साम्यमुक्तवान्। भामहाचार्येणापि काव्यालङ्कारे पारिभाषिकाभिप्रायेण कुत्रापि 'गुण'पदस्य प्रयोगो नैव कृत इत्याकूतम्। अत एवोभयोरपि सम्प्रदाययोरलङ्कारवाद एवान्तर्भावं कृत्वा रुय्यकाचार्येण—'इह तावद् भामहभट्टोद्भटप्रभृतयश्चिरन्तनालङ्कारकाराः प्रतीयमानमर्थं वाच्योपस्कारकतयाऽलङ्कारपक्षनिक्षिप्तं मन्यन्ते'[3] इत्यभिहितम्। अलङ्कारात्मवाद्यपि क्वचन प्रसिद्धावयवातिरिक्तस्य ललनालावण्यप्रख्यस्यातिशयतत्त्वविशेषस्य काव्यात्मत्वं स्वीकरोति। परन्तु नाटकेष्वेव रसप्राधान्यम्, न सर्गबन्धादिष्विति तत्रालङ्काराणामेव चमत्कारजननार्हत्वेन प्राधान्यादिति भामहाभिप्रायः। दण्डिनापीष्टार्थव्यवच्छिन्ना पदावली काव्यशरीरमित्युक्तम्।

अलङ्कारात्मवादः—

प्रागेवावोचं यच्छ्रव्यकाव्यात्मविषयकजिज्ञासा रससिद्धान्तस्य सर्ववादिसम्मतत्वं नाभ्युपगच्छति। मम्मटोक्तसूत्रस्वारस्यादपि दोषाभावगुणालङ्कारसंस्कृतयोरेव शब्दार्थयोः काव्यत्वम्। भामहाचार्यो ह्याद्यालङ्कारिको यः खलु श्रव्येऽलङ्काराणामेव प्राधान्यं व्यवस्थापयति[4]। अलङ्काराणां मूलं वक्रोक्तिः। भामहाचार्येणोक्तं यदियं वक्रोक्तिरेवातिशयोक्त्यपरपर्याया काव्ये चमत्कारमूलम्[5]। वक्रतातिशययोश्चमत्कारबीजत्वाच्चमत्कारजननार्हत्वात्तस्यैव काव्यात्मत्वमपि शक्यं वक्तुमिति कुन्तकस्वारस्यम्।

भरत-भामहयोर्मध्येऽतितरामन्तरालोऽवलोक्यते। तयोरान्तरालिकश्रव्यकाव्यमीमांसा-परम्परा नावलोक्यते। भामहात् प्राङ्नाट्ये रसप्राधान्यवादः स्थिरीकृतः। अत एव भामहाचार्येणापि नाट्यानां चर्चा न कृता। भामहानन्तर्भाविनानन्दवर्धनाचार्येण[6] तु फुटमेव नाट्यानामपि काव्यत्वमङ्गीकृत्य तत्रापि रसादिध्वनिप्राधान्यं व्यवस्थाप्य काव्यार्थस्य वाच्यप्रतीयमान-भेदद्वयमुक्त्वोभयोरपि सहृदयश्लाघ्यत्वमुक्तम्। तत्रालङ्काराणां वाच्यत्वं रसादीनां च प्रतीयमानत्वं व्यवस्थाप्य वाच्यार्थावगमायाभिधाया, रसावगमाय च व्यञ्जनायाः शब्दशक्तित्वेन स्थापना कृता।

'अनलङ्कृती पुनः क्वापि'[7] इति मम्मटोक्तमधिक्षिपता गोविन्दठक्कुरेणोक्तम्[8]—'काव्येऽलङ्कारो रसादिश्चेति द्वयमेव चमत्कारहेतुः'[2] इति। 'कामं सर्वोऽप्यलङ्कारो रसमर्थं निषिञ्चति' इति दण्डिनश्च।

---

१. काव्यादर्शे १।४१, ४२।
२. अलङ्कारसर्वस्वे पृ० ८, पं० १-३ अनु० सं० रामचन्द्रद्विवेदी।
३. अलङ्कारसर्वस्वे पृ० २। पं० १ तः पृ० ३ पं० १।
४. काव्यालङ्कारे आमुखम्, पृ० १।१४ (वि० रा० भा० प० प्र०) सं० देवेन्द्रनाथशर्मा।
५. काव्यालङ्कारे (२।८५)। ६. (ध्वन्यालो० १।२।३)। ७. का० प्र० १।१ सूत्रम्।
८. का० प्र० पदार्थदीपिकाटी० १ उ०, पृ० ३१, पं० १० त० पृ० ३२—पं० ९।
९. काव्यादर्शे १।६।

आनन्दवर्धनात् प्राक् प्रायोऽलङ्कारेष्वेवान्येषामपि काव्यतत्त्वानामन्तर्भावाद्विच्छित्ति-वैशिष्ट्येनानन्त्यादलङ्काराणामेव काव्यजीवितत्वमिति प्रतिपादयामासुः प्राचीना आलङ्कारिकाः। अत एव च चन्द्रालोके जयदेवेनोक्तम्—

अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।
असौ न मन्यते कस्मादनुष्णमनलंकृती[1] ।। इति।

अलङ्काराणां काव्ये प्राधान्यं प्रतिपादयन्त्यां साहित्यमुक्तावल्यां भामहोद्भट-रुद्रट-जय-देवाः प्रमुखाः सन्ति। सोऽयमलङ्कारसम्प्रदायोऽप्यानन्दवर्धनवत्काव्यस्यार्थस्य द्वैविध्यमङ्गी-करोति। प्रतीयमानस्यार्थस्य त्रिरूपत्वमपि अलङ्कारात्मवादिभिरेव प्रथमतः प्रख्यापितम्। काव्ये उभयोरप्यर्थयोः प्राधान्यमङ्गीकुर्वतां मतमुपक्षिपताऽऽनन्दवर्धनाचार्येणैवं प्रत्यपादि—

योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ।।
तत्र वाच्यः प्रसिद्धो यः प्रकारैरुपमादिभिः।
बहुधा व्याकृतः सोऽन्यैः………[2] ।।

अलङ्काराणामपि वाच्य-प्रतीयमानवर्गयोर्व्यवस्थापनमानन्दवर्धनाचार्यात् प्रागेव जात-मित्युत्पश्यामः। अलङ्कारात्मवादिनां मते काव्ये चमत्कारकारणं वस्त्वेव रसवदादि-रूपकाद्य-लङ्काररूपेण सहृदयैः श्लाघ्यते।

सालङ्कारस्य काव्यता

काव्यशास्त्रेऽलङ्कारसम्प्रदायस्य सिद्धान्तानामनुशीलनादेवोत्तरवर्तिनां सम्प्रदायाना-माविर्भावो जातः। न चैतावदेव, प्रत्युत श्रव्यकाव्य-रसात्मवादोऽप्यलङ्कारवादबीजस्य फलमिति नात्र सन्देहः[3]। यद्यपि अलङ्काराः काव्यात्मेति शब्दतः कुत्रापि नोक्तम्, परन्तु तन्महत्त्वाकलनेन तदात्मत्वमिति प्रायोवादः।

तदनन्तरं रीतिरात्मा काव्यस्येति वामनाचार्यः[4]। परन्तु, रीतीनामलङ्कारक्रोडीकरणात् तस्य काव्यात्मत्वेनानभिमतत्वादलङ्कारा एव काव्ये प्रधानमिति वामनमतसंक्षेपः।

तदित्थमलङ्काराः श्रव्ये, रसाश्च दृश्ये प्रधानमिति प्राचां दर्शनं व्यवस्थितम्।

रसात्मवादः

रसात्मवादस्य बीजमग्निपुराणे विद्यते। रसात्मवादिनां मतान्यधुना प्रसिद्धानीति तत्र तत्र नाधिकमाकुलीकुर्मः। व्यासेनाग्निपुराणे—'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्'[5] इति। महिमभट्टेनाप्युक्तम्—काव्यास्यात्मनि रसादिरूपेऽङ्गिनि न कस्यचिद्विमतिः। अत एव विश्वनाथेनाप्युक्तम्—

---

१. चन्द्रालोके १।८।　२. ध्वन्यालोकः १।२।३।　३. काव्यादर्शे १।६०।
४. काव्या० सूत्रे २–६०।　५. अग्नि० ३३७।३३।

वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षका:।
उत्कर्षहेतवस्ते स्युर्गुणालङ्काररीतय:[1] ॥ इति।

रसस्वरूपञ्च तेनैव—

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयो
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदर:।
लोकोत्तरचमत्कारप्राण: कैश्चित् प्रमातृभि:
स्वाकारवदभिन्नत्वे नायमास्वाद्यते रस:[2] ॥ इति।

तस्य निष्पत्त्यै भरतोक्तं रससूत्रमतीव प्रसिद्धम्[3]।

प्राचीनार्वाचीनमते समन्वयन्ति—

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादय:।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मति: ॥

इत्यादिनाऽऽनन्दवर्धनाचार्य:। अत एव रसालङ्कारयोरुभयोरपि[4] साम्यमुभगमवस्थानं च काव्यं रसात्मकमिति शिवम्।

---

१. सा० द०, १ परि०, १ कारिका। २. तदेव—३ परि०। २, ३ का०।
३. नाट्यशा० ६ सू० १—'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः।
४. ध्वन्या० २।५।

○ ○ ○

कौलमार्गः

डॉ० रामजीमालवीयः
प्राध्यापकः, योगतन्त्रविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

कुलशक्तिरिति प्रोक्तमकुलं शिव उच्यते।
कुलेऽकुलस्य सम्बन्धः कौलमित्यभिधीयते ॥[1] इति।

'कुल'शब्दो भारतीयवाङ्मये महताऽऽदरेण प्रयुक्तो दृश्यते। गुरुकुलम्, कुलव्यवस्था, सत्कुलम्, असत्कुलम्, कुलं कर्पटश्च संरक्षणेनैव चिरं तिष्ठतीति लौकिकी प्रसिद्धिः।

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः।
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥[2] इति।

प्रसङ्गेष्वेतेषु कुलशब्दस्य समादरपूर्वकमेव संस्मरणं समाजे। एतत्सर्वमनुसृत्यैवोपासना-मार्गेऽपि कुलोपासनाप्रक्रिया समादरपूर्विका प्रचलिताऽऽसीत्। श्रीतन्त्रालोकः शैवशाक्तदर्शनयोः प्रचलितपरम्पराणां प्रत्यभिज्ञापक आकरग्रन्थः। तत्र त्रिक-प्रत्यभिज्ञा-तन्त्र-कुलमार्गाणां दर्शनं महता श्रमेण सङ्गृह्य ग्रन्थरूपतया लोकहिताय महामाहेश्वराभिनवगुप्तेन समुपस्थापितम्। अतः कुलप्रक्रियायास्तदुपासनायाः संक्षिप्तं वर्णनमत्राभिनवगुप्तमहोदयेन सङ्गृहीतं दीयते।

यद्यपि सत्तमेष्वपि मार्गेषु कालक्रमेणानधिकृतव्यक्तिप्रवेशाद् दोषाः सङ्क्रमन्ते, तेन च काचिद् विशृङ्खला परम्परापि जनजीवनं प्रभावयति। नैतेन कापि पद्धतिर्मूलतया दुष्टा विगीता वेत्यभिधातुं शक्यते। कल्प्यते कुलोपासनाविषयेऽप्येतादृशमेव कुचक्रं समुज्जृम्भित-मासीत्, येनैष सुप्रतिष्ठितो मार्गो देशेऽस्मिन् नामशेषतां गतः। अद्य तु 'कौल' शब्द एव बीभत्सं भावव्रातमभिव्यनक्ति। एतेनानुमीयते मध्यकालप्रवाहे कौला भ्रष्टाचारिणोऽध्यात्मविरता इन्द्रियलौल्ययुताः समभूवन्। तेनैषा परम्परा लोकोद्वेगकरी जुगुप्सामयी च संवृत्ता; किन्तु श्रीतन्त्रालोके कुलप्रक्रियावर्णनं दृष्ट्वा तस्य परित्यागमकल्याणकरं मन्वानोऽहं संक्षेपेण परिचयं दातुं कामये।

कुलशब्दस्यानेकेऽर्था उपलभ्यन्ते। यदुक्तम्—

कुलञ्च परमेशस्य शक्तिः सामर्थ्यमूर्ध्वता।
स्वातन्त्र्यमोजो वीर्यञ्च पिण्डः संविच्छरीरकम् ॥[3]

व्याख्यातश्च कौलमार्गविषयो महामाहेश्वरेण जयरथेन।[4] तद्यथा—

(१) कुलं हि परमा शक्तिः.............।

(२) लयोदयश्चित्स्वरूपस्तेन तत्कुलमुच्यते.............।

---

१. कुलार्णवे–दशम उल्लासः।
२. श्रीमद्भगवद्गीता–१।४०।
३. श्रीतन्त्रालोकः, आ० २९–४।
४. तदेव–श्लो० ४ व्याख्या।

(३) स्वभावे बोधममलं कुलं सर्वत्र कारणम्.......... ।
(४) सर्वकर्तृविभुसूक्ष्मं तत्कुलं वरवर्णिनि.............. ।
(५) सर्वेशं तु कुलं देवि सर्वं सर्वव्यवस्थितम् ।
(६) शक्तिगोचरणं वीर्यं तत्कुलं विद्धि सर्वगम् ।
(७) कुलं स परमानन्दः.............. ।
(८) कुलमात्मस्वरूपं तु.............. ।
(९) कुलं शरीरमित्युक्तमिति.............. ।

भासुरानन्दनाथापरनामधेयेन भास्कररायेण ललितासहस्रनामव्याख्याने सौभाग्यभास्करे कुलशब्दस्यानेकेऽर्थाः प्रत्यभिज्ञापिताः[1] । तथा च—कुलं सजातीयसमूहः, स चैकज्ञानविषयत्वरूपसाजात्यापन्नज्ञातृज्ञेयज्ञानरूपत्रयात्मकः । 'घटमहं जानामि' इत्येव ज्ञानाकाराद् ज्ञानभासनयानुव्यवसायापेक्षायां दीपभासनाय दीपान्तरापेक्षापत्तेः' इति । भगवत्पादैरप्युक्तम्—जानामीति तमेव भान्तमनुभात्येतत् समस्तं जगदिति । ततश्च सा त्रिपुटी कुलमित्युच्यते इति । चिद्गगनचन्द्रिकायामपि[2] व्याख्यातम्—

मेयमातृमिति लक्षणं कुलं प्रान्ततो व्रजति यत्र विश्रमम् ।
तत्पदं तव तुरीयमम्बिके यन्महद्भिरुपास्यमिष्यते ।। इति ।

ऊर्ध्वाधोभावेन विद्यमानेषु द्वात्रिंशत्पद्मेषु सर्वाधस्तनं पद्मं त्रिपुटीसम्बन्धाभावादकुलमुच्यते । तदुपरि स्थितानि कुलसम्बन्धीनि यद् वा कुः पृथ्वीतत्त्वम्, तल्लीयते यत्र तत् कुलमाधारचक्रम् । तत्सम्बन्धाल्लक्षणया सुषुम्नामार्गोऽपि । [3]लिङ्गशरीरे हि सुषुम्नानाडीमाश्रित्य द्वात्रिंशत्पद्मानि । तेष्वाद्यन्तयोः सहस्रारे पद्मे द्वे ऊर्ध्वाधोमुखे वर्तेते । सर्वाधःस्थितसहस्रदलकमलोपर्यष्टदलं तदुपरि षड्दलं तदुपरि मूलाधारादीनि चक्राणीति स्थितिः । तत्र मूलाधाराधःस्थितं षड्दलमेव कुलपद्मम् । तदधःस्थितेऽष्टदलसहस्रदले अकुले, कुलपद्माद्भिन्नत्वात् । एवं चाकुलपदेन द्वयोरपि ग्रहणे प्रसक्तेऽष्टदलव्यावर्तनाय विपुसंज्ञ इत्यकुलस्य विशेषणम् । विष्लृ व्याप्तौ इति धातोर्व्यापक इत्यर्थः । व्यापकत्वं सर्वाधःस्थितत्वमिति यावत् । तेनाकुलविपुपदाभ्यामेकमेवाधःस्थितं सहस्रारपद्माख्यं स्थानमुच्यत इति प्राञ्चः, तच्चिन्त्यम्, मवल्लिखितस्वच्छन्दसङ्ग्रहवचन एवाधःसहस्रारस्य कुलपद्मत्वोक्तेः । तद्यथा—'अधश्चोर्ध्वं सुषुम्नायाः सहस्रदलसंयुतम्' इति प्रकृत्यैव समाजितम्—

शक्तिरूपं महादेवि कुलाकुलमयं शुभम् ।
पङ्कजद्वयमीशानि स्थितं शाश्वतमव्ययम् ।। इति ।

आचार्यभगवत्पादैरपि निभालितम्[4]—

महीमूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि ।
मनोऽपि भ्रूमध्ये सकलमपि भित्त्वा कुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसे ।।

---

१. सौभाग्यभास्करव्याख्या पृ० ५२ ।
२. चि० च० द्वि० वि० श्लो० ७२ ।
३. योगि० हृ० सेतुबन्धे, पृ० ४१ ।
४. सौन्दर्यलहरी—श्लो० ९-१० ।

सुधाधारासारैश्चरणयुगलान्तरविगलितैः
प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नायमहसा।
अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं
स्वमात्मानं कृत्वा स्वपिसि कुलकुण्डे कुहरिणि ॥ इति।

सहस्रारात् स्रवदमृतं कुलामृतम्। उपास्योपासकवस्तुजातस्यौचित्येन साजात्यात् तत्समुदायप्रतिपादकं शास्त्रमपि कुलम्। 'कुलपुस्तकानि च गोपयेत्' इति कल्पसूत्रप्रयोगात् कुलशास्त्रपुस्तकमपि कुलशब्देनोच्यते। 'दर्शनानि तु सर्वाणि कुलमेव विशन्ति हि' इत्यागम-वचनाच्च—'न कुलं कुलमित्याहुराचारः कुलमुच्यते' इति भविष्योत्तरपुराणवचनम्। आचारोऽपि कुलम्। पातिव्रतादिगुणराशिशीलो वंशः कुलम्। कुलं जनपदे गृहे। 'सजातीयगणे गोत्रे देहेऽपि कथितं कुलम्' इति विश्वः।

पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे।
गृहे गृहे शक्तिपरैर्ग्रामे ग्रामे वने वने ॥[1] इति।

अधःस्थितं रक्तं सहस्रदलकमलमपि कुलम्, तत्कर्णिकायां कुलदेवी दलेषु कुलशक्त-यश्च—'कर्णिकामध्यतो देवी कुलदेवी च संस्थिता' इति स्वच्छन्दतन्त्रे। बाह्याकाशावकाशे चक्रं विलिख्य तत्र पूजादिकं कौलमिति कश्चित्। शिवशक्तिसामरस्यं वा कौलम्। अत एव ललिता-सहस्रनामसु—'कुलाङ्गना कुलान्तस्था कौलिनी कुलयोगिनी। अकुला'[2] इत्यादीनि ललिताया नामानि चरितार्थानि। मूलाधारकर्णिकामध्यगतो बिन्दुः कुलकुण्डनाम्नोच्यते। स्वस्ववंशपरम्परा-प्राप्तो मार्गः कुलसम्बन्धित्वात् कौलः। तदुक्तं व्रतखण्डे[3]—

यस्य यस्य हि या देवी कुलमार्गेण संस्थिता।
तेन तेन च सा पूज्या बलिगन्धानुलेपनैः ॥
कुलपूजां तु नियतं यः करोति स कौलिकः।
नीचोऽपि वा सकृद् भक्त्या कारयेद् यः कुलार्चनम् ॥
स सद्गतिमवाप्नोति किमुतान्ये द्विजातयः।
तस्मात् सर्वप्रयत्नेन सर्वावस्थासु सर्वदा ॥
कुलपूजारतो भूयादभीष्टफलसिद्धये।
कुलपूजासमं नास्ति पुण्यमन्यज्जगत्त्रये ॥
नैवेद्यैर्विविधैश्चैव पूजयेत् कुलमार्गतः ॥[4] इति।

कुलशब्दसम्बन्धादेव कालीपूजापि कौलपूजेति लोके प्रथिता। एतावन्तं व्यापकमर्थजातं बिभ्रत् कुलशब्दः कुलोपासना च नोपेक्षितव्या इति कृत्वैव कुलोपासना, कुलयागः, कुलेज्येत्यादि-शब्दाः कुलदर्शने समाद्रियन्ते।

---

१. सौभाग्यभास्करः, पृ० ५३।　　२. ललितासहस्रनाम, श्लो० ८८।
३. सौ० भा०, पृ० ५३।　　४. कुलार्णवे—१० उल्लासे।

कुलोपासनाया माहात्म्यम्—

सिद्धक्रमनियुक्तस्य मासेनैकेन यद् भवेत् ।
न तद्वर्षसहस्रैः स्यान्मन्त्रौघैर्विविधैरिति ॥[१] इति ।

अन्यत्रापि—

एवं क्रियायोगपथैः पुमान् वैदिकतान्त्रिकैः ।
अर्चयन्नुभयतः सिद्धिं मत्तो विन्दत्यभीप्सिताम् ॥[२] इति ।

जयरथेनापि व्याख्यातम्—सिद्धानां कृतयुगादिक्रमेणावतीर्णानां श्रीखगेन्द्रनाथादीनां क्रमे तत्परम्परागतायां कुलप्रक्रियायामित्यर्थः । तथा च—

सिद्धान्तादिषु तन्त्रेषु ये मन्त्राः समुदाहृताः ।
वीर्यहीनास्तु ते सर्वे शक्तितेजोज्झितायताः ॥
कौलिकास्तु महामन्त्राः स्वभावाद् दीप्ततेजसः ।
स्फुरन्ति दिव्यतेजस्काः सद्यः प्रत्ययकारकाः ॥[३] इति ।

सर्वशास्त्रविश्रान्तिधाम्नः प्रारब्धस्यास्य तन्त्रशास्त्रस्यार्यातिक्रमः (शास्त्रावतारक्रमः) ।

अवरोहक्रमेण षट्त्रिंशे आह्निके श्रीतन्त्रालोके श्रीमहामाहेश्वरेणाभिनवगुप्तपादाचार्येण यथासम्प्रदायं तन्त्रशास्त्रावतारक्रमः प्रतिपादितः । तदुक्तम्[४]—

श्रीसिद्धादिविनिर्दिष्टा गुरुभिश्च निरूपिता ।
भैरवो भैरवीदेवी स्वच्छन्दो लाकुलोऽणुराट् ॥
गहनेशोऽब्जजः शक्रो गुरुः कोट्यपकर्षतः ।
नवभिः क्रमशोऽधीतं नवकोटिप्रविस्तरम् ॥
एतैस्ततो गुरुः कोटिमन्त्रात् पादं वितीर्णवान् ।
दक्षादिभ्य उभौ पादौ संवर्तादिभ्य एव च ॥
पादञ्च वामनादिभ्यः पादार्धं भार्गवाय च ।
पादपादं तु बलये पादपादस्तु सोऽपरः ॥
सिंहायार्धं ततः सिंहाद् द्वौ भागौ विनताभुवे ।
पादं वासुकिनागाय खण्डाः सप्तदश त्वमी ॥
स्वर्गादर्धं रावणोऽथ जह्रे रामोऽर्धमप्यतः ।
विभीषणमुखादाप्य गुरुशिष्यविधिक्रमात् ॥
खण्डैरेकोनविंशत्या विभक्तं तदभूत्ततः ॥ इति ।

एषु एकोनविंशखण्डेषु सप्तदश तु अन्यान्यखण्डे, खण्डद्वयं भूलोके इति विभक्तम् । तत इन्द्रगृहादामर्त्यलोक आगमक्रमे रावणेन अवतारितम्, तत्पश्चाद् विभीषणेन रामाय लब्धम् । एतत् खलु नवकोटिप्रविस्तरं तन्त्रशास्त्रं प्रतिखण्डञ्चात्र अष्टौ खण्डानि सन्ति । तदुक्तम्—'खण्डं खण्डं चाष्टखण्डं प्रोक्तं पादादिभेदतः' इति ।

---

१. श्रीतन्त्रालोके आ० २९, श्लो० ३ । २. श्रीमद्भागवतम्—११।२७।४९ ।
३. श्रीतन्त्रालोके आ० २९, श्लो० ३ व्या० । ४. श्रीतन्त्रालोके—३६ आ०, १–७ श्लो० ।

पादादयश्चैताः प्रतिनियतग्रन्थपरिणामविषयाः पारिभाषिक्यः संज्ञाः। अत एव नवमे पादे काचिद् गणना नोक्ता। कल्पसंहितास्कन्दभेदेन शतसंख्यया मूलभूतया शतार्धसंख्यातः पादो निर्धारितः। तत्र परा, अपरा, परापरा इति भेदत्रयं संख्यायां प्रकल्प्याक्षराणां शतेन परा सहस्रसंख्यातः कल्पः, द्वापञ्चयुत्तरचतुर्दशसहस्राणि श्लोकानां संहिता, अपरा तृतीया।

एवं सिद्धयोगेश्वरीमते पूर्वोक्तसंख्यया तन्त्रविभागः कृतः। अनन्तरं रामालक्ष्मणः, तस्मात् सिद्धाः, तेभ्यो दानवाः, गुह्यकाश्च, तेभ्योऽन्ये। इत्थं सिद्धास्तन्त्रे निर्दिष्टमायतिक्रमम-भिधाय गुरुनिरूपितमभिधत्ते—

तेषां क्रमेण तन्मध्ये भ्रष्टं कालान्तराद्यदा।
तदा श्रीकण्ठनाथाज्ञावशात् सिद्धा अवातरन्॥ इति।

तत्र त्र्यम्बकामर्दक-श्रीनाथनामकाः सिद्धा अद्वैतद्वैतद्वैताद्वैतमतनिपुणा आसन्। आद्यस्य सन्ततिर्जज्ञे, द्वितीयस्य तु दुहिता एव। एवमर्धेन न्यूनश्चतस्रः सार्धतिस्रो मठिकाः शिष्यप्रशिष्यै-र्व्यवस्थितैः शतशाखविस्तीर्णाः, तेभ्योऽभ्युष्टसंततिस्रोतःसारभूतरसाहृतोऽयं श्रीतन्त्रालोकः प्रोक्तवादत्रयस्य रसस्यन्दी।

इत्थं लोके तन्त्रशास्त्रव्यवहारः प्रवृत्तः। तत्र प्रसिद्धिरेवास्य शास्त्रस्य मूलोपादानम्। सा च प्रसिद्धिरपि किंरूपेति विचारणायामागमरूपा इति निर्धारितम्। प्रसिद्धेरुपजीवकावन्वय-व्यतिरेकौ, ताभ्यां विना प्रसिद्धेरनुसन्धानासम्भवात्। प्रत्यक्षात्मिका प्रसिद्धिरपि सर्वव्यवहार-भूतां प्रसिद्धिमपेक्षते। तदहर्जातबालस्य क्षुधितस्य साकाङ्क्षत्वेऽपि नानाविधार्थसार्थसंवलिते स्थाने स्वावमर्शिकां प्रसिद्धिं विना किं कर्तुं विमूढत्वात् परोपदेशप्राप्तत्वाच्च महत्काठिन्यं समक्षं स्फुरति।

अस्यां स्थितौ वस्तुशताकीर्णे स्थाने यदेव वस्तु चित्तप्रसादकं तदेव गृहीत्वाऽसौ सन्तुष्यति। एवं स्थिते चेतःप्रसादः किं मूलः ? येनासावर्थविशेषं स्पृहयति ! प्रत्यक्षानुमानादिबाह्यप्रमाणानां प्रसादजनकत्वाभावात् प्राग्वासनैव विमर्शरूपा साधनतयोपतिष्ठते। एषा प्राग्वासना चेतःप्रसाद-जनकत्वाभावात् प्राग्वासनैव विमर्शरूपा साधनतयोपतिष्ठते। एषा प्राग्वासना चेतःप्रसादरूपा प्राक्तनवासनानुरोधिन्येव, न त्वाकस्मिकप्रतिभामात्रम्। अन्यथा मृत्तिकाभक्षणेच्छोः पुंसो बालस्यापि समापतेत्, न चैतद् दृश्यते, अपि तु कन्याशिशोरेव वृद्धिमुपेयुषो मृत्तिकाभक्षणेच्छा दृश्यते। अत्र किं विनिगमकम् ? केवलं विमर्शात्मिका वासनैव प्राक्तनी। सेयं पौर्वकालिकी प्रसिद्धिरविगीता व्यवहारस्य साधिका सिद्धयति। अनादिकालिकी प्राक्तनी वासनाऽन्वय-व्यतिरेकमुखेन व्यवहारसञ्चालिका सिद्धयति। एवं पूर्वपूर्वोपजीवनमर्गेऽपि सा प्रसिद्धिः कस्मिंश्चि-देकस्मिन् सर्वज्ञे परमेश्वरे निःशङ्कं भासते।

न च समस्तव्यवहार एकस्मिन् प्रमातरि असर्वज्ञे स्थातुमुत्सहते। बहूनां सर्वज्ञपूर्वकत्वं भवितुं नार्हति, विनिगमनाविरहात्। भोगापवर्गहेतुभूतप्रसिद्धिशतशोभितो विमर्शस्वभावपरमेश्वर एवैतादृशः सर्वज्ञो भवितुमर्हेत्; अथवा प्रसिद्धेरुपजीव्यं शास्त्रं वा। शास्त्रं तु वाक्-स्वरूपम्। विमर्शस्वभावपरमेश्वरोऽपि तथैव। अतो व्यवहारमार्गे शब्दस्यैव पारमार्थिकरूपेणा-लम्बनत्वात् प्रसिद्धिरूपागमशास्त्रमेव सर्वोपजीव्यमिति निर्णीयते। वृद्धयुवबालानां भोक्तुमन्नमेव

पुरः स्फुरति। तत् कथमिति लौकिके व्यवहारे बालपण्डितयोः साम्यात् तत्र प्रसिद्धेरेवान्वयव्यतिरेकमूलत्वादुपजीव्यत्वम्? तदित्थं शब्दनादात्मिका अविगीता प्रतीतिरेव प्रसिध्यात्मकागमः, तत्कर्तृत्वात् शङ्करस्यैव तद्रूपत्वम्।

धर्मार्थकाममोक्षेषु पूर्णापूर्णादिभेदाद् विचित्रफलेष्वेकः शाम्भवागम एवोपायभूतः, नान्यशास्त्रम्। एवं स्वयूथ्यपरयूथ्यगतत्वेनापि एका प्रसिद्धिरेव चित्रविचित्रतां धत्ते, सर्वाण्यपि शास्त्राण्यधिकारिभेदादेकत्वेऽपि बहुविधानीति नाश्चर्यं किञ्चित्। यथोक्तं श्रीतन्त्रालोके[1]—

साङ्ख्यं योगं पाञ्चरात्रं वेदांश्चैव न निन्दयेत्।

यतः शिवोद्भवाः सर्वे इति स्वच्छन्दशासने॥ इति।

नन्वन्यशास्त्राणामपि तत्तद्वस्तूपदेशगमकत्वात् किमर्थं शाम्भवागमस्यैव अवश्यग्राह्योपदेशत्वमिति चेत्, न, ऋषिप्रोक्तशास्त्राणां मायोदरस्थितत्वात्, सर्वरक्षाकरत्वाच्च वाक्शासनस्य चास्याशु सिद्धिकरत्वाद् निःशङ्कभैरवभावाच्च कर्मस्थितिसङ्ग्राहकत्वात्। निःशङ्कतया प्रवृत्तिरेव कर्मस्थितेराशु सिद्धिकरी, सा च शैवशास्त्रादेव प्राप्यते, नान्यशास्त्रेभ्य इत्यभ्युपगमात्। यथाऽहं गरुडोऽस्मीति भावनया विषं क्षयं व्रजेत्। तद्वदेव निःशङ्कभैरवोऽहमिति भावाल्लोकव्यवहाररूपकर्मस्थितेर्निर्व्यूढत्वात्। यथोक्तम्[2]—

यथा खगेश्वरीभावान्निःशङ्कत्वाद्विषं व्रजेत्।
क्षयं कर्मस्थितिस्तद्वदशङ्काद् भैरवतत्त्वतः॥
यदार्षे पातहेतूक्तं तदस्मिन् वामशासने।
आशु सिद्ध्यै यतः सर्वमार्षं मायोदरस्थितम्॥ इति।

मायोदरस्थितविपरीतत्वादेवास्य शास्त्रस्य महाफलत्वम्।

नन्वन्यत्रापि—'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादिदिशाऽऽत्मसाधकज्ञानादिप्रकारमुक्तमिति कथमसर्वज्ञप्रणीतत्वमित्याशङ्क्याह[3]—

ऊर्ध्वशासनवस्त्वंशे दृष्ट्वापि च समुज्झिते।
अधःशास्त्रेषु मायात्वं लक्ष्यते सर्गरक्षणात्॥ इति।

लोकरक्षापरत्वादुक्तशास्त्राणां पाशकत्वम्, अर्थात् प्रतिबन्धकत्वं सुनिश्चितम्। करुणाजुगुप्सयोः पाशान्तर्भूतत्वात्, कुलशीलजातीनाञ्चाहङ्कारवर्धकत्वात्, अहङ्कारशून्यत्वं विना अनुग्रहलाभाभावान्महती क्लेशपरम्परा पाशस्य। यथोक्तम्[4]—

घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चमी।
कुलं शीलं च जातिश्चेत्यष्टौ पाशाः प्रकीर्तिताः॥ इति।

पाशबद्धानां पशुत्वं सुनिश्चितम्। पशुत्वे सति जीवत्वं सुनिश्चितम्। जीवत्वे जागरूके शिवत्वं सुदुर्लभम्। यथोक्तम्—

---

१. श्रीतन्त्रालोके—आ० ३५, श्लो० ३३।
२. श्रीतन्त्रालोके—आ० ३७, श्लो० ४।
३. श्रीतन्त्रालोके—३७ आ०, श्लो० ९।
४. कुलार्णवे।

पाशबद्धः स्मृतो जीवः पाशमुक्तः सदाशिवः । इति ।

पशुः, कला, विद्या (अशुद्धविद्या), रागः, कालः, नियति एभिः पञ्चकञ्चुकैरावृतः शिवो निरुद्धैश्वर्यः पशुत्वं गृह्णाति, अत एव संसारी, अणुः, पशुः परिमितप्रमाता, शून्यप्रमाता, अपरप्रमाता, पुद्गल इत्यादिपदैर्व्यपदिश्यते । सिद्धानीश्वरञ्च वर्जयित्वा सर्वोऽपि पशुः, परतन्त्रत्वात् कारणशक्तिनिरोधाद् बाह्यविषयाश्रितत्वात् पाञ्चभौतिकशरीरे धारणतया अनादिपाशबद्धतया च परमित एवेदं पारमित्यं स कदापि न जहाति, अन्यथा नवसृष्टौ तस्य भूयोऽभिजनसम्भवात् । इच्छाद्वेषप्रयत्नसुखदुःखज्ञानैरनुमीयमानत्वादनुमेयोऽपि पशुः । तदुक्तम्[1]—

मिथ्याज्ञानमधर्मश्च शक्तिर्हेतुश्च्युतिस्तथा ।
पशुत्वमलं पञ्चैते तन्त्रे हेयाधिकारतः ॥ इति ।

अत एव पाशापसारणपूर्वकशिवत्वलाभाय सद्गुरुरेवाश्रयणीयः । यतो हि तान्त्रिक-वाङ्मये गुरुतत्त्वं सर्वातिशायि परमशिवाभिव्यञ्जकमिति सद्गुरुरूपेण महतादरेण संस्मर्यते ।

.... स यियासुः शिवेच्छया ।
भुक्तिमुक्तिप्रसिद्ध्यर्थं नीयते सद्गुरुं प्रति[2] ॥

इति वचनात् सद्गुरोराश्रयणादृते भोगमोक्षयोरभिन्नतया प्राप्तिर्नैव भवति । सद्गुरुप्राप्तौ भगवदिच्छैव मुख्यं कारणम् । शिष्येच्छा तु तदनुगामिनी । भगवदनुग्रहस्य वैचित्र्यादेव साधकस्य स्वरूपलाभाय अत्युत्कटेच्छा जागर्ति । इयमिच्छैव शुद्धविद्यापदेन सत्तर्कपदेन वा उच्यते । यद्यपि गुरुतः, शास्त्रतः, स्वत इति कारणत्रये अभ्यर्हितत्वाद् गुरोरेव प्रथमोपात्तत्वादनयोर्द्वयोः कारणत्वं गुणीभूतत्वमेव । तथापि[3]—'शिष्यप्रज्ञैव बोधस्य कारणं गुरुवाक्यतः' इति, 'उत्तमानां तु विज्ञानं गुरुशास्त्रानपेक्षणम्' इति वचनाभ्यां स्वभावसिद्धस्य ज्ञानस्य प्राबल्यं गम्यते । एतादृशप्रातिभज्ञानोदयेऽपि गुरुवचनमन्तरा स्वभावबोधोद्भवो न भवतीति सुनिश्चितमेव । गुरोः प्राशस्त्ये स्वाभ्यस्तज्ञानवतो गुरोरेव प्रसङ्गः सर्वात्मना उपयुक्तः । वैदिकवाङ्मयवदागमेऽपि श्रौतचिन्तामयभावनामयज्ञानत्रयस्य वर्णनं प्राप्यते । तत्र भावनामयज्ञानस्यैव मोक्षैककारणत्वात् तस्यैव श्रेष्ठत्वं विद्वद्भिर्निर्णीयते । तदित्थम्[4]—

भावात्परतरं नास्ति त्रैलोक्यसिद्धिमिच्छताम् ।
भावो हि परमं ज्ञानं ब्रह्मज्ञानमनुत्तमम् ॥
कोटिकन्याप्रदानेन वाराणस्यां शताटनैः ।
किं कुरुक्षेत्रगमने यदि भावो न लभ्यते ॥
भावेन ज्ञानमुत्पन्नं ज्ञानान्मोक्षमवाप्नुयात् ।
आत्मनो मनसा देव्या गुरोरीश्वरमुच्यते ॥

---

१. ग० का० । २. मालिनीविजयोत्तरतन्त्रे । ३. योगवाशिष्ठे, प्र० १–१२८ ।
४. रुद्रयामलम्, उ० त० प्र० प० २१८।२२३ ।

ध्यानं संयोजनं प्रोक्तं मोक्षमात्ममनोलयम् ।
गुरोः प्रसादमात्रेण शक्तितोषो महान् भवेत् ।।
शक्तिसन्तोषमात्रेण मोक्षमाप्नोति साधकः ।
गुरुमूलं जगत्सर्वं गुरुमूलं परन्तपः ।
गुरोः प्रसादमात्रेण मोक्षमाप्नोति सद्वशी ।। इति ।

स्वाम्यस्तज्ज्ञानिन एव भावनामयज्ञानस्य सुलभत्वादुक्तलक्षणलक्षितस्य गुरोर्माहात्म्यमागमाचार्यैः स्वीकृतम् । कुलदर्शनेऽस्मिन् पूर्वकौलाः, उत्तरकौलाः, समयाचारः, कौलाचारोऽथवा समयकौलमिश्रमतानि श्रीविद्योपास्तावनिवार्याणि इति कोऽसौ समयाचारः? समयशब्दो नानार्थकः । अत एव 'समयाचारतत्पराः[1]' इति ललितासहस्रनामसु ललिताया एकं नाम 'समयाचारतत्पराः' इति ।

दहराकाशमध्ये देवीचक्रं भावयित्वा तत्रैव देवीं पूजयेदिति तत्र पूजैव समयः । समयाचारप्रतिपादका वशिष्ठ-शुक-शनक-सनन्दन-सनत्कुमारनामकर्षिभिर्विरचितशुभागमपञ्चकमपि समयपदेनोच्यते । तेषु तन्त्रेषु प्रतिपाद्यविषयोऽपि समयः, यद्वा शक्त्यभिन्नशिव एव समयः । समं याति इति समयः शिवः, समया देवी । समयश्च समया च अनयोरितरेतरयोगद्वन्द्वे 'पुमांस्त्रिया' इत्येकशेषेणावशिष्टसमयशब्दः साम्यावस्थापन्नशिवस्य शिवायाश्च वाचकः ।

किञ्च; तयोः शिवशक्त्योः साम्यं भवतुमर्हति ? पञ्चधा साम्यं भवितुमर्हति, अधिष्ठानानुष्ठानावस्थाननामरूपभेदात् । अधिष्ठानं पूजाया अधिकरणं श्रीचक्रादि । अनुष्ठानं सृष्टिस्थितिसंहारनिग्रहानुग्रहपञ्चकृत्यकारित्वम् । अवस्थानं नृत्यादिक्रिया । नाम भैरवादि । रूपमारुण्यादि । एतानि पञ्च कार्याणि साम्यमाश्रित्य क्रियन्ते । अतः शिवशक्त्योराभ्यन्तरस्यापि कृतं कार्यमुभयोर्याति इति कृत्वा शक्तिशिवयोर्नित्यसाम्यस्य सिद्धान्तः स्थिरीभूतः समयाचाराभिमानिनां भक्तानामनुक्षणं सम्मुखं तिष्ठतीति शक्तिशिवयोः प्रतिक्षणं स्मरणरूपं कार्यमेव समयः ।

रुद्रयामलतन्त्रस्य दशपटलैरुपदिष्ट आचारोऽपि समयाचार उच्यते । दीक्षितस्य पुरुषस्य गुरुकृपया षड्विधैक्यं चतुर्विधैक्यं वा दृढानुसन्धातुर्महावेधाख्यसंस्कारः समुत्पद्यते । अनन्तरं मूलाधारादुत्थिता कुण्डलिनी शक्तिर्मणिपूरचक्रे दीक्षितस्य प्रत्यक्षा भवति । तां सम्पूज्य अनाहतचक्रं नीत्वा क्रमेण विशुद्धि-आज्ञाचक्रयोर्नीत्वा नीराजनादिना सम्पूज्य च सहस्रदलपद्मे सदाशिवेन संयोगमवाप्य शक्तेर्मूलाधारकुण्डप्रवेशः । एष कार्यकलापो यावत्कालेन निष्पद्येत तावान् कालः प्रतीक्षात्मकः समय इति कथ्यते । समयमतोपासकानां शुकशनकादीनां ध्यानपूजाद्यपि समय इत्युच्यते । शुभादिपञ्चके देवीपूजाया यो वैदिकाचारः समुद्भावितः, स आचार एव समयपदवाच्यः । समयाचारनामकं पुस्तकमपि समयाचारप्रतिपादकं कार्यजातं निर्दिशति । उक्तानां पञ्चर्षीणां मतमादाय य आचारो या वा पद्धतिः समाहृता आसीत्, सा क्रियैव समयाचारपदेन निरूढिगता कौलमार्गभेदात् समयाचारस्य वेदप्रतिपादिताचारसम्मतत्वमनुमातुं शक्यते । अतो वैदिकाचारसुगुम्फिता पराम्बोपासनैव समयाचार इति निर्धार्यते । सौन्दर्यलहर्याष्टीकाकारो लक्ष्मीधर आन्तरपूजामेव समयाचारं निश्चिनोति ।

---

१. ललितासहस्रनाम, श्लो० ८८ ।

चक्रपूजायां वाह्याभ्यन्तरा च द्विविधे वरिवस्ये स्वीकृते। हृदयाकाशे श्रीचक्रवरिवस्यैव समयाचारानुगृहीता वरिवस्या, यद्यपि कामनाभेदेन साधका अन्यचक्रैः सह सहस्रदलेऽपि तामर्चयन्ति। हृदयाकाशे समाराधिता शक्तिरैहिकं मनोरथं पिपर्ति। वशिन्यादियोगिनीभिः श्रीचक्रपूजने तु विद्या प्राप्यते। कौलमते मूलाधारे त्रिकोणबिन्दौ शक्तिर्वरिवस्या सम्पाद्यते। कौलसाधकैस्त्रिकोणस्थितं विन्दुमेव नित्यं समर्चयन्ति। द्विविधेयं वरिवस्या श्रीचक्रान्तर्गतयोन्याः स्त्रिया योन्या वा समनुष्ठीयते। चक्रस्थितपूजकाः पूर्वकौलाः, साक्षाद् दूत्याः योनिपूजका उत्तरकौला अभिधीयन्ते। इमे द्वे अपि वरिवस्ये बाह्ये एव। कौलवरिवस्या वाह्यैव मन्यते। मिश्रं पूजनं तु वाह्याभ्यन्तरभेदेनोभयविधम्। मूलाधारे स्थितां कुलकुण्डलिनीं समाराधनप्रवणाः कौलाः, शक्तिश्च तत्र समाराधिता कौलिनीति गीयते। अस्मिन् समर्चने प्रत्यक्षं मकारपञ्चकं प्रयुज्यते। समयमते मानसिकाः पञ्चमकाराः प्रयुज्यन्ते। तदनुसारं सहस्राराद् निःसृतामृतद्रवपानं मद्यमिति। कामक्रोधाद्यन्तःकरणषड्रिपूणां वधं सम्पाद्य भावनया तन्मांसभक्षणं द्वितीयो मकारः। इन्द्रियनिरोधस्तृतीयः। आशातृष्णादयो मुद्रापदेनाभिधीयन्ते। सुषुम्नानाड्या चित्तसंयोग एव मिथुनीभावः।

समयमते मनन-मन्त्र-मौन-मन-मुद्राणां पञ्चमकारेषु परिगणनम्। तस्मिन् मतेऽनुकल्पेनापि अर्चनं सम्पाद्यते। वामे तु मपञ्चकाः साक्षात् स्वीक्रियन्ते। तद्द्रव्यस्थां नीलोत्पलदलप्रभां महादेवीमष्टादशभुजैर्युतामानन्दभैरवीं योगजननीं योगिनीं मदिरासिन्धुसम्भूतां सर्वावयुवशंकरीम्, षट्चक्रभेदिनीं चैतन्यां कुण्डलीं परदेवतां ध्यात्वा योगी मूलाम्बुजे यजेत्।

एतत्क्रियादर्शनेन ज्ञानीभवति साधकः।
ज्ञानादेव हि मोक्षः स्यान्मोक्षः समाधिसाधनः॥[1] इति।

द्रव्याणि मपञ्चकादीन्यानन्दकाभिव्यञ्जकानि योगिभिः समाद्रियन्ते। तदुक्तम्[2]—

आनन्दं ब्रह्मणो रूपं तच्च देहे व्यवस्थितम्।
तस्याभिव्यञ्जकं द्रव्यं योगिभिः परिपीयते॥ इति।

कल्पसूत्रेऽपि प्रतिपादितम्—'आनन्दं ब्रह्मणो रूपं तच्च देहे व्यवस्थितम्। तस्याभिव्यञ्जकाः पञ्चमकारास्तैरर्चनं गुप्त्या प्राकट्यान्निरयः'[3] इति।

किन्त्वेतैरर्चनं गोपनीयतया सम्पादनीयम्। प्रकटपूजनेन तु निरयप्राप्तिरपि कल्पसूत्रे एव स्मृतत्वात्। समयाचारिणो वैष्णवाश्च मकारपञ्चकमनुपादेयमवैदिकञ्च स्मरन्ति। किन्तु त्रिपुरामहोपनिषदि 'परिस्रुतं झषमाद्यं पलञ्च'[4] इति वचनेन पञ्चमकाराणां परिग्रहणात् समयाचारिणां वैष्णवानां च मतमज्ञानविलसितमेव। सव्यापसव्यमतयोः प्राक्तनः कलह ऋग्वेदर्चा— 'न यातव इन्द्रजूजुवुर्नो न वन्दना शविष्ठ वेद्याभिः स शर्धदर्यो विषुणस्य जन्तोर्मा शिश्नदेवा अपि गुरितन्नः'[5] इति। शिश्नदेवपदेन वामाचारिणामेव ग्रहणम्। यद्यपि शिश्नपदं पुरुषेन्द्रियार्थमेव साधारणतया प्रयुज्यते, तथापि मुकुन्दशर्मबक्शीनामकेन विदुषा निरुक्तविवृतौ स्त्रिपुंसोरुभयोरपि

---

१. रुद्रया० उ० त० २७ पट० १२४।　२. रुद्रया० उ० त० २७ पट० ११७।
३. परशु० क० प्र० ख० सू० १२।　४. त्रिपुरामहोपनिषद्, ऋ० १२।
५. ऋ० सं० ५–३–३–५।

करणार्थं स्वीक्रियते। पाश्चात्यविद्वांसोऽस्य शब्दस्य व्याख्याने पर्याप्तं मतद्वैविध्यं विकृतमुद्भावितवन्तः, तथापि यास्काचार्येण 'शिश्नदेवा अब्रह्मचर्याः' इति व्याख्यामाश्रित्य दूतीपूजनकर्तॄणाम् उत्तरकौलानामेव संकेतो विहितः। इत्थं मकारपञ्चकं सर्वथा निषिद्धमिति कथनं वैदिकवाङ्मयाज्ञानामिव्यञ्जकमेव।

सौत्रामणियागस्य ज्ञानवतां सर्वमिदं सुस्पष्टमेव। सूत्रग्रन्थेषु पूर्वमीमांसायामुपनिषत्सु मकारपञ्चकस्य नियतकार्येष्वधिकृतेभ्यः प्रयोगः कण्ठरवेण स्वीकृतः। अजितेन्द्रियैर्यथेच्छं सेवितं मपञ्चकं सुतरां निन्दनीयम्, लोकविद्विष्टम्, लोकोद्वेजकम्, निरयसाधकञ्च।

अत्रत्या प्रक्रिया अन्यतान्त्रिकप्रक्रियाभ्यो विभिन्ना। अत्र स्नानमण्डलनिर्माणकुण्डनिर्माणषोढान्यासनवावरणादिपूजाविधिर्नाद्रियते, अस्य ज्ञानज्ञेयमयत्वात्। ज्ञेयस्यापि ज्ञानमयत्वे ज्ञानस्य सदाशुचित्वादत्र अशुचित्वं न स्वीक्रियते। शुद्धयशुद्धी न वस्तुधर्मौ इति तु तन्त्रसारे महामाहेश्वराभिनवगुप्तेन स्फुटमुपवर्णितम्। निषिद्धद्रव्यादिभिरप्यत्र यागः क्रियते।

तदुक्तं महामाहेश्वरेण जयरथेन[1]—

द्रव्यैश्च लोकविद्विष्टैः शास्त्रार्थाच्च बहिष्कृतैः।
विजुगुप्स्यैश्च निन्द्यैश्च पूजनीयस्त्वयं क्रमः॥ इति।

प्रकाशानन्दचिन्मयत्वाद् भैरवशब्दव्यपदेश्यस्य द्राक्षोत्थरसस्यात्र पानेन परमोत्कर्षभाक्त्वमुपदिश्यते। वस्तुगत्या वह्नीनां शक्तीनां स्वयं भैरवस्य च प्रियत्वादस्य द्रव्यस्य ग्राह्यत्वम्। अत एव कुलाचारे पञ्चमकारस्य परिवर्जनं प्रायश्चित्ताय मन्यते। तदुक्तं जयरथेन[2]—

कुलाचारसमायुक्तो ब्राह्मणः क्षत्रियोऽपि वा।
यदा मद्येन न स्पृष्टः प्रायश्चित्तं तदा चरेत्॥
दिनमेकं दिनार्धं वा तदर्धं चार्धमेव च।
निवृत्तेरलिपानस्य प्रायश्चित्तीभवेन्नरः॥ इति।

एतत्सर्वं कुलप्रक्रियोक्तजपपूजापरायणानां गुरुशुश्रूषानिरतानां ज्ञानविज्ञानकुशलानां महिताशयानां द्विजपदवाच्यानामेव। लौल्यात् प्रवृत्तिस्तु निन्दितैव। अयं ज्ञानमार्गः। शङ्कातङ्कविदूषितानां दुर्बलहृदयानामत्र प्रवेशो निषिद्धः। उत्कृष्टाधिकारिणामेवात्र प्रवेशः। अत्र तेनैव द्रव्येणार्घ्यदानस्य महत्पुण्यप्रदत्वम्। अस्मिन् कुलदर्शने अर्घ्यस्यैव प्राधान्यात्, तदुचितद्रव्योपयोगेन परमेश्वरोपदिष्टत्वाच्च। तदुक्तम्—

तेनार्घपात्रप्राधान्यं ज्ञात्वा द्रव्याणि शम्भुना।
यान्युक्तान्यविशङ्कोऽत्र भवेच्छङ्का हि दूषिका॥ इति।

द्रव्याणि रत्नपञ्चकादीनि इति।

विच्छन्नत्या पञ्चमकारवस्तूनि संशोध्य अमृतसम्पादनमस्मिन् मार्गे निर्दिश्यते। मातृकासु परया विद्यया सम्पुटिता मालिनी एव मातृका प्रशस्यते।

---

१. श्रीतन्त्रालोके वि० २९।८।

२. श्रीतन्त्रालोके २९ आ०, पृ० ११।

३. श्रीतन्त्रालोके २९ आ०, श्लो० १७।

मलते विश्वं स्वरूपे धत्ते इति मालिनी, अथवा मालयति अन्तःकरोति कृत्स्नं जगद् इति च मालिनी। अस्या भिन्नयोनित्वाद् योनीनां च विसंष्ठुलत्वान्नादिफान्तेति मालिनी-क्रमः। तद्यथा—न, ऋ, ॠ, लृ, ॡ, थ, च, ध, ई, ण, उ, ऊ, ब, क, ख, ग, घ, ङ, इ, अ, व, भ, य, ड, ढ, ठ, झ, ञ, ज, र, ट, प, छ, ल, आ, स, अः, ह, ष, क्ष, म, श, अं, त, ए, ऐ, ओ, औ, द, फ[1] इति।

मालिनी हि भगवती मुख्यं शाक्तं रूपं बीजयोनिसंघट्टनेन समस्तकामदुघामन्वर्थं चैतन्नाम रुद्रशक्तिमालिनीभिरुक्ता, फलेषु पुष्पिता संसारशिशिरसंहारनादभ्रमरीसिद्धिमोक्षधारिणी ज्ञानादानशक्तियुक्ता इति रलयोरेकत्वस्मृतेः। अत एव भ्रष्टविधिरपि मन्त्र एतन्न्यासात् पूर्णो भवति। तदुक्तम्[2]—

अनन्तैः कुलदेहैस्तु कुलशक्तिभिरेव वा।
मालिनीं तु यजेद्देवीं परिवारितविग्रहाम्॥
अभिन्नयोनिमध्ये तु नादिफान्तं कलौ युगे। इति।

कुलमार्गेऽस्मिन् शरीरमेव परात्परं तीर्थम्। न हि शरीरादन्यत्र बाह्यं तीर्थमुपयुक्तम्। गुरुरेवात्र परात्परं तत्त्वम्।

गृणात्युपदिशति गुरुरात्मोपदेशदातर्यन्वीयते। तदुक्तम्[3]—

गुशब्दस्त्वन्धकारः स्याद् रुशब्दस्तन्निरोधकः।
अन्धकारनिरोधत्वाद् गुरुरित्यभिधीयते॥
गुह्यागमात्मतत्त्वान्ध·········बोधनादपि।
रुद्रादिदेवतारूपाद् गुरुरित्यभिधीयते॥ इति।

अतो गुरुवाक्यमुल्लङ्घ्य किमपि कृत्यमनिष्टकारकम्। ज्ञानप्रवाहमार्गेऽस्मिन् मण्डल-पीठ-मुद्रा-मन्त्रेति चतुर्णामेवात्र प्राशस्त्यम्।[4]

वाञ्छातिरिक्तदारं सर्वसिद्धीश्वरं गुरुम्।
भजामि तन्मयो भूत्वा तं हंसमण्डलोपरि॥ इति।

मण्डलम्—गुरोर्मण्डलम्। पीठान्येकपञ्चाशत्। यथा सांख्यायनतन्त्रे[5]—

पीठांस्तु विन्यसेद्देवि मातृकास्थानके प्रिये।
सितासितारुणश्यामहरित्पीतान्यनुक्रमात्।
पुनः क्रमेण देवेशि पञ्चाशत् पीठसञ्चयः॥ इति।

यथा—अं कामरूपाय नमः। आं वाराणस्यै नमः। इं नेपालाय नमः। ईं पौण्ड्रवर्धनाय नमः। उं पुरस्थितकाश्मीराय नमः। ऊं कान्यकुब्जाय नमः। ऋं पूर्णशैलाय नमः। ॠं अर्बुदाचलाय नमः। लृं आम्रातकेश्वराय नमः। ॡं एकाम्राय नमः। एं त्रिस्रोतसे नमः। ऐं

१. मालिनीविजयोत्तरे तन्त्रे अधि० ३ श्लो० ३७-४१।
२. परात्रिंशिका वि० पृ० १५४।   ३. कुलार्णवे।
४. रु० या० उ० त० द्वि० पट० ३२ श्लो०।   ५. सांख्यायनतन्त्रे पट० ३२।

कामकोटये नकः । ओं कैलासाय नमः । आँ भृगुनगराय नमः । अं केदाराय नमः । अः चन्द्र-पुष्करिण्यै नमः । कं श्रीपुराय नमः । खं ओंकाराय नमः । गं जालन्धाराय नमः । घं मालवाय नमः । ङं कुलान्तकाय नमः । चं देवीकोटाय नमः । छं गोकर्णाय नमः । जं मारुतेश्वराय नमः । झं अट्टहासाय नमः । ञं वैराजाय (विरजा) नमः । टं राजगृहाय नमः । ठं महापथाय नमः । डं कोलापुराय नमः । ढं एलापुराय नमः । णं कालेश्वराय नमः । तं जयन्तिकायै नमः । थं उज्जयिन्यै नमः । दं चित्रायै नमः । धं क्षीरिकायै नमः । नं हस्तिनापुराय नमः । पं उड्डीशाय नमः । फं प्रयागाय नमः । बं षष्ठीशाय नमः । भं मायापुर्यै नमः । मं जलेशाय नमः । यं मलयाय नमः । रं श्रीशैलाय नमः । लं मेरवे नमः । वं गिरिवराय नमः । शं महेन्द्राय नमः । षं वामनाय नमः । सं हिरण्यपुराय नमः । हं महालक्ष्मीपुराय नमः । ळं ओड्याणाय नमः । क्षं छायाछत्राय नम इति ।

एतान्येव पञ्चाशदेकपीठानीति पीठरूपेण गृह्यते ।

मुद्रा—

मुदं कुर्वन्ति देवानां मनांसि तारयन्ति च ।
तस्मान्मुद्रेति संख्याता.......................... ।।
मुदं स्वरूपलाभाख्यं देहद्वारेण चात्मनाम् ।
रात्पर्ययति यत्तेन मुद्रा प्रकीर्तिता ।।[१] इति ।

एषा विद्या योगक्रियाचर्याभिरशेषपाशजालान्मोचयित्वा कायीयपुर्यष्टक (मनोबुध्यहङ्कारः पञ्च तन्मात्राणि) संस्कारान् द्रावयन्ती (ग्लापयित्री) या सा मुद्रा । मुद्राशब्दस्य योग एव पर्यायः । सा च मुद्रा चतुर्विधा, कायकरवाक्चित्तभेदात् । इत्थं कायिकी, करजा, मन्त्रिकी, मानसी इति चतुर्विधाभिर्मुद्राभिश्चित्तं वागिन्द्रियं करशरीरौ संशोध्य जीवः सर्वमपि पाशजालं भित्वा शिवस्वरूपं व्रजेत् ।

मन्त्रः—मत्रि गुप्तभाषणे इत्यस्माद् धातोर्मन्त्रशब्दो निष्पद्यते । अत्र तु मन्-त्रैङ्धातुभ्यां सहयोगेन निष्पन्नमन्त्रशब्दस्यैवार्थो गृह्यते । मननात् त्रायते रक्षत्यसौ मन्त्रः । मननात् त्राण-कर्तृत्वमेव मन्त्रशास्त्रे मुख्यतया गृहीतः । तदुक्तम्[२]—

मोचयन्ति च संसाराद् योजयन्ति परे शिवे ।
मननत्राणधर्मित्वात् तेन मन्त्रा इति स्मृताः ।। इति ।

सर्वे मन्त्राः परामृतसाराः चित्प्रकाशात्मकाः सृष्टिस्थित्यादिपञ्चकृत्यकर्तृत्वाधिकारं बिभ्रति । मुख्यतस्तु पाशमोचनशिवत्वाभिव्यक्त्यनुग्रहकर्तृत्वादिधर्मत्वाद् मन्त्रा उच्यन्ते । परशुरामकल्पसूत्रे—"मन्त्राणामचिन्त्यशक्तिता"[३] इति सूत्रे अनायासेन तेषु ज्ञानवारिकाया अविद्याया निवर्तनसामर्थ्यं प्रतिपादितम् । तत्रैव "वर्णात्मका नित्याः शब्दाः"[४] इति वर्णसमुदाय-रूपाणां शब्दानां नित्यत्वमभिहितम् । सौभाग्यसुधोदयस्य प्रथमखण्डे वर्णात्मकाः वर्णसमुदाय-

---

१. श्रीतन्त्रालोके ।
२. नेत्रतन्त्रम्—अ० २१ ।
३. परशु० क० प्र० ख० सू० ८ ।
४. परशु० क० प्र० ख० सू० ७ ।

रूपाः शब्दा मन्त्रा नित्या मूलविद्यासमसत्ताकाः, न तु कालत्रयाबाध्यत्वम्, अज्ञाननिवृत्तौ स्वस्वरूपातिरिक्तदेवतायास्तद्वाचकवाचकमन्त्राणाञ्चासत्त्वात्। स्वच्छन्दोद्योते एकादशपटले मन्त्रोऽपि अन्तर्गुप्तभाषणात्मकपरपरामर्शसतत्त्वेन मननत्राणधर्मापरतत्त्वप्राप्त्युपायः परमेशात्मैव। परमेश्वर एव हि उपेयपदवदुपायरूपतया स्फुरितः। एतेन परमेश्वर एव मन्त्राणामुपेय उपायरूपोऽपि। शिवसूत्रविमर्शिन्याम्[1]—

मन्त्राणां जीवभूता तु या स्मृता शक्तिरव्यया।
तया हीना वरारोहे निष्कलाः शरदभ्रवत्॥ इति।

तत्रैव 'चित्तं मन्त्रः'[2] इति सूत्रे चेत्यते विमृश्यते अनेन परं तत्त्वमिति चित्तम्, पूर्णस्फुरत्ता सतत्त्वप्रसादप्रणवादिविमर्शरूपं संवेदनं चित्तम्। तदेव मन्त्र्यते गुप्तमन्तर्भेदेन विमृश्यते परमेश्वररूपमनेनेति कृत्वा मन्त्रः। एतेन परस्फुरतात्मकमननधर्मात्मता भेदमयसंसारप्रशमनात्मकत्राणधर्मता च चित्तरूपमन्त्रस्य निरूपिता।

विद्याशरीरो भगवान् शब्दराशिः, तस्य सत्ता अशेषविश्वाभेदमयपूर्णाहंविमर्शनात्मा स्फुरत्ता। सैव मन्त्राणां हृदयम्। तदुक्तम् "विद्याशरीरसत्ता मन्त्ररहस्यम्"[3] इति। महार्थमञ्जर्याम् "मननत्राणधर्माणो मन्त्राः" इति ह्याम्नायः। तत्र मन्त्रानुसन्धातुः स्वेच्छामात्रेण उपाधिना 'विभवः' 'सङ्कोचः' इति उपाधिद्वयमस्ति, तयोर्विभवो नाम विश्वतदुत्तरोभयसामरस्ययुक्त्या अहंभावभावनात्मा विकाशः पारमैश्वर्यमुच्यते। सङ्कोचस्तद्विपर्ययात्, अपूर्णत्वाभिमननं तत्पाशवमित्याख्यायते। एवं स्थिते तादृगात्मनि विकाशे समुल्लसति। तस्य च यन्मननम् उपरि-उपरि यथा परामर्शानुस्यूतस्वभावश्चमत्कारः, तत्प्रकृतं यस्यास्तदुक्तरूपे सङ्कोचे प्रस्तुते त्राणं सङ्कोचोऽपि विचार्यमाणश्चिदात्मैक्येन प्रथमानत्वात् चिन्मय एव, अन्यथा तु न किञ्चिदिति श्रीप्रत्यभिज्ञाहृदयमर्यादया तस्यापि सङ्कोचस्य वैश्वात्मप्रथानुप्रविष्टतानुसन्धानोत्पादनद्वारा स्वस्वभावभङ्गप्रसङ्गरूपचाकित्यव्यपोहनलक्षणं रक्षणं तन्मयी, हेतुद्वयेन वेद्यविक्षोभसर्वग्रासविश्रृङ्खललोल्लासायानुभूतिः स्वहृदयैकसंवेद्या विमर्शशक्तिः, सैव मन्त्रः।

चिच्छक्तेः स्वस्वभावो यः स मन्त्रः परिगीयते॥[4] इति।

अत्र वीरसाधकस्यैव अभ्यर्हितत्वम्। देशकालव्रतादिनियन्त्रणा नात्र सिद्धये, अपि तु विघ्नकरत्वेन स्मर्यते। तदुक्तम्—

न तिथिर्न च नक्षत्रं नोपवासो विधीयते।
ग्राम्यधर्मरतः सिद्ध्येत् सर्वदा स्मरणेन हि॥[5]

'सकृद्विभातोऽयमात्मा' इति न्यायेन महाप्रकाशमयी संविद् अनिदं प्रथमतया प्रवृत्ता अनुपरतेन रूपेण आभासते। अतः कुलयागे कालस्य क्रमस्य वा नात्र नियमः—

---

१. शिवसूत्रविमर्शिनी, पृ० ४८, काश्मीर सिरीज। २. शिवसूत्रवि० सू० १।
३. शिवसूत्रवि० सू० ३। ४. शिवसू० वा० द्वि० प्र० पृ० ३१ काश्मीर सिरीज।
५. श्रीतन्त्रालोके २९–६५।

क्रमो नाम न कश्चित् स्यात् प्रकाशनाय संविदि।
चिद्भावो हि नास्त्येव तेनाकालं तु तर्पणम् ॥[1]

अद्वयमार्गस्यास्य ज्ञानमूलत्वाद् मन्त्रमन्त्रिणोः पार्थक्ये सिद्ध्यभाव एव। अत्र विकल्पभावनैव सिद्धिविरोधिनी मता। तदुक्तम्[2]—

अन्यः सोऽन्योऽहमित्येवं विकल्पं नाचरेद्यतः।
यो विकल्पयते तस्य सिद्धिमुक्ती सुदूरतः॥ इति।

नित्योदितायाः पराशक्तेः सततसान्निध्येऽपि बाह्यचर्याविहीनस्य सिद्ध्यभावात् श्रौतो विधिरपि आवश्यक एव। यथा—

आनन्दो ब्रह्म परमं तत्र देहे त्रिधा स्थितम्।
उपकारिद्वयं तत्र फलमन्यत्तदात्मकम् ॥[3] इति।

एषां ब्रह्ममयत्वादेतदनुष्ठाता ब्रह्मचारीत्युच्यते—

"ओष्ठान्त्यत्रितयासेवी ब्रह्मचारी स उच्यते"[4]।

भगवता मनुनापि[5]—

न मांसभक्षणे दोषो न मद्ये न च मैथुने।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला॥ इति।

इत्युक्त्या मांसादिनिवृत्तौ शास्त्रं प्रयोजकम्, न तु तत्प्रवृत्तौ, प्रवृत्तेः स्वाभाविकत्वात्। भागवतेऽपि[6]—

लोके व्यवायामिषमद्यसेवानित्यास्तु जन्तोर्न हि तत्र चोदना।
व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैराशु निवृत्तिरिष्टा॥

कुलमार्गेऽस्मिन् श्रौतविधिविषये जयरथेन[7]—

शिवशक्त्यात्मकं रूपं भावयेच्च परस्परम्।
न कुर्यान्मानवीं बुद्धिं रागमोहादिसंयुताम्॥
ज्ञानभावनया सर्वं कर्तव्यं साधकोत्तमैः॥ इति।

एतेन सर्वोऽपि शास्त्रान्तरविरोधः परिहृतः। अत्र निर्विकल्पकवृत्तीनां महात्मनां ज्ञानिनामेवाधिकारः, येषां स्ववृत्तिप्रतिक्षेपेण संविदद्वैते एव सदानुसन्धानम्।

कौलज्ञानविषयेऽस्मिन् वशिष्ठं सम्बोधयन् कुलपुत्रेण श्रीबुद्धेनेत्थं प्रतिपादितं यत् त्वामहमनुत्तमं कुलमार्गं वक्ष्यामि, विज्ञातेन येन क्षणाद्रुद्रत्वं प्राप्नुयात्। आदौ विवेकाक्रान्तमानसो धीरः शुचिर्भूत्वा एकाकी निर्जने स्थित्वा कामक्रोधादिपशुसङ्गविवर्जितः, पशुभावे स्थिरचेता दमयोगाभ्यासरतः, नित्यं वेदमार्गाश्रयेण वेदार्थनिपुणो भूत्वा धर्मात्मा शीलदार्ढ्यगुणान्वितः, नित्यं श्वासमार्गे मारुतं स्थापयन् मनोलयं विदध्यात्। एवमभ्यासयोगेन योगी शनैः शनैर्वशीभूयात्। यतो हि—

---

१. श्रीतन्त्रालोके २९-८०। २. श्रीतन्त्रालोके २९-९०। ३. श्रीतन्त्रालोके २९-९७। ४. श्रीतन्त्रालोके २९-९८। ५. मनु० ५-१६। ६. श्रीमद्भागवतम्, स्क० ११, अ० ५।११। ७. श्रीतन्त्रालोके, आ० २९, पृ० ७३।

प्राणायामेन सिद्धिः स्यान्नरो योगेश्वरो भवेत् ।[1] इति ।

एवं वायुधारणेन कुम्भकज्ञो भक्तो योगी दिवानिशमेकान्तभक्तिसंयुत आदौ चिद्रूपायां चित्तं समाधाय स्थिराशयः सन् कुलमार्गमहोदयार्थं वीरभावमवलम्ब्य ततः शक्तिचक्रम्, सत्त्वचक्रम्, वैष्णवं नवविग्रहं समाश्रित्य, शिवमांसाचलप्रियां सर्वसत्त्वस्वरूपिणीं कोटिसौदामिनीभासां श्रीदां प्रत्यक्षदेवतां चैतन्यानन्दविग्रहां चण्डोद्वेगनिकृन्तिनीमष्टादशभुजां रौद्रीं प्रत्यक्षदेवतां चिद्रूपां ज्ञाननिलयां कुलकात्यायनीं परामाश्रित्य कुलमार्गाश्रयो भूत्वा मन्त्रं प्रजपेत् । यतो हि कुलमार्गात्परं मार्गं जगत्त्रये को जानाति ? एतन्मार्गप्रसादेन ब्रह्मा सृजति, सत्त्वस्वरूपो विष्णुः पालयति, उत्तममानसो महान् वीरेशः, सर्वसेव्यमहापूज्यो यजुर्वेदाधिपः शिवश्च संहारकर्ता । अतः कुलं समाश्रित्य सर्वेषामप्यगोचरमाचारसारमेतत्कौलमार्गं साधयन् षण्मासाभ्यासयोगतो विप्रः शक्तिं संसाध्य कुलमार्गप्रसादतः पूर्णयोगी भवेत् । यतो हि शक्तिं विना शिवोऽप्यशक्तस्तदान्ये ये जडबुद्धयस्तेषां कथैव का ? अतो विप्र वशिष्ठ ! त्वमपि महाशक्तिसेवनं मद्यसाधनं कुरु । येन महाविद्यापदाम्भोजदर्शनं समवाप्स्यसि । एवमुक्त्वा बुद्धरूपी कुलपुत्रो वशिष्ठं साधनं कारयामास[2]—

एतच्छ्रुत्वा गुरोर्वाक्यं स्मृत्वा देवीं सरस्वतीम् ।
मदिरासाधनं कर्तुं जगाम कुलमण्डले ॥
मद्यं मांसं तथा मांसं मुद्रा मैथुनमेव च ।
पुनः पुनः साधयित्वा पूर्णयोगी बभूव सः ॥
योगमार्गं कुलमार्गमेकाचारक्रमं प्रभो ।
योगी भूत्वा कुलं ध्यात्वा सर्वसिद्धीश्वरो भवेत् ॥
सन्धिकालं कुलपथं योगेन जडितं सदा ।
भगसंयोगमात्रेण सर्वसिद्धीश्वरो भवेत् ॥
एतद्योगं विजानीयाज्जीवात्मपरमात्मनोः ॥ इति ।

इत्थं शक्तिप्रकर्षविषये कौलमते मनोहरो मनोवैज्ञानिकश्च हेतुर्दत्तः । शक्तिशक्तिमतोः समप्राधान्येऽपि शक्तेर्वैशिष्ट्यम् । कथमिति चेत्, तत्र साम्ययोगेऽपि शक्तिरेव पुनस्तद्वदुचितां शक्तिमदानुगुण्येनोल्लसितां सृष्टिं पुष्णाति, गर्भं धारयेन्न शक्तिमान्, अतो अस्या वैशिष्ट्यम् । ततश्च गर्भधारणादेवास्याः सर्वत्र शास्त्रे प्रविकस्वरमध्यधामत्वमुक्तम्[3]—

प्रविकस्वरमध्यपदाशक्तिः शास्त्रे ततः कथिता ।
तद्द्वारेण च कथितक्रमेण सञ्चारयेन्नृषु ॥ इति ।

एतदभिप्रायेणैव जयरथेन[4]—

स्त्रीमुखे निक्षिपेत् प्राज्ञः स्त्रीमुखाद् ग्राहयेत् प्रिये ।
स्त्रीमुखाच्च भवेत् सिद्धिः सुसिद्धं तासु तत्फलम् ॥ इति ।

---

१. रुद्र० उ० त० १७, प० १४१ ।	२. रुद्र० उ० त०, प० १७—१६०—६३ ।
३. श्रीतन्त्रालोके, आ० २९—१२२ ।	४. श्रीतन्त्रालोके, आ० २९ वि० १२२ ।

अत एव श्रीकल्लटनाथप्रोक्तसमस्तार्थलब्धये संस्कृतां शक्ति गुरुः कुर्यादिति वाक्यं प्राह। भगवता महेश्वरेणापि पिचुवक्त्राद्यपरपर्यायं योगिनीवक्त्रमेव मुख्यचक्रमुक्तम्। यतस्तस्मादेव ज्ञानं प्राप्यते। परसंवित्समावेशोऽस्य जायत इत्यर्थः। शान्तोदितसूतिकारणं परं कौलमित्याद्युक्त्यैतदवस्थाद्वयोदयहेतुभूतां तत्सङ्घट्टमयीं विसर्गसत्तामनुसन्दधते, तत् स्फारस्फारमेवेदं सर्वमित्यामृशन्ति।

अत एव "आनन्दो ब्रह्मणो रूपम्" इति श्रुतेरानन्दमयतया संविन्नैकट्यात् शुद्धतमवपुषा देवीचक्रतर्पणमित्युक्तम्। तदेतत् संक्षिप्य भावनापरकतया भावनीयम्। येन मध्यचक्रे एवैकाग्र्यं सिद्धचेत्। तदुक्तम्[1]—

एतत् खेचरमुद्रावेशेऽन्योन्यस्य शक्तिशक्तिमतोः।
पानोपभोगलीलाहासादिषु यो भवेद्विमर्शमयः॥
अव्यक्तध्वनिशवस्फोटश्रुतिनादनादान्तैः।
अव्युच्छिन्नानाहतरूपैस्तन्मन्त्रवीर्यं स्यात्॥ इति।

यथा जयरथेन—एतस्याः षड्रमुद्रालक्षणायां खेचरीमुद्रायामावेशाच्छक्तिशक्तिमतोरन्योन्यस्य पानोपभोगादौ योगविमर्शात्माऽनुभवः समुदियात्। तदव्यक्ताद्यष्टभेदभिन्नपरनादामर्शस्वभावमात्रं वीर्यं स्यात्। अत्रैव पौनःपुन्येन भावनातस्तल्लाभो भवेत्। तदित्थं विद्यामन्त्रमुद्रामण्डलात्मतया चतुष्पीठं तावदिदं शास्त्रम्।

रहस्यत्वात् स्पष्टशब्दैरनुक्त्वा कुतूहलशान्त्यै किमपि निर्दिष्टम्। पीठोऽप्यत्र देह एव पूर्वमुक्तम्। स्वदेह एवायतनं नान्यदायतनं व्रजेदिति, किमनात्मरूपैर्देहादिभिः संविन्मात्रस्थितं देवीचक्रमेव विद्वद्भिस्तर्पणीयम्।

कुलमार्गानुयायिनः कौलाः शरीरमेव महातीर्थं मन्वते। तत्रैव प्राणायामपरायणाः कुम्भकेन वायुसङ्ग्रहं कृत्वा महातीर्थे सुस्नाताः सन्तः सन्ध्यामातिष्ठन्ते। तदुक्तम्[2]—

अथ सन्ध्यां महातीर्थे कुलनिष्ठः समाचरेत्।
कुलरूपां योगविद्यां योगयोगाद्यतीश्वरः॥
शिवशक्तौ समायोगो यस्मिन् काले प्रजायते।
सा सन्ध्या कुलनिष्ठानां समाधिस्थे प्रजायते॥
शिवं सूर्यं हृदि ध्यात्वा भालशक्तीन्दुसङ्गमम्।
सा सन्ध्या कुलनिष्ठानां समाधिस्थे प्रजायते॥
अथवेन्दुं शिवं ध्यात्वा हृत्सूर्यशक्तिसङ्गमम्।
संयोगविद्या सा सन्ध्या समाधिस्थे प्रजायते॥

देहादौ चिदेवैका परितः परिस्फुरति। सर्वविकल्पनिर्मुक्तः समस्तदेवताधारे प्रविष्टः कः साधकः कां सिद्धिं न लभेत, अर्थात् प्रध्वस्तभेदान्धकारे प्रकाशितस्वात्मानन्दप्रधाने पिण्डे योगिन्यादिसहिताः सर्वा देवताः समुल्लसन्ति। अथवा निःशङ्कग्रहणात् शक्तिगोत्रो मायोज्झितो भवेत्।

१. श्रीतन्त्रालोके आ० २९।१५४—१५५। २. रुद्र० ज० त० २६।९२-९५।

इत्युक्त्या रत्नपञ्चकादिचरुणा हवनयागनिष्पादने आनन्देश्वरसन्तोषेण सर्वसिद्धीनां पात्रत्वं लभते। इत्यत्र विचारणीयं किञ्चित् सृष्टेरारभ्य अद्य यावत् केचनैव परिगणिता ब्रह्मचर्यनिष्ठा अभूवन्, ते च नारदः, शुकः, सनत्कुमारः, भीष्मः, हनुमान् इत्येते एव कामजयिनः प्रातः-स्मरणीयाः स्मर्यन्ते। अन्ये सर्वे कामपाशबद्धा महतोत्साहेन रक्षायां सन्नद्धा अपि पतन्तोऽस्य प्राकृतिकप्रकोपस्य पराधीनतामावहन्ति। अतो निग्रहरूपनियन्त्रणां परित्यज्य निर्मर्यादशास्त्र-मिदं सर्वेषां कृते वैधभोगमार्गं निर्दिशन् न काम‌पि समालोचनामर्हति। गुरुसान्निध्ये संवसन् साधको दृढाध्यात्मरसिको ब्रह्मचर्यनिरतोऽस्मिन् शास्त्रे भावनाबलेनात्मतत्त्वं लभेतेत्यत्र न कोऽपि संदेहावसरः। अतः कुलमार्गो न यथेच्छाचारिभिर्ग्राह्यः प्रवेष्टव्यो वा, अपि तु दृढानिष्ठै-र्गुरुतत्त्वैकमाश्रयद्भिरात्मलाभप्रवणैरेवैष राजमार्गः सेवितव्यः। शरीरे इडा-पिङ्गला-सुषुम्नादि-त्रिवेण्याः सङ्गमलाभेन तत्रैव चिदानन्दे निमग्नतया परं शुचित्वलाभात् सहस्रारे विराजितस्य शक्तिशक्तिमद्रूपयामलतन्त्रस्य निदिध्यासनाज्जीवनसाफल्यं लब्धव्यम्। रागपूर्वकत्वादेव विरागस्य लाभाय रागः सर्वात्मना सेव्यः। सेविते च तस्मिन् तन्निष्ठाकर्षणाद्युपशमात् तीव्रवैराग्यलाभेन ध्रुवमनावर्तकमात्मधाम प्राप्येत इति धन्योऽयं कुलमार्गं आगमनिष्णातैर्मनो-विज्ञाननिपुणैरन्वेषित इत्यत्र रुचिभेदाद् न पूर्वाग्रह आस्थेयः, अपि तु एष निष्कण्टकः पन्थाः सर्वप्रयत्नेन समाश्रणीयः। एतेन विशिष्टप्रकारकयोगेनात्मलाभो भवेदेव। अयमेव सर्वोत्तमो योगः। ज्ञानगतिमतीनामेष कौलमार्गो विराजत इति शम्।



आथर्वणिकाद्भुतशान्तिविमर्शः

श्री-श्रीकिशोरमिश्रः, वेदाचार्यः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

अद्भुतलक्षणम्

अद्भुतकर्मणां लक्षणप्रसङ्गे कौशिकगृह्यसूत्रटिप्पणीकर्त्रा केशवेनोक्तम् "अद्भुतकर्मपरिभाषा उच्यते, लोकविरुद्धं यद् दृश्यते, तदद्भुतमित्युच्यते। अद्भुतशान्तिर्यत्र न क्रियते तत्र दोषो भवति। अद्भुतं यत्र भवति तत्पराभवति विनश्यति। विनाशार्थेऽद्भुतं देवाः सृजन्ति"[1] इति।

लक्षणमिदं युक्तमपि विश्लेषणार्हम्। यास्केन स्वीये निरुक्ते अद्भुतशब्दे "अभूतमिव" इति विवेचनमुक्तम्[2]। तेन चेदं फलति यत् सृष्टौ कदाचित् संजायमानमपि सामान्यतो यन्न जायते, न वा सामान्यतः पूर्वं जातं, तादृशः कस्यापि पदार्थस्य विशिष्टा शास्त्रोक्ता च स्थितिरद्भुतशब्दवाच्या। अयमर्थो वसिष्ठसंहितायाः—"अन्यत्वं प्रकृतेर्यत् तदसावुत्पातसंज्ञकः" इति वचनेनापि संवदति। उत्पातः, उपसर्गः, अद्भुतमिति पर्याया इति शान्तिसारेण ज्ञायते[3]। पूर्वमपि सामान्यतया न भूतम्, न वा सामान्यतया भवति, किन्तु केनाप्यमङ्गलसूचकेन देवेन प्रकोपेन विशिष्टा स्थितिर्यदा भवति, तदद्भुतत्वाच्छान्तिः कर्तव्येति प्राचामाशयः। आधुनिका वैज्ञानिका अपि औत्सर्गिकां प्राकृतिकां गतिमतिक्रम्य अकस्माद् या स्थितिर्दृष्टा भवति तत्र दर्शनानन्तरं प्रकृतिविपर्ययमन्विषन्ति, अन्वेषमाणा अपि ते समुद्भूताया अप्राकृतिकायाः स्थितेः तत्त्वज्ञानाभावात् पूर्वानुभवविरहाच्चामङ्गलरूपत्वं न वोद्धुं शक्नुवन्ति। अस्माकं भारतीयाः पूर्वजा महर्षयोऽप्राकृतिकीं स्थितिमुपलक्ष्य तत्त्वज्ञानेनामङ्गलमावेदिषुः, करुणापराश्च ते परिज्ञातस्यामङ्गलस्यामङ्गलनिवृत्त्युपायस्य च निर्देशं स्वसम्प्रदायविद्भ्य आचार्येभ्य आचार्याश्च स्वसान्तानिकानां परिज्ञानाय ग्रन्थेषु समुपदिदिशुः।

अद्भुतानि च त्रिविधानि दिव्यान्तरिक्षपार्थिवभेदात्। तथा चाथर्वपरिशिष्टे—दिव्यांश्चैवान्तरिक्षांश्च उत्पातान् पार्थिवांस्तथा।[4] इति।

वसिष्ठसंहितायामेतेषां स्वरूपमुक्तम्[5]। यथा—

ग्रहर्क्षजाः केतवश्चोत्पाता दिव्यसंज्ञकाः।
निर्घाताः परिवेशोल्कापुरन्दरधनुर्ध्वजाः॥
एवमाद्या महोत्पाता अन्तरिक्षाह्वयाः स्मृताः।
उत्पद्यते क्षितौ यच्च स्थावरं वाथ जङ्गमम्।
तदेकदेशिकं भौम उत्पातः परिकीर्तितः॥

---

१. कौ० गृ० ९३।१ भाष्ये।
२. नि० १।६।
३. शा० सा० पृ० १३६।
४. अ० प० ७१।१।१।
५. शा० सा० पृ० १३६।

अद्भुतफलकालोऽप्युक्तस्तत्रैव[1]—

भौमाः स्युस्तुच्छफलदा आन्तरिक्षास्तु मध्यमाः ।
सम्पूर्णफलदा दिव्या वर्षादर्धात् तदर्धतः ॥ इति ।

अप्राकृतिकायाः स्थितेरमङ्गलतानिवृत्तये उपदिश्यमानं कर्म प्रायश्चित्तिरित्याथर्वणिकाः संज्ञायन्ते । प्रायश्चित्तं प्रायश्चित्तिरित्युभौ समानार्थत्वेन प्रतीतावपि शब्दौ याज्ञिकपरिभाषायां भिन्नार्थौ वर्त्तेते । प्रायश्चित्तशब्दो हि—

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तपो निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम् ॥

इति मनुर्निरुवाच[2] । पेठ्ठस्तु—"प्रायः पापं विजानीयात् चित्तं तस्य विशोधनम्" इत्यब्रवीत्[3] ।

हारीतश्च—"प्रयतत्वाद्वोपचितमशुभं नाशयतीति प्रायश्चित्तम्" इति शब्दार्थमाह[4] ।

वचनसामञ्जस्यात् पापक्षयमात्रसाधनं कर्म प्रायश्चित्तमिति लक्षणम् । अद्भुतं हि न पापं जनयति, न वा पापं विनाशयति । तस्मात् लक्षणाप्रवृत्तेरद्भुतनिमित्तकृता शान्तिर्न प्रायश्चित्तमिति स्पष्टं भवति । प्रायश्चित्तिरित्याथर्वणिकेषु व्यवहृतः शब्दः शान्तिपर्यायः । अन्वर्थतां चास्य शब्दस्य याज्ञिकपीयूष एवं व्याचख्यौ—

"अय् गतौ धातोः अयः गतिः तस्य च प्रकृष्टत्वं स्वभावातिक्रमणम् । चिती संज्ञाने इत्यतश्चित् । संज्ञाते तायते या क्रिया सा चित्तिः । ततश्च लोकविरुद्धपदार्थगतिज्ञानमाश्रित्य शास्त्रनिर्दिष्टामङ्गलविनिवृत्तये या क्रिया तायते सा प्रायश्चित्तिः" इति ।

अत एव च प्रायश्चित्तिशब्दस्य शान्त्यपरपर्यायता सिद्ध्यति ।

पारस्करगृह्येऽपि[5] "राज्ञोऽक्षभेदे" इत्याद्यद्भुतमुपक्रम्य काचन प्रायश्चित्तिर्विहिता, साऽपि शान्तिरूपैव । अत एव हरिहरः 'प्रायश्चित्तिः' इति सूत्रव्याख्यानम्—"इदं कर्म प्रायश्चित्तिर्दुर्निमित्तसूचितदुरितापहारिणी, अतः सति निमित्ते भवति" इत्यारचयामास[6] ।

शान्तिलक्षणमाह शान्तिमयूखे नीलकण्ठः—"अस्पष्टपापनिदानैकैहिकमात्रानिष्टनिवर्त्तकं पापाप्रयोजकं वैधं कर्म शान्तिकम्"[7] इति ।

शान्तिरेव शान्तिकम् । स्वार्थे कप्रत्ययः । स्पष्टपापे हि प्रायश्चित्तं कर्म । यत्र च पापस्य स्पष्टता नास्ति, परं तन्निमित्तमैहिकममङ्गलं शास्त्रतो ज्ञायते, तस्मादुच्यतेऽस्पष्टपापनिदानक इति ।

अद्भुतान्यपि पापनिमित्ततयैवोद्भवन्ति । तथा च वसिष्ठसंहितायाम्[8]—

अधर्मतस्त्वसत्याच्च नास्तिक्यादतिलोभतः ।
अनाचारान्नृणां नित्यमुपसर्गः प्रजायते ॥ इति ।

१. शा० सा० पृ० १३६ । २. म० स्मृ० ११।४७ । ३. प्रा० म० पृ० २ ।
४. प्रा० वि० पृ० ३ । ५. पा० गृ० १।१०।१ । ६. पा० गृ० १।१०।१४ भाष्ये ।
७. शा० म० पृ० ३ । ८. शा० सा० पृ० १३६ ।

उपसर्ग उत्पातः अद्भुतं चेति पर्याया इति पूर्वमुक्तम् ।

ननु क्षयादिरोगहरदानादावतिव्याप्तिः, क्षयादेरस्पष्टपापनिदानकत्वाद् दानस्यैहिकफलसाधकत्वाच्च । तदेतन्न युक्तम्, क्षयादीनां न भवत्यस्पष्टपापनिदानकत्वम् । शास्त्रेण केषुचित् पापेषु क्षयरोगफलमाम्नायते । पूर्वजन्मकृतेऽपि पापेऽस्मिन् जन्मनि रोगसत्त्वे ऐहिकमात्रत्वमपि न वक्तुं शक्यते । तस्मान्न लक्षणातिव्याप्तिः । आमुष्मिकफलनिवारणाय ऐहिकेति पदमस्ति । प्रायश्चित्तं वारयितुं मात्रपदम् । प्रायश्चित्तं त्वामुष्मिकानिष्टनिवर्त्तकमपि वर्तते । अभिचारप्रत्यभिचारादौ वारयितुं पापाप्रयोजकमिति । इति शान्तिलक्षणस्य पदकृत्यम् । अत एवास्माभिः प्रायश्चित्तिकर्मण आरम्भेऽन्ते च शान्तिशब्देन कर्मसंज्ञा विहिता । याज्ञिकपीयूषस्तु—

ज्योतिःशास्त्राप्तकालं वा निमित्तं वाद्भुतं तु वा ।
आलम्ब्य शास्त्रविहिता क्रिया शान्तिः समुच्यते ॥

इत्याह । शान्तिशब्दनिर्वचनमप्याह स एव—

शाम्यत्यरिष्टं दोषं च तनोति क्षेममेव च ।
तस्मादेव क्रिया शान्तिस्तत्त्वज्ञैरभिधीयते ॥ इति ।

प्रायश्चित्तिशब्दव्यवहारकारणम्

प्रायश्चित्तिः शान्तिरित्युभौ पर्यायशब्दाविति पूर्वमुक्तम् । अत्रापीदमवधातव्यम्, शान्तिर्हि चतुर्विधा भवति—कालनिबन्धिनी, पदार्थनिबन्धिनी, क्रियानिबन्धिनी, अद्भुतनिबन्धिनी चेति । तत्र कालनिबन्धिनी मूलादिकालजननशान्तिः । पदार्थनिबन्धिनी सदन्तोत्पत्यादिशान्तिः । क्रियानिबन्धिनी भाद्रचतुर्थीचन्द्रदर्शनादिशान्तिः । अद्भुतनिबन्धिनी च कौशिकगृह्यसूत्रोक्ताः शान्तयः । तत्र अन्यासु त्रिषु शान्तिषु प्रायश्चित्तिशब्दो न प्रवर्तते, केवलमद्भुतनिमित्तशान्तावेव प्रायश्चित्तिशब्दः प्रवर्तते, पूर्वमुक्तस्य निर्वचनस्य तत्रैव सम्भवात् । अत एव महाशान्तेरमृतादिशान्तेश्च न प्रायश्चित्तिशब्देन व्यपदेशः । प्रायश्चित्तिरूपेऽपि कर्मणि शान्तित्वं त्वव्याहतमेव । अत एव सायणाचार्येण मन्त्राणामद्भुतकर्मसु विनियोगे तत्र तत्र शान्तिशब्दो व्यवहृतः ।

अद्भुतशान्त्यनुक्रमणिका

कौशिकगृह्यसूत्रे संहिताविध्यपरपर्याये त्रयोदशाध्याये त्रिचत्वारिंशत्सु कण्डिकास्वद्भुतशान्तय एव सङ्गृहीताः शान्तिविधीनां प्रारम्भे काचनानुक्रमणिकात्मिका कण्डिका सूत्रकारेणोपदिष्टा । अस्यां प्रथमायां कण्डिकायां कौशिकेनोपदेक्ष्यमाणानामद्भुतशान्तीनां नामधेयसङ्केत उक्तः । एतदनुक्रमणिकाप्रयोजनमाथर्वणिकस्य झटित्यद्भुतज्ञानार्थं भवति । इयं खलु सूत्रकारेण विशिष्टा शैली प्रदर्शिता । अनुक्रमणिकायामेकस्मिन् सूत्रे एका शान्तिः सङ्केतिता । परम्—'वडवागर्दभ्योर्मानुष्यां च'[1] इत्येकस्मिन् सूत्रे शान्तिद्वयमुपनिबद्धम् । तच्च समानकर्मत्वात् । अद्भुतविधानकण्डिकासु पृथक्करणं तु मानुष्याः शान्तौ तद्दानप्रसङ्गे निष्क्रयविधानार्थमिति वयं प्रतीमः । अद्भुतानीमानि स्पष्टप्रतिपत्तये साम्प्रतिकभाषानुरूपतया शान्तिशब्देन संयोज्य

---

१. कौ० गृ० ९३।१८ ।

नूतनेन नाम्ना अस्माभिरत्र सङ्गृह्यते । नामानीमान्यभिनवानि कौशिकविधानग्रन्थेष्वन्यत्राद्दष्टानि । अत्रानुक्रमणिकासङ्केतस्य पुरस्तादभिनवनामानि सम्यक् परिज्ञानाय दीयन्ते —

१. वर्षे	अद्भुतवर्षणशान्तिः
२. यक्षेषु	त्रासकजीवदर्शनशान्तिः
३. गोमायुवदने	मण्डूकविस्वरवदनशान्तिः
४. कुले कलहिनि	कुलकलहशान्तिः
५. भूमिचले	भूकम्पशान्तिः
६. आदित्योपप्लवे	आदित्यविकृतिशान्तिः
७. चन्द्रमसश्च (उपप्लवे)	चन्द्रविकृतशान्तिः
८. औपस्यामनुद्यत्याम्	उपोविकारशान्तिः
९ समायां दारुणायाम्	दारुणसंवत्सरशान्तिः
१०. उपतारकशङ्कायाम्	ग्रहस्थितिजनितावर्षणशान्तिः
११. ब्राह्मणेष्वायुधिषु	ब्राह्मणायुधित्वशान्तिः
१२. दैवतेषु नृत्यत्सु च्योतत्सु हसत्सु गायत्सु	देवप्रतिमाविकृतिशान्तिः
१३. लाङ्गलयोः संसर्गे	लाङ्गलसंसर्गशान्तिः
१४. रज्ज्वोस्तन्त्वोश्च	तन्तुसंसर्गशान्तिः
१५ अग्निसंसर्गे	अग्निसंसर्गशान्तिः
१६. यमवत्सायां गवि	यमलजननशान्तिः
१७. वडवागर्दभ्योः	यमलजननशान्तिः
१८. मानुष्यां च	यमलजननशान्तिः
१९. यत्र धेनवो लोहितं दुहिते	लोहितदुग्धशान्तिः
२०. अनडुहि धेनुं धयति	बलीवर्दंदुग्धपानशान्तिः
२१. धेनौ धेनुं धयन्त्याम्	धेन्वा दुग्धपानशान्तिः
२२. आकाशफेने	आकाशफेनशान्ति
२३. पिपीलिकानाचारे	पिपीलिकोपद्रवशान्तिः
२४. नीलमक्षानाचारे	नीलमक्षिकोपद्रवशान्तिः
२५. मधुमक्षानाचारे	मधुमक्षिकोपद्रवशान्तिः
२६. अनाज्ञाते	अनुक्तादभुतशान्तिः
२७. अवदीर्णे	भूम्यवदीरणशान्तिः
२८. अनुदक उदकोन्मीले	जलप्लुतिशान्तिः
२९. तिलेषु समतैलेषु	तिलसमतैलशान्तिः
३०. हविःष्वभिमृष्टेषु	हविर्दोषशान्तिः
३१. प्रसव्येष्वावर्तेषु	मूर्द्धन्यावर्तशान्तिः
३२. यूपे विरोहति	यूपविरोहणशान्तिः
३३. उल्कायाम्	उल्कापातशान्तिः

३४. धूमकेतौ सप्तर्षीनुपधूपयति	धूमकेतूत्पातशान्तिः
३५. नक्षत्रेषु पतापतेषु	नक्षत्रपातशान्तिः
३६. मांसमुखे निपतति	मांसमुखपतनशान्तिः
३७. अनग्नावग्नावभासे	अग्न्यवभासशान्तिः
३८. अग्नौ श्वसति	अग्निश्वासशान्तिः
३९. सर्पिषि तैले मधुनि च विष्यन्दे	मानवैषम्यशान्तिः
४०. ग्राम्येऽग्नौ शालां दहति	शालादहनशान्तिः
४१. आगन्तौ च	संसर्गजनितगृहदाहशान्तिः
४२. वंशे स्फोटति	वंशस्फोटकपालाङ्गारशान्तिः
४३. कुम्भोदधाने विकसत्युखायां सक्तुधान्यां च	नित्योपयोगिपात्रभङ्गशान्तिः

अद्भुतशान्तिकालविचारः

कौशिकगृह्यसूत्रे त्रिचत्वारिंशदद्भुतशान्तयः पूर्वोक्ताः प्रतिपादिताः, तासु पृथक्-पृथक् कश्चन विशेषकालो नोक्तः। परं प्रथमायां शान्तौ कालनिर्देशस्त्रिविधः कृतोऽस्ति[1]। स च कालः पर्वशब्देन सूत्रे उक्तः। तत्राद्भुतोत्पत्त्यनन्तरं प्रथमप्राप्ता अमावास्या पौर्णमासी वा प्रथमः कालः। पौर्णमास्यमावास्ये इति समुच्चयोक्तेरुभयोः समप्राधान्यमस्ति। पुण्यं नक्षत्रं द्वितीयः कालः। तस्य च ज्ञानं ज्योतिःशास्त्राद् विधेयम्।

कालविलम्बमसहमाने कार्ये तु निमित्तानन्तरमेव शान्तिः कर्त्तव्या।[2] न हि कुम्भोदधानस्य भङ्गे कालविलम्बो युक्तः। भङ्गानन्तरमपेक्षितद्रव्यसम्पादनोत्तरं यथासम्भवं शीघ्रमेव शान्तिः कर्तव्या। न तत्र पौर्णमास्यमावास्ययोः पुष्यनक्षत्रस्य वा प्रतीक्षा कर्तव्येति तृतीयः कालः। अयं तृतीयः कालः स्वविवेकेन निमित्तविशेषेण चोहनीयः।

अद्भुतशान्तिकर्तृनिर्णयः

अद्भुतशान्तौ यः फलेनान्वेति स एवाधिकारी। तच्च फलं बहुरूपम्। कुत्रचिदेक एव फलभोक्ता कुत्रचिच्च बहवः फलभोक्तारः। तत्रैकस्य फलभोक्तृत्वे स एव शान्ति प्रवर्तयेत्। कौशिकगृह्यसूत्रे बहूनां फलभोक्तृत्वप्रसङ्गे राजा, भूमिपतिः, प्रादेशिक इत्यादिशब्दास्तत्र तत्रोक्ताः सन्ति[3]। तत्र राजा नाम क्षत्रियकुलोत्पन्नो राज्याभिषेकविधिना राज्यसिंहासनेऽभिषिक्तो विशिष्टस्य भूभागस्य शासकः। भूमिपतिः क्षत्रियः क्षत्रियेतरजातिर्वा सावधिकायाः भूमेः स्वामित्वेनाधिकृतो निग्रहानुग्रहयोः समर्थोऽधिकारी। यः किल राजत्वेन लोके प्रसिद्धः, किन्तु भूमेः कस्मिश्चिद् भाग एवाधिपतिर्दण्डदानानधिकारी स कौशिकगृह्यसूत्रे प्रादेशिकशब्देनोक्तः[4]। लोके च जमीदार पवाईदार जागीरदार सामन्त इति शब्दैर्विभिन्नेषु प्रदेशेषु व्यवह्रियते। लोकतान्त्रिके चास्मिन् युगे प्रादेशिकशब्देन 'फार्म'पतिः कृषक इति वक्तुं शक्यते।

---

१. त्रीणी पर्वाणि कर्मणः पौर्णमास्यमावास्ये पुण्यं नक्षत्रम् (कौ० गृ० सू० ९४।७)।
२. अपि चेदेव यदा कदाचिदार्त्तय कुर्यात् (९४।८)।
३. तत्र राजा भूमिपतिर्विद्वांसं ब्रह्माणमिच्छेत् (९३।२)।
४. द्र० कौ० गृ० ९४।१७।

यद्यपि सूत्रे राजाभूमिपत्योर्द्वयोरेवाधिकार उक्तः, परं कुत्रचिदनिष्टफले कुलस्यापि सम्बन्धात्[1] कुलपतिरप्यधिक्रियत इति वयं प्रतीमः। एते सर्वे यजमानाः।

अन्येषु वेदेषु यजमानानां गृह्यकर्मसु कर्तृत्वं प्रसिद्धम्। परमत्राथर्वणिकेऽद्भुतशान्ति-कर्मणि यजमानानां कर्तृत्वं प्रेरणामूलकमेव। शान्तिकर्मणः साक्षात् कर्तृत्वं तु वृतस्य ब्रह्मण एवास्ति, "कर्त्रे (दक्षिणाम्) दद्यात्" इति तत्र तत्रोक्तेः। न हि कर्ता यजमानः स्वयं दक्षिणां ग्रहीतुं प्रभवति। दक्षिणाशब्दो हि परिक्रयार्थे द्रव्ये वर्तते। परिक्रयश्च स्वेतरस्यैव भवितुमर्हति। तस्मादद्भुतशान्तौ कर्तृशब्दो वृतस्य ब्रह्मणो वाचक इति ध्येयम्। अन्येषु गृह्यसूत्रोक्तेषु कर्मसु ब्रह्मा नाम अस्ति कश्चनर्त्विक्। स हि प्रायशः प्रायश्चि-त्तेतरहोमेषु नाधिक्रियते। ऋत्विक्कृतस्य यजमानकृतस्य वा कर्मणः कृताकृतावेक्षणं ब्रह्मा करोति। अत्र तु कौशिके गृह्ये यजमानप्रातिनिध्येन ब्रह्मा एव सर्वं कर्म करोति। ब्रह्मण एव कर्मयोगात् चाथर्ववेदस्य ब्रह्मवेदत्वेनास्ति प्रसिद्धिः। यथा—अध्वर्योः कर्मयोगाद् यजुर्वेदस्याध्वर्यु-वेदत्वेन, ऋग्वेदस्य होतृवेदत्वेन, सामवेदस्योदगातृवेदत्वेन च। एतच्च "अध्वर्युः कर्मसु वेद-योगात्"[2] इति कातीयश्रौतसूत्रेणापि ज्ञायते।

अयं च कर्ता ब्रह्मा केवलं निर्देशमात्रेण न क्रियायां प्रवर्तते, अपि तु स्वीयं वरणमवा-प्यैव, "स वृतः" इत्यादिलिङ्गात्।[3]

ब्रह्मलक्षणम्—

शान्तिकर्मकर्तृत्वेन यो वृतो भवति तस्य गुणाः सूत्रकारेणैवोक्ताः। स हि ब्रह्मा क्रियमा-णस्य कर्मणो विज्ञाता स्यात्। तच्च विज्ञानं भृग्वङ्गिरोवेदेन भवति।[4] भृग्वङ्गिरोवेदोऽथर्ववेदः। अथर्ववेदाभिज्ञ एव नित्यनैमित्तिकान्यशुभानि शमयितुं सक्षमः। तथा पशुपुत्रधनादीनां मानवाभिलाषाणां पूरयितृत्वात् प्राप्तपदार्थरक्षणरूपक्षेमकारित्वाच्च पालकः।[5] अत एव निग्रहानुग्रहसामर्थ्यसम्पन्नतया स सर्ववित्। एतदर्थे श्रुतिरपि वर्तते, यथा—

"एष ह वै विद्वान् सर्वविद् ब्रह्मा यद् भृग्वङ्गिरोवित्"[6] इति।

शान्तिसम्भारोपकल्पनादेशः—

वृतश्च स ब्रह्मा शान्तेरुपयुक्तानि द्रव्याणि सङ्गृहीतुं निर्दिशति 'उपकल्पयध्वम्'[7] इति। तत्र सम्भारोपकल्पने सर्वासु शान्तिषु कांस्यमयं शान्त्युदकपात्रम्, कर्मकाले स्वस्य परिधानाय अहते वाससी, हवनार्थं शुद्धमाज्यम्, (अनुक्ते विशेषे एकपशुप्राप्तमेव गोर्महिष्या वा घृतमाद-द्यात्, नोभयं संसृजेत्) शान्ता ओषधीः (शान्त्युदकसाधनार्थं प्रक्षेपणीयाः), नवः कुम्भश्चेति विशेषत उपकल्पनीयानि भवन्ति।[8] अन्यानि द्रव्याणि तु शान्तिप्रयोगानुकूलतया यथार्हं ब्रह्मण आदेशादुपकल्पयितव्यानि।

---

१. तत्पराभवति कुलं वा ग्रामो वा जनपदो वा (९४।१)। २. का० श्रौ० १।
३. द्र० कौ० गृ० १२६।३। ४. एष ह वै विद्वान् यद् भृग्वङ्गिरोवित् (९४।३)।
५. एते ह वा अस्य सर्वस्य शमयितारः पालयितारो यद् भृग्वङ्गिरसः (९४।४)।
६. गो० ब्रा० पूर्वार्द्धम् २।१८।, ७. स आहोपकल्पयध्वमिति (९४।५)
८. तदुपकल्पयन्ते कंसमहते वसने शुद्धमाज्यं शान्ता ओषधीर्नवमुदकुम्भम् (९४।६)।

ब्रह्मणोऽधिकारापादकं कर्म—

कृतोपकल्पनादेशो ब्रह्मा शान्तेः कर्तृत्वाधिकारप्राप्तये निमित्तस्य गुरुलघुभावमुपलक्ष्यानशनात्मकं व्रतश्चरेत्। तच्च व्रतं द्वादशरात्रं षड्रात्रं त्रिरात्रमेकरात्रं वा वरणानन्तरं कुर्यात्।[१] एवं कृतोपवासः कर्मण्यो भवति। तत्र तत्र विशिष्टासु शान्तिष्वाहारनियमः कालनियमश्च विशिष्टः कृतः सोऽस्माभिस्तत्र तत्र शान्तिषु स्पष्टं वक्ष्यत इति ततोऽवगन्तव्यः।

अद्भुतशान्तिषु साधारणेतिकर्तव्यता—

अद्भुतशान्तिषु सामान्याज्यतन्त्रविधिना पूर्वतन्त्रं कर्तव्यम्। परमभ्यातानहोमो न भवतीति केशवः। पूर्वतन्त्रे शान्त्युदकं विधिना साधयेत्। तस्य विधिः कौशिकेनोक्तोऽवगन्तव्यः।[२] शान्तेः प्रधानक्रियायां समाप्तायां चातनगणस्य मातृगणस्य च ये मन्त्रास्तान् पठेत्।[३] सूत्रकारेण भाष्यसारे वा चातनगणमातृगणमन्त्राणां शान्तौ कदा प्रयोगः कर्तव्य इति स्पष्टं नोक्तम्। परम् अनुयोजयेदिति पदे अनुशब्दयोगात् प्रधानक्रियाया अन्ते एषां प्रयोग इति वयं प्रतीमः। चातनमातृगणयोः शान्तिकर्मसु हवने पाठे वा प्रयोग इत्यपि न स्पष्टम्। परं कासुचिच्छान्तिषु[४] मातृगणमन्त्राणां हवनोपदेशादन्यत्र होमो न कार्य इति सिद्धयति। अतश्च होमाभावे जपात्मक एव प्रयोगः सर्वत्र बोद्धुं शक्यते। विधौ हवनोपदेशे तु हवनं सामान्यशास्त्राच्च जप इत्युभयं कर्तव्यम्। सर्वत्र शान्तिषु दक्षिणात्वेन वस्तुत्रयं दद्यात्[५]। तत्र पदार्थद्वयं प्रतिपत्तिरूपं कंसमहतवाससी च, कार्ये तयोरुपयुक्तत्वात्। तृतीयश्च पदार्थो गोरूपो दक्षिणात्वेन कर्त्रे देयः। सा च गौः श्रेष्ठा धेनुः स्यात्। [६]धेनुर्नाम पयस्विनी सवत्सा गौः। गौरियं सामान्यदक्षिणा। कासुचिच्छान्तिषु ब्राह्मणो राजा प्रादेशिको वैश्य इत्युपक्रम्य विशिष्टा दक्षिणा उपदिष्टा वर्तते। अतस्तत्र सामान्यामिमां दक्षिणां बाधित्वा विशेषोपदिष्टा एव दक्षिणा भवन्ति। कासुचिच्च शान्तिषु रुक्म-सर्वस्व-वडवा-गर्दभी-प्रभृतीनि दक्षिणाद्रव्याणि तत्रोपदिष्टानि वस्तूनि दद्यात्।[७]

यत्र तु पत्न्याः सर्वस्वस्य वा दानमुपदिष्टं तत्र तन्निष्क्रयं दद्यादिति स्पष्टमेवोक्तम्। दक्षिणादानान्ते भक्तेन ब्राह्मणभोजनं यथाशक्ति कर्तव्यं संख्यानुक्तेः।[८] बहुवचनोपदेशात् ब्राह्मणत्रयभोजनं त्वावश्यकम्। भक्तशब्दोऽत्र भोज्यद्रव्यपरः, न तु सिद्धौदनपरः, नियमवतां ब्राह्मणानां सर्वत्र सिद्धौदनभोजनेऽप्रवृत्तेः। यत्र तु शान्तिविधौ कश्चन विशेषः, स तत्र सामान्यविधेर्बाधेन समुच्चयेन वा यथार्हं कर्तव्यः।

१. स्नातोऽहतवसनः सुरभिर्व्रतवान् कर्मण्य उपवसत्येकरात्रं त्रिरात्रं षड्रात्रं द्वादशरात्रं वा (९४।९)।
२. द्र० कौ० गृ० ९।३-११।
३. स खल्वेतेषु कर्मसु सर्वत्र शान्त्युदकं कृत्वा सर्वत्र चातनान्यनुयोजयेन्मातृनामानि च (१३६।१)।
४. द्र० कौ० गृ० १०१।३; ९५।४; ९६।४ इत्यादि।
५. सर्वत्र कंसवसनं गौर्दक्षिणा (१३६।११)
६. सर्वत्र वरां धेनुं कर्त्रे दद्यात् (१३६।१०)।
७. यथोद्दिष्टं चादिष्टास्विति (१३६।१३)।
८. ब्राह्मणान् भक्तेनोपेप्सन्ति (१३६।१२)।

अद्भुतवर्षणशान्तिः

सामान्यतया अन्तरिक्षाद् या वृष्टिर्भवति सा जलात्मिका भवति। कदाचिद्यदि जलस्थाने जलेन सह वा घृत-मांस-मधु-स्वर्णादीनामन्येषां वा घोरद्रव्याणां वर्षा भवति साऽद्भुतवृष्टिः। एष दैवप्रकोपः। स्तस्माच्च कुलं ग्रामो जनपदो वा विनाशं प्राप्नोति[1]। अतो वर्षणाद्भुतदैवप्रकोप-शान्त्यर्थं तत्रस्थो राजा भूमिपतिर्वा कर्तुमधिक्रियते प्रयतते[2]। अत्र यद्यपि सूत्रे द्वयोरेव राजा-भूमिपत्योरधिकार उक्तः, परं नाशफले कुलस्यापि सम्बन्धात् कुलपतिरप्यधिक्रियत इति वयं प्रतीमः। कुलविनाशफलकत्वाच्चाद्भुतमिदं कस्मिंश्चिद् गृहादिस्थानेऽपि भवितुमर्हति। तत्रापि च शान्तिः कर्तव्या। वर्षणाद्भुतशान्त्यर्थं त्रयः कालाः प्राधान्येनोक्ताः—अमावास्या, पूर्णिमा, शुभनक्षत्रं वा। परं यथावश्यकं यथासमयमपि कर्तुं शक्यते[3]। तदर्थं च प्रयोगक्रमः—वर्षणाद्भुतशान्त्यर्थमथर्ववेदज्ञविद्वांसं ब्राह्मणम् (ब्रह्माणम्) निमन्त्रयेत्। विद्वच्छब्देनात्र भृग्वङ्गिरोविदेव ब्राह्मण उच्यते, तस्यैव लोकानां पालनेऽद्भुतशान्तौ चार्हत्वात्[4]। स विद्वानागत्य संभार-संभरणार्थमाज्ञां ददाति "उपकल्पयध्वम्" इति। ततश्च कांस्यपात्रम्, अहते वाससी पवित्रं घृतम्, शान्त्योषध्यः, नूतनं चोदककुम्भम् एतान् विशेषसंभारान् संभरेत्[5]। कर्ता चैकरात्रं त्रिरात्रं षड्रात्रं द्वादशरात्रं वोपवासं कुर्यात्। उपवासानन्तरं प्रातः स्नात्वा अहते वाससी परिधाय सुगन्धिद्रव्याणि विलिप्य सुव्रतो भूत्वा यत्र स्थाने अद्भुतवर्षापातो दृश्यते तस्य स्थान-स्योत्तरस्यां दिश्यग्नेः स्थापनं कुर्यात्। भूमिं परिसमुह्य उदकेन पर्युक्ष्य बर्हिषास्तीर्य बर्हिर्जल-पात्रं च संस्थाप्याज्यपरिचरणं कृत्वा पुरस्तादधोमानाज्यभागौ च हुत्वा घृतेन 'घृतस्य धारा' इति सूत्रोक्तेन 'अग्नये स्वाहा' इत्यन्तेन जुहुयात्। ततश्च दिव्यो गन्धर्वो इत्यादिभिर्मातृगणमन्त्रै-रप्याहुतीर्दद्यात्।[6] यजमानो ब्राह्मणश्चेत् स वररूपायां दक्षिणायां वृषभं दद्यात्।[7] क्षत्रियो यजमानो वरत्वेन कर्त्रे ग्रामम्, वैश्यश्च लाङ्गलम् (सीरम्=हलपदवाच्यम्) दद्यात्।[8] यः किल राजात्वेन लोके प्रसिद्धः, किन्तु भूमेः कस्मिंश्चिद् भागे एवाधिपतिः स कौशिकगृह्यसूत्रे प्रादेशिकशब्देनोक्तः। लोके च जमीनदार जागीरदार पवाईदार सामन्त इति शब्दैः विभिन्नेषु

---

१. 'अथ यत्रैतानि वर्षाणि वर्षन्ति घृतं मांसं मधु च यद् हिरण्यं यानि चाप्यन्यानि घोराणि वर्षाणि वर्षन्ति तत्पराभवति कुलं वा ग्रामो वा जनपदो वा' (कौ० गृ० ९४।१)।

२. 'तत्र राजा भूमिपतिर्विद्वांसं ब्रह्माणमिच्छेत्' (कौ० गृ० ९४।२)।

३. त्रीणि पर्वणि कर्मणः पौर्णमास्यमावास्ये पुण्यं नक्षत्रम्। अपि चेदेव यदा कदाचिदार्तय कुर्यात् (कौ० गृ० ९४।७-८)।

४. एष ह वै विद्वान् यद् भृग्वङ्गिरोवित्। एते ह वा अस्य सर्वस्य शमयितारः पालयितारो यद् भृग्वङ्गिरसः (कौ० गृ० ९४।३-४)।

५. स आहोपकल्पयध्वमिति। तदुपकल्पयन्ते कंसमहते वसने शुद्धमाज्यं शान्ता ओषधीर्नव-मुदकुम्भम् (कौ० गृ० ९४।५-६)।

६. दिव्यो गन्धर्व इति मातृनामभिर्जुहुयात् (९४।१५)।

७. वरमनड्वाहं ब्राह्मणः कर्त्रे दद्यात् (९४।१५)। ८. सीरं वैश्योऽश्वं प्रादेशिको ग्रामवरं राजा (९४।१७)।

प्रदेशेषु व्यवह्रियते। लोकतन्त्रे चास्मिन् युगे फार्मपतिः कृषक उच्यते। स च वर्षणादद्भुतशान्तौ वरत्वेनाश्वं दद्यात्। एषैव वर्षणादद्भुत(प्रायश्चित्तम्)शान्तिः।

यक्ष(त्रासकजीव)दर्शनशान्तिः

यस्मिन् स्थानेऽवसरे वा कस्यचन त्रासकारिणो जीवस्य प्रवेशो न सम्भाव्यते तत्र वानर-सारमेय-काक-पुरुषरूपाण्यकस्माद् दृश्यन्ते, दर्शनेन चात्मनि त्रासो भवति, तदेतदस्थानेऽनवसरे प्रवेशासम्भावनायां च दर्शनमनिष्टावहं भवति।[1] कौशिकाचार्येण त्रासदायिनो जीवस्य यक्ष-शब्देन संकेतः कृतः। अयं यक्षशब्दो द्विधा व्युत्पादनीयो भवति--इः कामः तस्येवाक्षिणी अस्येति यक्षः। अथवा इः कामः अक्षिषु यस्य स यक्षः इति। अत्र बहुव्रीहौ "सक्थ्यक्ष्णोः" (पा० ५।४।-११३) इति षच् भवति। विग्रहद्वयमिदं यक्षत्वेन प्रसिद्धे देवविशेषेऽप्यमरटीकादौ साधित-मस्ति। परमत्र कश्चन विशेषोऽनुसन्धेयः। कामशब्दस्तृतीयपुरुषार्थरूपवासनापरपर्यायः। अत्र तु काम इच्छा। सा च नष्टोऽयं भूयाद् हानिं प्राप्नुयाद् वशे मे स्यादित्यरूपा दर्शनकृतोऽनिष्टत्वापा-दिका। अत एवैतादृशदर्शनस्य यक्षत्वं तद्दर्शने चैषा शान्तिर्युक्तिरूपैवेति विशेषः। तत्र प्रयोग-क्रमः—पूर्वतन्त्रं कृत्वा यन्मर्कटः······निवर्तमानाः[2] अग्नये स्वाहा इति मन्त्रेण घृतेनाहुतिं दद्यात्। तदनन्तरं दिव्यो गन्धर्वं इत्यादिभिर्मातृगणोक्तमन्त्रैरपि जुहुयात्।[3] इत्येषा यक्ष-(त्रासकृजीव)दर्शनशान्तिः।

मण्डूकविस्वरवदनशान्ति

वर्षासु मण्डूकाः प्रादुर्भवन्ति स्वीयां वाचं च वदन्ति। मण्डूकानां या स्वाभाविकी वाक् तां परिहाय यद्यन्यादृशी वाक् श्रूयते, तदा श्रोतुरनिष्टं सूचितं भवति।[4] स्वभावातिरिक्ता कीदृशी वागनिष्टसूचिकेति विचारे 'गोमायू नाम नाम मण्डूकौ' इति कौशिकोक्तं पदद्वयमवधेयं भवति। "नाम मण्डूकौ" इत्यत्र नामपदं कुत्सार्थीयं विस्मयार्थीयं वा वर्तते।

नाम कामेऽभ्युपगमे विस्मये स्मरणेऽपि च।
संभाव्य-कुत्सा-प्राकाश्य-विकल्पेष्वपि दृश्यते॥

इति मेदिन्यामुभयस्याप्यर्थस्य दर्शनात्। गोमायू इति द्विवचनं सहचरितयोर्द्वयोरुपादाना-र्थम्। यद्यप्यत्र सहचरितयोर्गोमायु-अजमायुमण्डूकयोरेक एव गोमायुर्निदिश्यते, परं द्विवचनो-पदेशादजमायुरपि संगृह्यते। शान्तौ हवनीयमन्त्रवर्णेऽपि गोमायू इति द्विवचनमजमायोर्निर्देशकम्। गोमायु-अजमायुरिमौ द्वौ शब्दौ साहचर्येण ऋग्वेदेऽपि (७।१०३।६) मन्त्रे दृश्येते। तत्र "गोमायुः गोर्मायुरिव मायुः शब्दो यस्य तादृशो भवति, एकोऽन्यो मण्डूकोऽजमायुः, अजस्य मायुरिव मायुर्यस्य तादृशो भवति" इति सायणेन व्याख्यातम्। गोरिव शब्दः अज इव शब्दश्च मण्डूकानां स्वाभाविको न भवति। एतादृशः शब्दोऽनिष्टस्यैव सङ्केतकारी यदा कदाचिदेव श्रोतुं शक्यत इति तादृक्शब्दश्रवणेऽनिष्टविनिवर्तनार्थं शान्तिरेषा कौशिकोक्ता। गोमायुरेकः (ऋ० ७। १०३।६) इत्यस्य मन्त्रस्य चतुर्थे पादे 'पुरुत्रा वाचं पिपिशुर्वदन्तः' इत्यंशस्य सायणाचार्येण--

---

१. द्र० कौ० गृ० ९५।१। २. द्र० कौ० गृ० ९५।३। ३. द्र० कौ० गृ० ९५।६।
४. अथ ह गोमायू नाम मण्डूकौ यत्र वदतस्तद्यन्मन्यन्ते मां प्रति वदतो मां प्रति वदत इति तदेवमाशङ्क्यमेव भवति (९६।१)।

'पुरुत्रा बहुषु देशेषु वाचं वदन्तः शब्दं कुर्वन्तः पिपिशुः अवयवी भवन्ति प्रादुर्भवन्ति' व्याख्यानं कृतमस्ति। परं शान्तिविधानदर्शनादर्थान्तरमेव कर्तुं युज्यते। वाचम्=स्वाभाविकीमन्यादृशीं च वदन्तो मण्डूकाः पुरुत्राः=बहुषु अवसरेषु मङ्गलामङ्गलं पिपिशुः=स्पष्टयन्ति बोधयन्तीति भावः। अस्मिन्नर्थे शान्तिविधानमनुगृह्यते। स्वाभाविकोक्तौ तु मङ्गलमेव। तथा च—

उपप्रवद मण्डूकि वर्षमा वद तादुरि।
मध्ये ह्रदस्य प्लवस्व विगृह्य चतुरः पदः॥ (अ० ४।१५।१४)

इति मङ्गलात्मिकाया आशंसाया दर्शनात्। गोरजस्य वा शब्दानुकृत्या मण्डूकशब्देऽमङ्गलमिति कौशिकेन स्पष्टमेवोक्तम्।

तथा हि सूत्रार्थं एवं कर्तुं शक्यते—गोमायुरजमायुः इमौ द्वौ विस्मयावहशब्दकारिणौ मण्डूकावमङ्गलसूचकत्वात् कुत्सितौ वा मण्डूकौ यत्र देशे शब्दं कुर्वंतः तदमङ्गलकरमिति शेषः। कुत इति चेत्, यद् यस्मात् कारणाद् आचार्या मन्यन्ते यदिमौ विकृतौ स्वरौ मां प्रति कमप्यमङ्गलं वदतः। अमङ्गलदाढर्याायात्र द्विरुक्तिः। तत् तस्मात् कारणादेवममङ्गलं सम्भावनीयं भवति।

गोमायुनामकमण्डूकवदनादिषु मातृगणस्य विनियोगः सायणेनोक्तः। तत्राचार्यो गोमायुनामकं कञ्चन मण्डूकं मन्यते। तस्यादृष्टत्वाद् ऋग्वेदे च गोमायुरित्यस्यान्यथाव्याख्यानाद् भावोऽयमुपेक्षणीयः। मण्डूकविस्वरवदने च शान्त्यर्थं जुहुयात्।

अथ प्रयोगक्रमः—पूर्वतन्त्रं कृत्वा यद् गोमायू······कराथः, इन्द्राग्निभ्यां स्वाहेत्याहुतिं दद्यात्।[1] तदनन्तरं च मातृगणमन्त्रैर्जुहुयात्[2]। तत उत्तरतन्त्रम्। इत्येषा मण्डूकविस्वरवदनशान्तिः।

कुलकलहशान्तिः

एकस्य कूटस्थपुरुषस्य पुंसन्तानप्रधाना जनाः संघीभूताः कुलमिति व्यपदिश्यन्ते। सन्तानभूताश्च जनाः पृथक् पाकेन निवसन्तोऽपि एककुलत्वेन प्रसिद्ध्यन्ति। सर्वेष्वपि जनेषु सौमनस्यमात्मीयत्वाद् युक्तमेव। तत्र कस्माच्चिद्दैवापराधाद् यदि कुलप्रसूताः परस्परं कलहं कुर्वन्ति, कलहश्च प्रत्यहं भवति, विवेकिनां महतां जनानामुपदेशेनापि न शाम्यति, तदैतत् कुलं निर्ऋतिगृहीतमिति आचार्याः कथयन्ति।[3] निर्ऋतिर्नाम मृत्युः। कलहफलं च मृत्युर्भविष्यतीत्यनिष्टं सम्भाव्यते। तन्निवृत्त्यर्थं काचन शान्तिः कौशिकेन विहिता। तस्याश्चायं प्रयोगक्रमः—पूर्वतन्त्रं कृत्वा आरादरातिम् (अ० ८।२।१२) इति ऋग्द्वयेन हुत्वा अयाश्चाग्ने··· भेषजं स्वाहेति जुहुयात्।[4] तत आरदग्निः कराथः इन्द्राग्निभ्यां स्वाहेति हुत्वा अपेत एतु इति कौशिकगृह्यसूत्रोक्तेन सूक्ते होमं कुर्यात्।[5] तत उत्तरतन्त्रम्। अस्यां शान्तौ वररूपा दक्षिणा च अनड्वान् इति पूर्ववत् समानम्।[6]

भूकम्पशान्तिः

यद्यपि साम्प्रतिका वैज्ञानिका भूमेर्गतिमत्त्वं स्वीकुर्वन्ति, परं प्राचीनाचार्या भूमेर्निश्चलत्वं मन्यन्ते। अत एव भूमेरचलाशब्देन व्यवहारः। भूमेरचलावस्थायामेव मानवोपकारिद्रव्याणां

१. कौ० गृ० ९६।३।　२. कौ० गृ० ९६।४।　३. अथ यत्रैतत् कुलं कलहि भवति तन्निर्ऋतिगृहीमित्याचक्षते (९७।१)।　४. कौ० गृ० ९७।३,४।
५. द्र० कौ० गृ० ९७।५–८।　६. "वरमनड्वाहमिति समानम्" (९७।९)।

प्राप्तिः। तथा हि पृथ्वीसूक्ते भूम्या अनपस्फुरन्त्या धेनोरुपमा दत्ता। यथा—'सहस्रं धारा द्रविणस्य मे दुहां ध्रुवेव धेनुरनपस्फुरन्ती'[1] इति।

यदि हि भूमिश्चलिता भवति, तदा जना भूकम्प इति व्यवहरन्ति। शास्त्रतो लोकतश्चायं भूकम्पोऽनिष्टायैव सम्पद्यते।[2] एतत्तु वैलक्षण्यं यन्महतीयं भूमिर्नैकदा पूर्णाऽपि कम्पते, किन्त्वस्याः कश्चनैकदेशः कम्पयन् वित्रासयति। अतो यस्मिन् देशे भूमिचलापरपर्यायो भूकम्पः सम्भवति, तत्रानिष्टविनिवृत्तये कौशिकेन शान्तिर्विहिता। तत्र प्रयोगक्रमः—'पूर्वतन्त्रं कृत्वा अच्युता द्यौ.... अनु विप्यतु पृथिव्यै स्वाहेति हुत्वा'[3] आ त्वा हार्षम् (अ० ६।८७) इति तृचेन सूक्तेन 'ध्रुवा द्यौः' (अ० ६।८८) इति तृचेन सूक्तेन 'सत्यं बृहद्' (अ० १२।१) इत्येतेन त्रिषष्टिमन्त्रात्मकेन पृथ्वी-सूक्तापरपर्यायेनानुवाकेन चाज्यं जुहुयात्।[4] शेषमुत्तरतन्त्रं पूर्ववत्। एवं भूकम्पे शान्तिर्भवति।

आदित्यविकृतिशान्तिः

यदा आदित्यं तमो गृह्णाति, तदा करणीया कौशिकेन काचन शान्तिर्विहिता। तमःशब्दो राहुवाच्यन्धकारवाची च आदित्यसाहचर्यें प्रसिद्धयति। ज्योतिषशास्त्रविचारिते काले आदित्यं राहुर्ग्रसति, तदा च लोकाः सूर्यग्रहणमिति व्यपदिशन्ति। सायणाचार्येण 'विषासहिम्' (अ० १७।१) इति सूक्तस्यारम्भे आदित्यग्रहणरूपाद्भुते तच्छान्त्यर्थमनेनानुवाकेनाज्यं जुहुयादि-त्युक्तमस्ति।

अत्रेदं विचार्यते यदादित्यग्रहणं हि ज्योतिःशास्त्रानुकूलं भवति, तदा धर्मशास्त्र-विदस्तस्य नैमित्तिकं पुण्यकालमुद्घोष्य स्नान-दान-होम-जपादिकमुपदिशन्ति। तस्याद्भुतत्वं न वक्तुं शक्यते, लोकशास्त्रविरुद्धत्वाभावात्। अतोऽद्भुतत्वं तदैव वक्तुं शक्यते, यदा सूर्यग्रहणे लोक-विरुद्धं स्यात्। तत्रास्माभिरेवमूह्यते यज्ज्योतिषशास्त्रस्य गणनया कालासत्त्वेऽपि सूर्यो राहुगृहीत इव ग्रहणरूपो दृश्येत। तद्दर्शनस्य लोकशास्त्रविरुद्धत्वाददद्भुतत्वममङ्गलकारित्वं च युक्तमेव।

एवं चासमये सूर्यस्य राहुतमोग्रासः कौशिकेन आदित्यं तमो गृह्णातीत्यनेन सूचितः।[5] कौशिकगृह्यसूत्रे त्रयोदशकाण्डस्य प्रथमायां कण्डिकायां काण्डान्तर्गतानामद्भुतानां गणना वर्तते। तत्र आदित्यं तमो गृह्णातीत्यनुक्त्वा आदित्योपप्लवे इत्युक्तम्। उपप्लवो नाम वास्तविकस्थित्या विकृत्युन्मुखत्वम्। तेनापीदमेव सिद्धयति यदादित्यमण्डलस्य स्वाभाविकी स्थितिः कयाचिदपि रीत्या विपरिणमते चेदियं शान्तिः कर्तव्या। तस्याश्च शान्तेः प्रयोगक्रमः—पूर्वतन्त्रं कृत्वा दिव्यं चित्रम्..... तमो—जहि आदित्याय स्वाहेति सौत्रेण सूक्तेनाज्यं हुत्वा विषासहिम् (अ० १७।१) इति सूक्तेन होमं कुर्यात्।[6] विषासहिम् इति सूक्ते त्रिंशन्मन्त्राः तैरेकोऽनुवाक एकं च पूर्णं काण्डम्। अतः पूर्णेन सप्तदशकाण्डेन जुहुयादित्यर्थः। ततश्च रोहितैः सूक्तैः (अ० १९।१-४) उपस्थानं कुर्यादिति।[7] आदित्यविकृतिशान्तिरिति शम्।

● ● ●

१. अ० वे० १२।१।४५। २. द्र० कौ० गृ० ९८।१। ३. द्र० कौ० गृ० ९८।२।
४. द्र० कौ० गृ० ९८।३।
५. "अथ यत्रै तदादित्यं तमो गृह्णाति तत्र जुहुयात्" (९९।१)।
६. कौ० गृ० ९९।२-३। ७. रोहितैरुपतिष्ठते (९९।४)।

धर्मशास्त्रेषु तीर्थभावनाविकासः

डॉ० सरयूप्रसादगुप्तः, वाराणसेयः

धर्मशास्त्रीयग्रन्थानां संख्या असीमा वर्तते, अत उदाहरणस्वरूपेण कालक्रमानुसारेण संस्कृतवाङ्मये वर्णितानां तीर्थतालिकानां तुलना धर्मशास्त्रेषु यत्र तत्र कथितैस्तीर्थैः सह कर्त्तुं शक्या। इत्थं संस्कृतवाङ्मये प्राप्तानां देवानां सम्बन्धिनी अस्माकं जिज्ञासाऽपि शान्ता भवति, तीर्थानाञ्च विकासक्रमस्य पुष्टिरप्यधिकांशतो भवति।

तीर्थावश्यकता

ऋग्वेदीया ऋषयः पापानामपराधाणाञ्च ज्ञातारोऽभवन्। ते पापादिमुक्त्यर्थं वरुणदेव-मादित्यांश्च प्रार्थयन्। मन्त्रेषु आगस्-एनस्-दुरित-द्रग्ध-अंहस्प्रभृतयः शब्दाः प्राप्यन्ते। वैदिक-समाजस्य प्रचलितकृत्यानामाचारव्यवहाराणाञ्च परिष्कृता संहिता हि कल्पसूत्रेषु प्राप्यते। तथा च जपतपोहोमव्रतस्नानध्यानदानशुद्धिप्रायश्चित्तश्राद्धतर्पणमुण्डनविवाहादिपवित्रस्थानाव-श्यकताऽभूत्। सर्वप्रथमं प्राचीनधर्मशास्त्रेषु यज्ञशालागोशालाकूपसरोवृक्षच्छायाश्रमस्थानानि च पवित्राणि वर्णितानि सन्ति। तदनन्तरवर्तिषु धर्मशास्त्रेषु क्रमशो नदीतीरं गयावाराणसी-प्रयागकुरुक्षेत्रादीनि तीर्थस्थानानि वर्द्धितानि लभ्यन्ते।

देवता

धर्मशास्त्रेषु देवानां सूची प्राप्यते। प्राचीनकल्पसूत्रेषु इन्द्राग्निवायुवरुणप्रजापतिमित्र-रुद्रगणपतियमत्वष्टृनासत्यसमुद्रपर्वतचन्द्रबृहस्पत्यादीनां वैदिकदेवानां नामानि प्राप्यन्ते। किञ्च तत्पश्चाद् निर्मिते बोधायनधर्मसूत्रे पूर्वसूत्रकारविनायकरुद्रसुतचतुर्मुखनागवृक्षवेदशास्त्र-वैनतेयर्षिकालसंवत्सरज्योतिर्यमराजचित्रगुप्तनक्षत्रराहुकेतुमङ्गलबुधप्रभृतिग्रहाणाञ्चोपर्युक्तवैदिक-देवानाञ्चानेकपर्यायनामभिस्तेषां पार्षदानां नामभिरपि तर्पणानि प्राप्यन्ते। देवीनां गायत्री-सावित्री-सरस्वती-पुष्टि-तुष्टिरुद्रपत्नीनामभिः तर्पणं भवति स्म। क्रमशः स्मृतिष्वपि नवैः नामभिः तर्पणं प्राप्यते। यथा शंखस्मृत्यां जम्बूद्वीपशाकद्वीपादीनां लवणोदकं क्षीरोदकमित्यादीनां सप्तद्वीपानां सप्तसमुद्राणाञ्चानेकनदीपर्वतसरोवरनामभिश्च प्रयागनैमिषगयानामभिरश्वत्थेत्यादि-वनस्पतिनामभिर्यवेत्यादिवनस्पतिनामभिः यमनियमाकाशव्यक्तपुरुषभूपुरुषभुवःपुरुषमहःपुरुषादि-नामभिश्च तर्पणं प्राप्यते। अन्यस्मृतिष्वपि वेदशास्त्रादिग्रन्थेभ्यो ग्रन्थकारेभ्यः सूत्रकारेभ्य आचार्येभ्य आचार्यपत्नीभ्यो ज्ञातिसम्बधिभ्यश्च तर्पणं लभ्यते। कात्यायनस्मृत्यां गौरीपद्माशचीमेधासावित्रीजयाविजयाधृतिपुष्टितुष्टिप्रभृतीनां षोडशमातृकाणाञ्च चित्रपूजा मूर्तिपूजा च प्राप्यते। सर्वदेवदेवीनां पार्षदपार्षदीभ्यः सर्वे ऋषिऋषिपत्नीभ्यः श्रीविद्याभ्याञ्च तर्पणानि क्रियन्ते स्म। मध्यकालीनस्मृतिषु धर्मशास्त्रात्मकनिबन्धेषु च जपतपोध्यानशुद्धिप्रायश्चित्तैः सह तीर्थयात्रामपि पातकमुक्तिसाधनं बोधयित्वा विस्तृतवर्णनानि कृतानि। तत्पश्चाद् धर्म-शास्त्रात्मकनिबन्धेषु आधुनिकदेवता रामकृष्णहनुमद्दुर्गाकालीत्यादयो देव्यः, भैरवलिङ्गयोनि-तान्त्रिकदेव्योऽपि क्रमशो वर्धन्ते।

कल्पसूत्रेषु तीर्थानि

गौतमधर्मसूत्रे दानस्थलविचारप्रकरणे इदं सूत्रमस्ति—'द्रव्यदेशब्राह्मणसंनिधाने वा कालनियमः'[१] इति ।

सम्भवतोऽस्मिन् सूत्रे 'देश'शब्दो दानस्थलेभ्यो हि प्रयुक्तोऽस्ति । प्राचीनधर्मसूत्रकाराः श्राद्धतर्पणप्रायश्चित्तशुद्धिदानेषु परिचिता आसन् । किन्तु तेषामुपयुक्तस्थानानां परिचयो नासीत् । गौतमधर्मसूत्रं जपतपोहोमव्रतदानेभ्यश्च पापमुक्तिं मन्यते, किञ्च न तीर्थात् । तत्पश्चाद् निमित्तेषु धर्मसूत्रेषु गयादिषु श्राद्धादीनां निर्देशो लभ्यते । श्रौतसूत्रे (आश्वलायने लाटचायने च) यज्ञानामनुष्ठानाय ब्राह्मणग्रन्थवत् सरस्वतीतटमेव कथितम् । अवभृथस्नानस्यापि नदीष्वेव हि विधानं कृतमस्ति । महाभारतेऽपि प्राचीनतमा तीर्थसूची सरस्वतीतटस्यैव प्राप्यते । तत्र वैदिक-तीर्थानि, नागवृक्षादीनि अवैदिकतीर्थान्यपि लभ्यन्ते । बोधायनधर्मसूत्रे प्रायश्चित्तस्य पञ्च साधनानि—जपतपोहोमव्रतदानानि, तेभ्य उपयुक्तकालस्थानानि च निर्दिष्टानि, परन्तु षष्ठं साधनं तीर्थस्थानं क्वचिद्धि प्राप्यते । अस्मिन् धर्मसूत्रे 'आपः पुनन्तु पृथिवीम्' इत्यादिस्नान-मन्त्रो वर्तते; किन्तु अनेनैन धर्मसूत्रेण प्रायश्चित्ताय कस्मिश्चिद् महानदीतटे शतं प्राणायामा विहिताः सन्ति ।

उत्तरकालीनधर्मसूत्रेषु तीर्थानां विस्तृतं वर्णनमस्ति । तथा हि वैष्णवधर्मसूत्रेषु पौराणिकधर्मो वर्धमानो हि दृश्यते । अघमर्षणमन्त्रा वासुदेवपूजा पिण्डदानं श्राद्धानां स्थानानि तीर्थयात्राकालो गोदानं मृगचर्मदानं कार्तिकस्नानं वासुदेवप्रशंसा मासिकश्राद्धं सपिण्डीकरणञ्च वर्द्धमानानि दृश्यन्ते । वैदिकदेवैः सह पृथिवीदेवी लक्ष्मीदेवी च स्तः । अतो ज्ञायते यद् ईशवीपूर्वप्रथमशताब्द्यां पौराणिकधर्मः स्थापितो बभूव ।

स्मृतिष्वयं धर्मः क्रमशो विकसितोऽभवत् । इत्थमुत्तरकालीनधर्मसूत्राणि धार्मिककृत्यानां सम्पादनाय तीर्थस्थानेषु गमनं ह्युद्घोषयन् ।

स्मृतिषु तीर्थानि

कालान्तरे स्मृतिषु तीर्थभावनाया विस्तारो लभ्यते ।

मनुस्मृतिर्देवनिर्मितं ब्रह्मावर्तं सरस्वतीं दृषद्वतीञ्च नद्यौ परिचिनोति, किन्तु कुत्रचिदपि प्रायश्चित्तेत्यादिषु तीर्थयात्राविधानं न करोति[२] । तथैवानेकप्राचीनस्मृतिषु चान्द्रायणादिव्रतानि उपवासानि तपांसि च साधनानि कथितानि सन्ति; किन्तु तीर्थयात्राया विधानं नास्ति ।

स्मृतिषु विभिन्नमतानि प्राप्यन्ते । यथा प्रजापतिर्मरीचिश्च श्रावणभाद्रपदयोर्नदीस्नानं वर्जयतः । देवलो मुण्डनम् (क्षौरम्) उपवासञ्च कुरुक्षेत्रविशालविरजागयासु वर्जयति । मनुयाज्ञवल्क्यप्रभृतिभिः कृताः प्राचीनाः स्मृतयः प्राचीनधर्मसूत्रानुसारेण हि लिखिताः सन्ति । अतस्तासु श्राद्धप्रायश्चित्तशुद्ध्यर्थं तीर्थयात्राविधानं न्यूनं प्राप्यते । मध्यकालीनस्मृतिषु एषु कृत्येषु तीर्थस्थानानि प्रयुक्तानि । गौतमस्मृत्यां सर्वे शिलोच्चयाः सर्वाः स्रवन्त्यः पुण्या ह्रदाश्च तीर्थत्वेन वर्णिताः । बृहस्पतिस्मृतौ गयाश्राद्धम्, सरस्वत्यरुणासंगमे त्रिरात्रनिवासश्च प्रशंस्येते ।

---

१. गौ० धर्मसूत्रम्–१५।५ ।

२. मनु० ११।१७ ।

पराशरवशिष्ठौ गयाश्राद्धेन परिचितौ स्तः। देवलेन नदीनां सूचीमुपस्थापयता वनवर्वतप्लक्षप्रस्रवणगङ्गाद्वारादितीर्थानि गृहीतानि। परवर्त्तितीर्थानि वाराणसीमहाकालादीन्यपि वर्ण्यन्ते। तत्पश्चात् साम्प्रदायिकस्मृतीनां संख्या वर्धते। एतासु स्नानदानजपश्राद्धप्रायश्चित्तेम्य उपर्युक्तस्थानानि नदीतटपर्वताश्रमाश्च तीर्थस्थलानि कथितानि।

कल्मषाणां फलानि निवारयितुं कृतैः साधनैरात्मस्वीकृति-अनुतापप्राणायाम-तपोहोमदानोपवासैः सह तीर्थयात्राया अपि महत्त्वं वर्त्तते। तथाहि विष्णुस्मृत्यनुसारेण महापातकिनः सम्पूर्णभारतस्य तीर्थयात्राभिरश्वमेधयज्ञेन वा पातकेभ्यो मुक्ता भवितुं शक्नुवन्ति[1]। पञ्चाशीतितमेऽध्याये श्राद्धस्थलानां सूची प्राप्यते। देवलस्मृत्यनुसारेण ब्रह्महत्यापि महायज्ञैः तीर्थयात्राभिर्वा विनष्टा भवति। तदनुसारं सर्वा नद्यो याः समुद्रे पतन्ति, सर्वे महान्तः पर्वताः, सर्वाणि आयतनानि सर्वाणि वनानि च पवित्राणि सन्ति। ईदृशं मध्यकालीनस्मृतयस्तीर्थयात्राणां फलं यज्ञस्यैवामन्यन्त। शंखस्मृतिस्तीर्थैः पापानां शमनं मन्यते। अस्यां स्नानकाले तीर्थाह्वानम्, तीर्थनाम्ना जपोऽपि प्राप्येते। अस्यां स्मृतौ पुष्करप्रयागनैमिषगयाशीर्षादिनामभिस्तर्पणानि कृतानि सन्ति। पूर्वाङ्गिरस्स्मृत्यामपि श्राद्धाय नदीनां सूच्यां गङ्गा सर्वश्रेष्ठा कथिता।

बृहत्पराशरस्मृत्यां गायत्रीजपस्थानमपि तीर्थस्थलं कथितमस्ति। पैठीनसीस्मृत्यां तीर्थस्थलेषु विवाहविधानमपि स्मृतम्। प्रवर्तमाने विवाहे यज्ञे सूतकाभावस्य विधानमस्ति।

इत्थं मध्यकालीनस्मृतयस्तीर्थानि पातकमुक्तिसाधनान्यमन्यन्त। तीर्थयात्राफलप्राप्तिमपि महायज्ञफलप्राप्तिमिवाघोषयन्।

निबन्धेषु तीर्थानि

कालान्तरेण धर्मशास्त्रात्मकनिबन्धेषु तीर्थविषये विस्तरेण विमर्शः कृतः। एषु तीर्थस्वरूपाणि तीर्थभेदा यात्राप्रस्थानं तीर्थकर्मकाण्डञ्च विस्तरेण वर्णितमस्ति।

निबन्धकालस्य प्रथमचरणः स्वर्णयुगमासीत्, यतोऽस्मिन् काले श्रेष्ठनिबन्धकारा बभूवुः। निबन्धेषु महाभारतपुराणेभ्य उद्धृतैर्वचनैस्तीर्थसिद्धान्तानां पुष्टिः प्रधानतया प्राप्यते। इदं ज्ञायते यद् द्वादशशताब्दीपर्यन्तं यज्ञानां सम्पादनं समभवत्। मुस्लिमशासकानां प्रभावो यथा यथा अवर्धयत्, तथा तथा यज्ञानां सम्पादने काठिन्यं वर्धते स्म। फलतस्तीर्थविषये स्वतन्त्रनिबन्धानामारम्भोऽपि अस्मिन्नेव कालेऽभवत्।

प्रारम्भिकनिबन्धेषु एकैकधर्मसूत्रग्रन्थस्य स्मृतेर्वा समालोचनाः कृता दृश्यन्ते। किञ्च कालान्तरेण अधिकतरा निबन्धा विभिन्नविषयेषु लिखिताः सन्ति। भारतीयतीर्थेषु केषुचित् पृथक् पृथग् निबन्धा लिखिताः सन्ति। दक्षिणभारतस्य निबन्धकारैर्दक्षिणभारतस्यैव तीर्थानि गृहीतानि। निबन्धेषु स्नानादिदिनाङ्काः कालावराश्च कथिताः सन्ति।

लक्ष्मीधरकृतकृत्यकल्पतरुग्रन्थस्य तीर्थकल्पेऽर्द्धभागे वाराणसीप्रयागयोर्वर्णनमस्ति। द्वित्रेषु पृष्ठेष्वेव पुष्करपृथूदककोकामुखबदरिकाश्रमकेदारादितीर्थानां वर्णनमस्ति। प्रयागसम्बन्धिनः

---

१. वि० स्मृ० ३५।६।

केवलं मत्स्यपुराणस्यैव १५१ श्लोकाः, महाभारतवनपर्वभागस्य च ७९, ८५, ८७, ९७ तमेभ्योऽध्यायेभ्य उद्धृतानि पद्यानि सन्ति; किन्तु लेखकेन न किञ्चिदपि स्वयं व्याख्यास्वरूपेण कथितम्। प्रयागवर्णने क्षौरविषयोऽपि परित्यक्तः।

नृसिंहप्रसादकृते तीर्थसारेऽधिकतराणि तीर्थानि दक्षिणभारतस्यैव सन्ति। यतो लेखको दक्षिणापथनिवासी, निजामस्य कार्याधिकारी चासीत्। तेन सेतुबन्धपुण्डरीक (पण्ढरपुर)-गोदावरीकृष्णावेण्यादय एव गृहीताः।

नारायणभट्टकृते त्रिस्थलीसेतुग्रन्थे वाराणसीप्रयागगयानां वर्णनं विस्तरेणास्ति। लेखक-महोदयो वाराणसेय आसीत्। स पूर्णरूपेण वाराणस्या सह परिचित आसीत्। कस्यचित् तीर्थस्य विस्तृतवर्णनस्यान्यकारणमस्ति इच्छापूर्त्तिरिति। किञ्च महाभारतपुराणानां वार्तानां पुनरावृत्तिरेव तत्राभवत्।

हेमाद्रिकृते वीरमित्रोदये तीर्थप्रकाशाध्याये तीर्थस्वरूपाणि, तीर्थविभागाः, तीर्थकीर्त्तनम्, तिथिवारैरवान्तरतीर्थानाम्, काशीयात्रा गङ्गाकाशीगयानां वर्णनानि च लक्ष्मीधर इव कृतानि सन्ति। वाराणस्या अवान्तरतीर्थानि महापुराणेभ्यो भिन्नानि अर्वाचीनानि च सन्ति। लेखक-महोदयेन भौगोलिकनदीपर्वतानां सूची तीर्थसूची इव वर्णितास्ति। वाराणस्यास्तीर्थसूची कस्माच्चिद् ब्रह्मवैवर्त्तपुराणादुद्धृता भवति। सा सूची स्कन्दपुराणादनन्तरं निर्मिता हि ज्ञायते, यतो ह्यस्यां रानीभवानीकृतं दुर्गाकुण्डं व्यासेशदर्शनञ्च त्रिलोचनसमीपे पिप्पिलातीर्थं मन्दाकिनी-गङ्गायां स्नानम्, मध्यमेश्वरस्य दर्शनम्, दशाश्वमेधसमीपे योगिनीपीठश्च वर्णितानि सन्ति। तानि प्रचलितानि तीर्थानि महापुराणेषु न वर्णितानि दृश्यन्ते।

लक्ष्मीधरेण प्रयागे दानं तपश्च त्यक्तः। मित्रमिश्रेण तीर्थप्रकाशे ते वर्णिते हेमाद्रिवाचस्पतिमित्रमिश्रनीलकण्ठैर्लक्ष्मीधरस्यापेक्षया जनताया आवश्यकतायामधिकतरं ध्यानं दत्तम्।

तीर्थप्रकाशे ब्रह्मपुराणादुद्धरणानि दत्त्वा काशीखण्डपश्चाद्भाविनि तीर्थान्यपि वर्णितानि—

ब्रह्मनाले पतेत् येषामपि कीकसमात्रकम्।
ब्रह्माण्डमण्डपान्तस्ते न विशन्ति कदाचन॥ इति।

ब्रह्मनाले अस्थिविसर्जनाद्धेतोः आधुनिकचौकस्थाने वाराणस्यां प्राचीनश्मशानस्य स्थितिर्ज्ञायते।

अस्मात् पुराणानुसाराद्धि तीर्थप्रकाशे आधुनिकढुण्ढिराजगणेशदेवालयाद्धि काश्यां परिक्रमायात्राया आरम्भो वर्णितः। पञ्चक्रोशयात्राऽपि ढुण्ढिराजादेव आरब्धा भवति। एतासु यात्रास्वधिकतरेण मन्दिराणां क्रमस्य निर्वाहोऽस्ति। वाचस्पतिमिश्रकृततीर्थचिन्तामणिग्रन्थे तीर्थानां वर्णनं तेषां कर्मकाण्डानि चाल्पसंख्यायां हि प्रदत्तानि।

इत्थं कतिपयेषु निबन्धेषु तीर्थवर्णनं प्रत्येकतीर्थस्य कर्मकाण्डमपि पृथक् पृथग् वर्तते। प्रयागस्नानमाहात्म्योद्धरणमृग्वेदादुद्धृतमस्ति। गयायां गोपतितीर्थे कृष्णस्योल्लेखो वर्तते।

गङ्गासागरे कपिलदर्शनस्य वर्णनमस्ति। गङ्गाया मूर्त्तिपूजा रथयात्रा च दुर्गारथयात्रा इव वर्णिताऽस्ति। 'नदीतटं कियद्दूरं पर्यन्तं कथ्यते' इति व्याख्यातम्।

नागोजिभट्टस्य तीर्थेन्दुशेखरे नारीशूद्राभ्यां तीर्थयात्रा निषिद्धा। इयं मनुस्मृत्या सिद्धा। सम्भवतो जनसेवाकार्ये वाधां दृष्ट्वा एवमादिष्टम्। अन्यथा तीर्थयात्राविषये एष सिद्धान्तो निरर्थकः प्रतीयते। काशीगयाप्रयागतीर्था हि अस्मिन् ग्रन्थे गृहीताः।

एवं निबन्धकारा भारतीयसंस्कृतिविषयस्यैकस्याङ्गे तीर्थस्थलविषये पृथग् निबन्धान् रचयित्वा महत्त्वं प्रदत्तवन्तः। एवं सम्पूर्णभारतीयानि प्रधानतीर्थानि केषुचित् केषुचिद् निबन्धेषु अवश्यमेव प्राप्यन्ते।

उत्तरकालीननिबन्धानामनुशीलनात् स्थानीयावान्तरतीर्थान्यपि ज्ञायन्ते; येषां वर्णनं पुराणेषु न मिलति। श्रौतसूत्र-धर्मसूत्र-स्मृतिनिबन्धाश्च कालक्रमेण तीर्थानां कालक्रमोपरि सुप्रकाशं प्रक्षिपन्ति। तथैव वैदिकतीर्थानां महाभारतीयप्राचीनतीर्थतालिकानां महाभारतीयोत्तर-कालीनपुलस्त्यस्य तीर्थतालिकायाश्च पुष्टिर्भवति[1]।

इत्थं श्रौतसूत्रेषु प्राचीनधर्मसूत्रेषु च वैदिकतीर्थानि नदीप्रभृतीनि, उत्तरकालीन-धर्मसूत्रेषु प्राचीनस्मृतिषु च महाभारतीयतीर्थतालिकानां क्रमः, उत्तरकालीनस्मृतिषु प्राचीन-निबन्धेषु च पौराणिकतीर्थतालिकानां क्रमः प्राप्यते। उत्तरकालीननिबन्धेषु आधुनिकप्रच-लितावान्तरतीर्थान्यपि दृश्यन्ते। अपि च महाभारतीयेषु पौराणिकेषु तीर्थेषु च वर्णितानां देवानां तत्तत्कालीनाचारव्यवहाराणामपि पुष्टिर्भवति। उत्तरवैदिककाले जनैः स्वीकृतकाल-संवत्सरग्रहादीनां पूजाऽपि ज्ञायत इति शम्।

० ० ०

१. महाभारत तथा पुराणों के तीर्थों का आलोचनात्मक अध्ययन—प्रथम अध्याय, चौखम्भा विश्वभारती, चौक, वाराणसी।

तिब्बतदेशे बौद्धदर्शनम्

डॉ० भृगुनाथपाण्डेयः

एम्० ए०, एम्० एड्०, साहित्यरत्नम्, पी-एच्० डी०

तिब्बतदेशो भोटदेश इति कथ्यते। तिब्बतदेशो भारतवर्षस्य पूर्वोत्तरस्यां दिशि देवतात्मरूपेणावस्थितः। खम्पानामकजातिविशेषस्तत्र निवसति। अन्ये च बहवो जातिविशेषाः सन्ति तत्र।

जीवने धर्मस्यावश्यकता वर्तते। केवलं भौतिकसुखं सन्तोषायापर्याप्तम्। आध्यात्मिकसुखायानन्दाय च धर्मस्यानुसरणं क्रियते। अस्य तुलनाऽन्येषां केषामपि सुखानां भावनया वा न करणीया। आध्यात्मिकसुखं महत्तमं प्रकृतौ सन्तोषमयमन्तिमञ्च। विभिन्नधर्माणां विभिन्नाः पन्थाः, परञ्च तेष्वेकमेव मार्गमनुसृत्य महत्तमं सुखं प्राप्नुवन्ति सन्तोषं च लभन्ते।

सुख-दुःखे न तु बाह्यतत्त्वैः, प्रत्युतान्तरिकतत्त्वैः सञ्जाते। आन्तरिकतत्त्वं तद् भूतकालस्य कर्मभिः पश्चप्रभावः संस्कारो वा वर्तते। बाह्यतत्त्वैः सह सुखदुःखान्यनुभूयन्ते। धर्मं विना मनोऽनियन्त्रितम्, अत एव धर्मस्यावश्यकता। यदि पश्चजीवने विश्वासः स्वीक्रियते, तदास्मै धर्माचरणस्यावश्यकता भवति।

संसारेऽस्मिन् नैकधर्मेषु बौद्धधर्मोऽन्यतम आद्रियते। तस्य प्रवर्तको भगवान् गौतमबुद्धः, यो लुम्बिनीनगरे प्रादुर्भूतः। तस्य जन्म (५४४ खीस्ताब्दात् पूर्वम्) अभवत्। तस्य पितू राजधानी कपिलवस्तु। स सारनाथे (वाराणस्याम्) प्रथमं सन्देशं शिक्षायाः प्रसारितवान्। तृतीयखीस्ताब्दात् पूर्वमशोकस्य पुत्री कारुमती नेपालदेशे सुसभ्यमानवेन सह विवाहं कृतवती। नैकस्तूपा विहारास्तया निर्मिता नेपालदेशे। भारतवर्षे तु नैकनरेशा बौद्धधर्मावलम्बिनोऽभवन्, संरक्षकाश्च सञ्जाताः।

यथा विभिन्नचिकित्सापद्धतिभी रोगाणामुपचारो भवति, तथैव सुखाय धर्मो भवति। विभिन्नधर्माणां विचारसादृश्यं लभते। अनृतं मा वदेत्, चौरकर्म न करणीयम्, हत्या च वर्ज्या—समस्तधर्मेष्विमानि प्रतिपादितानि। समस्तधर्मेषु विचारस्यैक्यम्। अन्ते बुद्धत्वस्य पूर्णतैकस्मिन् जन्मनि लभ्यते। मनो वाणीतनुभ्यां श्रेष्ठम्। प्रबोधनजिज्ञासायां मनसो दोषा निस्सरन्ति। दोषविहीने मनसि सत्यं बौद्धत्वं प्राप्यते।

समस्तजीवा नैकावतारान् धारयन्ति बुद्धत्वप्राप्त्यर्थम्। अजस्रं प्रयतन्ते निर्वाणार्थम्। गौतमबुद्धस्य जीवनं द्वादशमुख्यघटनाभिर्विशिष्टीकृतम्। स्वर्गावतरणं तस्य तुशितेति कथ्यते। गर्भाधानजन्मविद्याध्ययनविवाहत्यागतपस्याबोधिवृक्षध्यानमारपराजयबौद्धत्वप्राप्तिशिक्षोपदेशप्रयाणानि द्वादशघटनाः सन्ति तस्य।

प्रथमो धर्मोपदेशो वाराणस्यां चतुर्णां सत्यानामुपरि विशेषतः श्रावकेभ्यः सम्बोधितः। द्वितीयो धर्मोपदेशो गृद्धकूटे शून्यत्वम्। अयमात्मप्रकृतेरनस्तित्वविषये महायानानुयायिभ्यः, येषां बुद्धिः श्रेष्ठतमा। तृतीयो धर्मोपदेशो वैशालीनगरे मुख्यतोऽल्पमतिमहायानानुयायिभ्यः।

बौद्धधर्मस्य महायान-हीनयानसम्प्रदायौ क्रमेण महाल्पतरमार्गानुयायिभ्यो वज्रधारावस्थाप्राप्तेः पश्चात्। तिब्बते कांज्यूरशोषंकाधीनेऽनूदिते महति धर्मग्रन्थे बुद्धस्य शिक्षाः सन्ति। ग्रन्थोऽयं सूत्रतन्त्रयोर्विभक्तः। सूत्रविषयः त्रिषु वर्गेषूपविभक्तः। विनये नैतिकशिक्षाः, सुतन्त्रे ध्यानम्, अभिधर्मेऽनुभवातीतज्ञानसम्बन्धिदार्शनिकक्रृतयः। उपप्रभागा इमे त्रिपिटकाः कथ्यन्ते। मौलिकसिद्धान्ताः शीलसमाधिप्रज्ञाः। तान्त्रिकभागस्य चत्वार उपप्रभागाः कदाचित् सूत्रस्य त्रिपिटकस्य वा सुतन्त्रप्रभागे सम्मिलिताः[1]।

पूर्वमेव तिब्बतदेशे वोनधर्म आसीत्। वोनमतानुयायिनो गहनाध्ययने ध्याने च प्रवीणाः। यदा तिब्बतदेशे बौद्धधर्मस्य प्रसारोऽभवत्, तदा वोनमतानुयायिनः स्वधार्मिकदर्शनध्यानसम्बन्धिसाधनानि प्रसारितवन्तः।

सहस्रवर्षेभ्यः पूर्वं तिब्बतदेशस्य नरेशो ल्हा-थो-री-त्येनयेनः स्वदेशे प्रथमतो बौद्धधर्मं प्रसारितवान्। समये समये भारतपण्डिता विद्वांसः तिब्बते गताः, व्याख्याश्च सूत्राणां तन्त्राणाञ्च तैः कृताः। अनुवादकार्याणि च कृतानि। दशमशताब्द्यामेवाधार्मिको राजा लाङ्गदारमारोऽभूत्। तस्मिन् समये धर्मस्य ह्रासोऽभवत्[2]। परञ्च शीघ्रमेव भारतीयाः तिब्बतीयाश्च पण्डिता धार्मिककार्ये संलग्ना अभवन्। धार्मिकग्रन्थानामनुवादे मनांसि कृतानि। पुनश्च बौद्धधर्मः प्रतिष्ठापितः। तिब्बतदेशस्य बौद्धधर्मो भारतीयबौद्धधर्मेण समानः। भगवतो बुद्धस्य यथार्थशिक्षाः तिब्बतदेशे गृहीताः। तिब्बतस्य लामाः किञ्चिदपि परिवर्तनं परिवर्धनञ्च न कृतवन्तः। तैर्भारतीयपण्डितानामुद्देश्यं लक्ष्यञ्चानुसृत्याजस्रमेव सत्यापनानि कृतानि। अत एव लामावादः पृथङ्नास्ति। तिब्बतसूत्राणां तन्त्राणाञ्च स्वतन्त्राध्यनमेवावश्यकम्।

भारतवर्षे नालन्दा-विक्रमशिलाप्रभृतयो विश्वविद्यालयाः पूर्वकाले आसन्। तेषां पाण्डितानां विचारे किञ्चिद् भिन्नत्वम्, परञ्च मौलिकसिद्धान्तास्तदेवासन्।

तिब्बतीयसम्प्रदायेषु प्रमुखा न्यींगमाकाज्युसक्यगिलुकादयः। एषु प्रत्येकस्तन्त्रयानसहितेन हीनयानमहायानयोः समग्रां शिक्षां मन्यते स्म।

संस्कृतस्य धर्मस्तिब्बतीयभाषायां छ्वे इति प्रयुक्तः। अस्य शब्दस्यार्थः 'धारणम्'। संसारस्य समस्तानि वस्तूनि धर्मस्य रूपे ज्ञातानि। धर्मस्य द्वितीयार्थं आसन्नविनाशादवरोधः।

भगवतो बुद्धस्य चत्वारि श्रेष्ठसत्यानि। प्रथमावस्थायां पीडां विद्धि तदनन्तरं कष्टकारणं त्यज। तृतीयावस्थायां समाप्तौ तत्परो भव। अन्तिमे समाप्तिसाधनानां साधनां कुरु।

तृतीयशताब्द्यां नागार्जुनेन विभिन्नबौद्धविदुषां समस्तसिद्धान्तेषु माध्यमिकसिद्धान्तानुसारेणैषां सत्यानां व्याख्याः कृताः।

कष्टस्यार्थः कर्म क्रियाप्रतिक्रिये च विभ्रमादुद्भूतानि संसारस्य जन्म पुनर्जन्मास्तित्वस्य सम्पूर्णचक्राणि। कारणस्यार्थः कर्मविभ्रमौ। समाप्तेरर्थः प्रथमद्वितीययोः सत्ययोः पूर्णो लोपः।

---

१. My Land & My People—Rev. Dalai Lama भाषानुवाद, पृ० १८६-१८७।
२. 2500 Years of Budhism—Gen. Editor Prof. P. V. Bapak पृ० ६८।

संसारोऽयमिन्द्रियपरकलोकः, रूपलोकः, रूपहीनलोक एषु लोकेषु विभक्तः। संसारे जीवा इन्द्रियपरकसुखान्युपभुञ्जन्ति। रूपलोको द्वयोर्विभाजितः। अधस्ताद् जीवा बाह्येन्द्रियपरकसुखानि नोपभुञ्जन्ते। परमान्तरिकचिन्तनस्याबाधितसुखान्युपभुञ्जन्ते। रूपहीनलोके पञ्चेन्द्रियपरकवस्तूनि न सन्ति। न तु तेषामुपभोगस्य कृते पञ्चेन्द्रियाणि सन्ति। केवलं विकर्षणेन शून्यं रिक्तं मनोऽस्ति। समचित्ततावस्थायां वासोऽस्ति।

संसारस्य जीवानां षट् प्रविभागा निम्नलिखिताः[१]—

(१) देवता—खगोलीयरूपाणां लोकानां जीवा रूपहीनात्मनां जीवा इन्द्रियपरकलोकेषु षड्देवताः सन्ति तत्र।

(२) अर्धदेवता दानवो वा—सर्वेषु गुणेषु देवताभिः समानाः केवलमुपद्रवव्यतिरिक्तः।

(३) मानवः—नरः।

(४) (यीदागः) प्रेतः—जीवितात्मा बुभुक्षया सदैव पीडितः।

(५) पशुः—जन्तुः।

(६) नरकः—नरके विभिन्नश्रेणयः।

जीवाः स्वपूर्वकर्मानुसारेण विभिन्नस्वभावरूपाः।

कर्मविभ्रमो दुःखानां सत्यं कारणमस्ति। कर्मपरिभाषायां सुसङ्गतक्रिया प्रतिक्रियारूपेण परिगण्यते। तिब्बतीयभाषायाः क्रमेण सेम्पाईले साम्पाईले च।

सेम्पाईले कर्मणः प्रारम्भिकावस्था, यस्यां भौतिकक्रियावशेषाः। अस्यामवस्थायामवचेतनावेगः कर्मकरणाय भवति।

साम्पाईले पश्चादवस्था, यस्यां भौतिकमौखिकक्रिये च भवतः। परिणामे कर्मणस्त्रयः प्रकाराः। श्लाघ्यकर्मकारणाद् जीवो दैवतार्धदैवतमानवानां लोकेषु पुनर्जन्म धारयति। अश्लाघ्यकर्मानुसारेण पशुप्रेतनरकाणां निम्नतरलोकेषु पुनर्जन्म जीवो धारयति। कर्मपरिणामस्तु वर्तमानजीवनेऽथवान्यस्मिन् जीवने वा पश्चजीवनेऽनुभूयते।[२]

विभ्रमस्यानेकप्रकाराः सन्ति काम-क्रोध-मद-घृणाविद्वेषादयः। कामविद्वेषौ मुख्यविभ्रमौ। कामद्वारेण वस्तुषु विषयासक्तिः। अहमिति परिगण्यतेऽस्मिन्। मदः परिजायते विकसति च।

स्वं प्रति विद्वेषस्य समीकरणे व्यक्तेः प्रति घृणा विकसति। तदाज्ञानकारणात् सत्यस्य विरोधो भवति। अहंता चेतना स्वप्नेऽनुभूयते। वस्तुतस्तु समस्तप्रज्ञेयवस्तूनि स्वस्वभावादेव रिक्तानि, परन्तु विभ्रमेण स्वोद्भूतसत्त्वरूपेण दृश्यन्ते। विलोमतो विकृतकल्पनासमस्तविभ्रमाणां मूलमस्ति। संसारोऽयं बन्धनमुक्तः।

---

१. My Land & My People—Rev. Dalai Lama भाषानुवाद, पृ० १९०।
२. My Land & My People—Rev. Dalai Lama भाषानुवाद, पृ० १९१।

निर्वाणस्यार्थे बन्धनविमुक्तिर्जन्ममरणाभ्याम्। यदि संसारे पुनर्जन्मसर्जना न भवति, यदि भूतकालस्यावशेषकर्मसु वृद्धिर्विभ्रमश्च न, तदा कष्टकरजीवनस्य परिसमाप्तिर्भवति, पुनर्जन्मनः समाप्तिः। परं जीवस्यास्तित्वस्य समाप्तिर्न भवति। पुनर्जन्मनः परिसमाप्तेः पश्चात् संसारसागराद् मुक्तिनिर्वाणप्राप्त्यनन्तरं तस्य चेतनाविभ्रमाभ्यां मुक्ताध्यात्मिकशरीरस्यावशेषः, यस्मिन् कष्टं न भवति। निर्वाणस्तु निम्नतरावस्था। महानिर्वाणस्तूच्चैस्तमाऽवस्था। महापरिनिर्वाणावस्था प्रबोधनस्यावस्था। इयं बौद्धत्वावस्था कथ्यते।

श्रेष्ठसत्येषु सत्यमार्गोऽनुसरणीयः। अस्य मर्गस्यानुयायी हीनयानी महायानी वा। हीनयानी लघुतरमार्गानुयायी निजनिर्वाणप्राप्त्यर्थं प्रयतते। अनेन सम्प्रदायानुसारेण संसारस्य त्यागाय मनसि प्रबलेच्छा भवेत्। तेन धार्मिकशीलमित्यनुसरणीयम्[1]। समाधिसहयोगेन चिन्तनं तिब्बतीयभाषायां ल्हागथोंगमित्यभ्यसनीयम्। येन विभ्रमो दुरीभवेत्। अनेन प्रकारेण निर्वाणस्योपलब्धिर्भवति।

महायानस्य लक्ष्यं तु केवलं चेतनजीवाय निर्वाणस्योच्चैस्तमावस्था बौद्धत्वप्राप्त्यर्थं भवति। प्रबोधनविचारद्वारेण करुणामाध्यमेन च प्रेरितः सन् महायानी हीनयानसदृशेनाचरति।

पञ्च महायानमार्गाः

उद्यतीकरणम्, प्रयोगः, दर्शनमभ्यास उपलब्धिश्च भवन्ति। हीनयानी स्वनिर्वाणमन्तिमं न मन्यते, परन्तु बौद्धत्वं प्राप्तुं मार्गमनुसरति।

हीनयानो महायानश्च सैद्धान्तिकमार्गः। तन्त्रयानं यौगिकप्रक्रियाया मार्गस्य साधनापूर्वं दृढाधारप्रदानाय तदनुसरणीयम्। तिब्बतदेशे तन्त्रयानं परीक्षितं समर्थपण्डितैः। अस्मिन् बुद्धशिक्षा सम्मिलिताऽऽसीत्। तन्त्रयानस्य चत्वारो वर्गाः। विभ्रमो मुख्यतोऽनुशासनहीनत्वेन मनसा जायते। अतः कुत्सितविचारप्रवाहमवरुद्ध्य मनोऽनुशासितं प्रशिक्षितं करणीयं तन्त्रयाने। भ्रमणशीलं प्रक्षेपणशीलं मनः स्थिरतां लभते, यौगिकप्रक्रियामार्गेणाथवा तन्त्रयानेन।

तन्त्रयानेनैकदेवीदेवतानां प्रतिमाः सन्ति। अनेन मार्गेण मनो ध्यानस्य बाह्यलक्ष्योपरि केन्द्रितं भवति। अन्तिमलक्ष्याय शरीरं मन इन्द्रियाणाञ्च शुद्धये क्रोधपूर्णशान्तिपूर्णमुद्रा उपलब्धाः।

धार्मिकमार्गे प्रज्ञोपायौ भवतः। प्रज्ञा प्ररमार्थसत्यम्। उपायः संवृतसत्यम्। बौद्धनागार्जुनेन कथितम्—'बौद्धधर्मः परमार्थसत्यसंवृतसत्याभ्यां संयुक्तः' इति। उमायालज्युर्या बौद्धधर्मस्य प्रासङ्गिकासम्प्रदायेन मान्यमाध्यामिकसिद्धान्तानुसारेणेन्द्रियगोचरवस्तूनामुभयपक्षौ। गोचरमगोचरं वस्तु। संवृतसत्यस्य सम्बन्धो गोचरपक्षे मानसिकबिम्बज्ञानेन भवति। परमार्थसत्यस्य सम्बन्धोऽगोचरपक्षस्य ज्ञाने नास्ति। सार्वभौमशून्यतासत्यसमाप्तिश्च परमार्थसत्यम्। शेषस्तु सर्वमेव संवृतसत्यमस्ति।[2]

बौद्धधर्मस्य पूर्णसाधनाप्राकृतिकपरिवर्तनेन भिक्षुजीवनयापनेन पवित्रपुस्तकानां मन्त्रोच्चारणेन वा न लम्भनीया। विहारे जीवनपर्यन्तं धर्मग्रन्थानामवलोकनेन किञ्चिदपि

---

१. 2500 Years of Budhism—Gen. Editor Prof. P. V. Bapak, पृ० ९०।
२. 2500 Years of Budhism—Gen. Editor Prof. P. V. Bapak, पृ० १०७।

सारभूतं न लम्भनीयम् । अत एवोचितमानसिकाभिवृत्तेः प्रथमावश्यकता । स्वान्तिमशरणरूपे त्रिरत्नं पालनीयम् ।

त्रिरत्नानि च यथा[1]—

(१) बुद्धं शरणं गच्छामि ।

(२) धर्मं शरणं गच्छामि ।


(३) संघं शरणं गच्छामि ।

यदि संसारं त्यक्त्वा यत्नपूर्वकं धर्मानुसरणं कुर्यात्, तदानुसरणकर्ता महतीं प्रसन्नतां प्राप्नोति । तिब्बतदेशे नैकलोकाः सन्ति, यैः संसारस्त्यक्तोऽवर्णनीयमानसिकशारीरिकसन्तोषः सम्प्राप्तः । किन्तु संसारत्यागः प्रत्येकसाधारणजनेभ्यो न भवति । यतस्त्यागो बलिदानमपेक्षते । ते महान्तो यैः संसारस्य त्यागः कृतः ।

अनैतिकसांसारिकक्रियाकलापा निःसन्देहेन निरसनीयाः; यतः कोऽपि धर्मस्तेन न घटते । नैतिकदृष्ट्या समर्थनीयक्रियाकलापो यथा देशे शासनस्य साहाय्यमन्येषां सुखप्रसन्नताभिवृद्धिः, लाभदायको निर्माणकारी भवति । भारततिब्बतदेशयोर्बहवो नरेशा मन्त्रिणश्च धर्ममभिवर्द्धन्ते स्म । केवलं गार्हस्थ्यजीवननिर्वहणं कुर्वन् कोऽपि सत्यरूपेण प्रयतते चेत्, स तु मुक्तिं लभते । अतः सांसारिकमायादिकं त्यक्त्वा धर्मस्य पन्था अवलम्बनीय इति शम् ।

• • •

१. 2500 Years of Budhism—Gen. Editor Prof. P. V. Bapak, पृ० ३०४ ।



वाणीविलसितम्

प्रकाशकः—गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठग्रन्थमाला, प्रयागः, १९७८ ख्री०, मूल्यम् अनिर्दिष्टम्

२०३६ ख्रीस्ताब्दे वसन्तमहोत्सवाङ्गतया समायोजिते सम्मेलने वाराणसेयैः प्रयागस्थैः कविभिश्च पठितानां कवितानां संग्रहोऽयं विद्यापीठेन प्रकाशितः। एतस्मिन् संकलने न केवलानां रचनानां वैविध्यम्, अपि तु प्रवर्तमानानां स्थितौ भङ्ग्यन्तरेण परिहासाद्याधुनिकविषयजातमपि समाकलयितुं शक्यते। इह संकलितानां कवितानां कवयितारः संस्कृतस्याधुनिकाः कवयो भामहादिनिर्दिष्टमार्गानुधावनं सर्वथा परित्यज्य नूतना भङ्गीभणितीरप्युन्नेतुं सरलतया प्रभवन्तीत्यत्र सङ्कलनमेतत् प्रमाणम्। प्राचीनाचार्यवर्यान् प्रति सुमहत्या श्रद्धया भरिता अपि वागभिधानादिपद्धतावमी सुतरां प्रगल्भन्ते। पुरातने काले संस्कृतकवयः प्रायः परम्परया प्रतिबद्धा राज्ञां स्तुतौ शृङ्गारप्रचुरां कविताकामिनीमलङ्कारभारैरानतां विदधति स्म। अत एव लोकेषु बद्धमूलतां गता धारणा यन्न प्रतिफलन्ति स्म संस्कृतकाव्येषु तात्कालिक्यः स्थितयः। एतादृशीं धारणामपाकर्तुं कवितासंग्रहोऽयं भृशमुपकारको भविष्यतीति प्रत्येमि।

कवितासंग्रहेऽस्मिन् 'गजल-चैता-कहरवा' इत्येतादृशलोकगीत्यनुकरणदृशा संस्कृते कवनप्रवृत्तिर्लोकचित्ताकर्षणार्थमङ्गीकृता साधीयस्येव। 'स्कन्धहारीयम्' इति कवितायाः पादटिप्पण्यां कविना स्कन्धहारशब्दात् 'कँहार' इति शब्दो व्युत्पादितो मनोरमः, तत्र देशीभाषायाः 'काव' 'कावड' 'कावडि' 'कावोडि' 'कावडिय' 'काहार' इति तदर्थकाः शब्दास्तुलामर्हन्ति। इह कवीनां जीवनपरिचयेन सह तच्चित्राण्यपि प्रकाशितानीति काममुपयोगिताऽस्य समजनि। युगानुसारिनूत्नभावानुरञ्जिते काव्यविलासेऽस्मिन् केषाञ्चित् प्रचलितानां हिन्दीप्रभावितानां परिस्थितिसदृशानां शब्दानां प्रयोगो नास्वाभाविकः। कवितासंग्रहस्य मुखावरणमाकर्षकम्। एतादृशस्याभिनवप्रयासस्य कृते प्रकाशको नूनं साधुवादमर्हतीति

वागीशः शास्त्री



लघुग्रन्थमाला-३१

(अज्ञात कर्तृकः)

महाभारतयुद्धकालनिर्णयः



सम्पादकः

डॉ० जानकीप्रसादद्विवेदी

अनुसन्धानाधिकारी

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

वै० सं० २०३७

विषयानुक्रमणिका



भूमिका

धर्मक्षेत्रे कुरुक्षेत्रे कौरवपाण्डवयोर्मध्ये प्रवृत्तं युद्धं न केवलं भारतीया एव विदन्ति, परं देशान्तरीया अपि शिक्षिता जना महाभारतीययुद्धगाथया प्रायेण परिचिताः सन्ति। वर्षचतुष्टयपूर्वं डी० सी० सरकार-ए० डी० सांकलियाप्रभृतिपुरातत्त्व-विद्भिरुद्भावितैः कैश्चिदाक्षेपैः पुनर्विचारणीयं तदीयघटनादिकं वृत्तजातमनेकत्र आयोजितासु विद्वद्गोष्ठीषु पर्यालोचितमभूत्। क्वचिद् विद्वद्गोष्ठीषु आक्षेपकविद्वांसोऽपि सम्मिलिता अभूवन्। पुरातत्त्व-ज्योतिष-साहित्यादिदृशा 'महाभारतग्रन्थे प्रसिद्धं युद्ध-मभून्नवा, तच्च कदाऽभूत्' इत्यादिविषयेषु विद्वद्भिरनेके विचाराः प्रस्तुताः। 'रामायण-महाभारत-कालमीमांसा' सदृशा ग्रन्थाः, 'महाभारत-घटना की ऐतिहासिकता और कालनिर्णय' प्रभृतयोऽनेके निबन्धाश्चापि प्रकाशिताः समभूवन्।

इदं तु निश्चितमेव यद् युद्धमष्टादशदिवसेषु सम्पन्नम्, परिमिदमनिश्चितम्—कस्मिंश्चिद् दिवसे युद्धविरामोऽप्यभून्नवेति। प्रायेणात्र विषये परीक्षका विवदन्ते। जी० डब्ल्यू० कवीश्वराभिमतं मध्ये मध्ये युद्धविरामपक्षे वर्तते, परं डॉ० काणे-दफ्तरी-प्रभृतिविद्वांसो न सन्ति सम्मताः, तेऽष्टादश दिनानि यावद् युद्धं प्रतिदिनं प्रवृत्तमिति मन्यन्ते। स्वामिश्रीकरपात्रमहाभागानामपि सम्मतिर्विराममन्तरैव युद्धप्रवृत्तिपक्षीया वर्तते।

अत्रेयं विचारणा प्रवर्तते—युद्धस्याष्टादशे स्वकीययात्रायाश्च द्वाचत्वारिंशत्तमे दिवसे कृष्णाग्रजो बलरामस्तत्र युद्धस्थले उपस्थितः स्वशिष्ययोर्भीमदुर्योधनयोर्गदायुद्धं द्रष्टुकामः। स च पुष्यनक्षत्रे यात्रार्थं प्रस्थानमकरोत्, श्रवणे च पुनरायातः। तथाहि-

> चत्वारिंशदहान्यद्य द्वे च मे निःसृतस्य वै।
> पुष्येण सम्प्रयातोऽस्मि श्रवणे पुनरागतः॥ इति। (शल्य० ३४।६)

पुष्यादारभ्य श्रवणपर्यन्तमावृत्तिद्वयेन द्वाचत्वारिंशत् संख्या सम्पद्यते।

इदं चिन्त्यते-युद्धारम्भो मघायां चित्रायां वा स्यात्, परं कतिपययुद्धविराम-मन्तरा बलरामयात्राया द्विचत्वारिंशत्तमे दिवसे युद्धस्याष्टादशतमो दिवसो न भवेत्। तत्रापि कदाचिद् दिवसैकस्य कदाचिच्च दिवसद्वितयस्यापि विरामः संभाव्यते, कदाचिद् विरामं विनाऽपि युद्धं प्रवर्ततेत्यादि।

महाभारते मध्ये मध्ये युद्धावरोधविषये नास्ति स्पष्टं कश्चिन्निर्देशः। तत्र प्रतियुद्धावहारानन्तरमेतादृशानि वचनानि लभ्यन्ते, यै रात्रेरवसाने प्रभातकाले च संजाते पुनर्युद्धकर्मणि सर्वे योधाः प्रवृत्ता इति वक्तुं शक्यते। तथाहि—

> सूर्योदये सञ्जय के नु पूर्वम्। (भीष्म० ५०।१)
> प्रभातायां च शर्वर्यां भीष्मः शान्तनवस्तदा। (५६।१)

व्युष्टां निशां भारत भारतानामनीकिनीनां प्रमुखे महात्मा। (६०।१)
व्युषितायां तु शर्वर्यामुदिते च दिवाकरे। (६९।१)
व्यतीतायां तु शर्वर्यां पुनर्युद्धाय निर्ययुः। (७५।१)
ततः प्रभाते विमले स्वेन सैन्येन वीर्यवान्। (८१।११)
परिणाम्य निशां तां तु सुखं प्राप्ता जनेश्वराः। (८७।१)
प्रभातायां तु शर्वर्यां प्रातरुत्थाय तान् नृपः। (९८।२६)
ततस्ते पाण्डवाः सर्वे सूर्यस्योदयनं प्रति। (१०८।२)
परिणाम्य निशां तां तु भारद्वाजो महारथः। (द्रोण० २०।१)

इति द्वितीययुद्धदिवसादारभ्य एकादशयुद्धदिवसं यावद् युद्धस्य पूर्ववर्तिकृत्यानां निर्देशकानि वचनानि सन्ति। तथापि दशमदिवसीययुद्धानन्तरं प्राप्तेन विवरणेनेदं द्रढं वक्तुं शक्यते, एकस्मिन् द्वयोर्वा दिवसयोर्युद्धं नाभूदिति। यतो हि भीष्मपतनानन्तरम्—

व्युष्टायां तु महाराज शर्वर्यां सर्वपार्थिवाः।
पाण्डवा धार्तराष्ट्राश्च उपातिष्ठन् पितामहम्॥ (भीष्म० १२१।१)

इति वचनानुसारेण सर्वे योधास्तत्र युद्धं नाकुर्वन्, किं तर्हि भीष्ममुपगम्य तं परिवार्य च तस्थुरिति। तत्र भीष्मनिर्देशमनुसृत्यार्जुनेन जलदानं कृतम्। तदनु सर्वे राजानः शिबिराणि प्रतिययुः—

ततस्ते पार्थिवाः सर्वे जग्मुः स्वानालयान् पुनः।
तूष्णींभूते महाराज भीष्मे शान्तनुनन्दने॥ इति।
(भीष्म० १२२।१)

तदनु राधेयः कर्णो भीष्मपतनवृत्तमाकर्ण्य तत्समीपं गतवान्, तत्र तयोः कश्चिद् संवादः प्रवृत्तः, ततश्च कर्णो दुर्योधनं प्रत्यागच्छत्—

इत्युक्तवति गाङ्गेये अभिवाद्योपमन्त्र्य च।
राधेयो रथमारुह्य प्रायात् तव सुतं प्रति॥ (भीष्म० १२२।३९)

एतत्कार्यानन्तरं द्रोणस्य सैनापत्येऽभिषेकः, ततो युद्धं प्रवृत्तम्। एतेन स्पष्टमेव प्रतिभाति-कञ्चिदत्र युद्धविराम आसीदेवेति।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयसरस्वतीभवने पत्रत्रितयात्मकोऽपूर्ण एको हस्तलेखः सुरक्षितः। हस्तलेखस्यापूर्णत्वाद् लेखकस्य लेखनकालस्य च परिचयोऽत्र नास्ति, तथापि महाभारतीयविषयाणां सम्प्रति बहुत्र चर्चा प्रवर्तते, तत्रानेनापि कश्चिदुपकारः स्यादिति कृत्वा हस्तलेखोऽयं सम्पादितः। हस्तलेखान्तराभावात् पाठान्तराणि नेह प्रस्तुतानि। संवद्धस्थलेऽपेक्षितं वक्तव्यं पादटिप्पण्यां मया विवृतम्। ग्रन्थे ये हि विषयाः संकेतैः प्रतीकैश्च निर्दिष्टास्तेषां बोधसौकर्याय परिशिष्टमेकं ग्रन्थान्ते योजितम्, यत्र लोहाभिसार-उपप्लव्य-युद्धारम्भ-युद्धावहार-युधिष्ठिरमन्त्र-विचार-भीष्मपतनादिघटनावबोधका महाभारतीयादयोंऽशा उपन्यस्ताः सन्ति। यथावसरं नीलकण्ठटीकातोऽपि भारतभावदीपाख्यायाः कानिचिद् व्याख्यानवचनानि तदीयाभिमताविर्भावनाय प्रदत्तानि।

हस्तलेखस्य विषयपरिचयः

'महाभारतयुद्धकालनिर्णयः' इत्याख्ये लघुग्रन्थे लेखकेनादौ प्रतिज्ञातं यदत्र 'महाभारतयुद्धं कस्मिन् मासे कस्यां च तिथौ प्रारब्धं समाप्तं चेति कृष्णद्वैपायनस्य वचनोद्धरणैर्व्याख्यास्यते' इति। तथाहि—'अथ कस्मिन् मासे कस्यां वा तिथौ महाभारतयुद्धप्रारम्भस्तत्समाप्तिर्वेत्यत्र भगवतः कृष्णद्वैपायनस्य कांश्चिच्छ्लोकानुदाहृत्य व्याख्यास्यामः' इति।

प्रतिज्ञानन्तरम् 'कौमुदे मासि रेवत्याम्' इत्यादिश्लोकव्याख्याने 'शरदन्त' शब्दस्य 'आश्विनमासान्त' इत्यर्थो विहितः। सर्वज्ञनारायण-नीलकण्ठयोरभिमतमनाद्रियमाणेन तेन स्वमतसमर्थनाय हेतवोऽपि केचिदाविष्कृताः—तस्मिन् वर्षे आश्विनोऽधिकमासः, शुद्धे आश्विनशुक्लपक्षे तुलाराशौ सूर्यः समागतः, आश्विनस्याधिकमासवशाद् द्वितीये आश्विनमासे एव हेमन्तर्तोरासन्नता सम्भाव्यते, 'लोहाभिसारो निर्वृत्तः' इत्युलूकवचनोक्तं लोहाभिसारकर्म आश्विनशुक्लप्रतिपदमारभ्य आश्विनशुक्लदशमीपर्यन्तं प्रवर्तते। निर्वृत्तपदमचिरनिर्वृत्तार्थकम् इति। एवमाश्विनशुक्लपक्षे शुद्धद्वादश्यनन्तरन्त्रयोदश्यां रेवतीनक्षत्रे शान्तिवार्तायै भगवतः कृष्णस्य हस्तिनापुरं प्रति प्रस्थानमभूत्। ततो नवमदिवसे कार्तिककृष्णषष्ठ्यां पुष्यनक्षत्रे भगवतः पाण्डवान् प्रत्यागमनम्। अस्मिन्नेव दिवसे पुष्यनक्षत्रे दुर्योधनसैन्यस्य कुरुक्षेत्रं प्रति प्रयाणम्, सन्ध्यायां पाण्डवसैन्यस्य निर्याणम्, बलभद्रस्य तीर्थयात्रा च। ततो द्वितीये दिवसे सप्तम्यां कुरुक्षेत्रे सैन्यद्वयस्योपस्थितिः।

अष्टम्यां युद्धारम्भः। अमावास्यायां युद्धविरामे सूर्योपरागो निमित्तं नाङ्गीक्रियते। तत्र सूर्यग्रहणस्य कश्चित् सम्प्रदायानुसारी अर्थो दर्शितः। वाल्मीकिरामायणादेरपि कानिचित् प्रमाणवचनानि अपर्वग्रहणविषये प्रस्तुतानि। कार्त्तिकशुक्लद्वितीयदशम्यां सायं भीष्मपतनम्, ततो दिनपञ्चकं यावद् एकादशीतः पूर्णिमान्तं युद्धं नावर्तत। अत्र सनत्कुमारसंहितायाः किञ्चिद् वचनं प्रमाणरूपेणोपन्यस्तम्। एतस्मिन् दिनपञ्चकेऽर्जुनो भीष्माय जलदानकार्ये व्यासक्तो जात इति हेतोर्युद्धविरामः। दशदिवसेषु युद्धं भीष्मस्य सैनापत्ये दुर्योधनपक्षतः समभूत्, भीष्मपतनानन्तरम् एकादशदिवसीययुद्धस्य सैनापत्यं द्रोणेनाधिकृतम्। युधिष्ठिरग्रहणासामर्थ्यवशाद् मार्गशीर्षकृष्णचतुर्थीपञ्चम्योरर्जुनस्य दूरेऽपनयनाय कौरवसैन्येन यन्त्रादिप्रधानसैन्यस्य प्रस्थापनं कृतम्। एतावतैवापूर्णविवरणेन ग्रन्थः समाप्तिं गतः।

एतद्ग्रन्थप्रक्रियानुमानेन मार्गशीर्षशुक्लतृतीयापर्यन्तं महाभारतयुद्धं स्यात्, श्रवणनक्षत्रं यावत् तस्य प्रवर्तमानत्वात्। तस्मिन्नेव दिवसे श्रवणनक्षत्रे बलभद्रो गदायुद्धप्रसङ्गे तीर्थयात्रातः प्रतिनिवृत्तः। एवं पुष्यमारभ्य श्रवणपर्यन्तं बलभद्रस्य तीर्थयात्रायाः प्रवर्तमानत्वाद् महाभारतीययुद्धं श्रवणे समाप्तमिति निश्चये सत्यपि युद्धारम्भे विवादो विदुषां वर्तत एव। जी० डब्ल्यू० कवीश्वरेण स्वीयगणनातिरिक्तमपि गणनाद्वयं दर्शितं महाभारतयुद्धस्य। तत्रैका गणना डॉ० काणे-दफ्तरीप्रभृतिविदुषामभिमता, अपरा च गणना लोकव्यवहारमनुसरति। तथाहि द्रष्टव्यास्तिस्रो गणनाः सूच्यामस्याम् (विक्रम, १९७१ मई—नवम्बर अं०, पृ० ३०-३१, उज्जैन)—

युद्धदिवसः	१ गणना	२ गणना	३ गणना
१. (गीताजयन्ती)	अमावस्या	अमावस्या	शुक्ल-एकादशी
२.	शुक्ल-द्वितीया	शुक्ल-प्रतिपदा	” द्वादशी
३.	” चतुर्थी	” द्वितीया	” त्रयोदशी
४.	” षष्ठी	” तृतीया	” चतुर्दशी
५.	” अष्टमी	” चतुर्थी	” पूर्णिमा
६.	” दशमी	” पञ्चमी	कृष्ण-प्रतिपदा
७.	” द्वादशी	” षष्ठी	शुक्ल-द्वितीया
८.	” चतुर्दशी	” सप्तमी	” तृतीया
९.	कृष्ण-प्रतिपदा	” अष्टमी	” चतुर्थी
१०. (भीष्मपतनम्)	” तृतीया	” नवमी	” पञ्चमी
११.	” पञ्चमी	” दशमी	” षष्ठी
१२.	” सप्तमी	” एकादशी	” सप्तमी
१३.	” दशमी	” द्वादशी	” अष्टमी
१४. (जयद्रथवधः)	” द्वादशी	” त्रयोदशी	” नवमी
१५. (द्रोणवधः)	” त्रयोदशी	” चतुर्दशी	” दशमी
१६.	” अमावस्या	” पूर्णिमा	” एकादशी
१७.	शुक्ल-द्वितीया	कृष्ण-प्रतिपदा	” द्वादशी
१७½. (शल्यवधः)	” चतुर्थी	” द्वितीया	” त्रयोदशी
१८. (दुर्योधनवधः)	” पञ्चमी	” द्वितीया	” त्रयोदशी

सम्प्रति 'महाभारतयुद्धकालनिर्णयः' इति लघुग्रन्थानुसारेण जी० डब्ल्यू० कवीश्वराभिमतानुसारेण च महाभारतीययुद्धादेर्मासपक्षादीनां स्पष्टमवबोधायात्र युद्धस्य दिवसाः, युद्धविरामस्य दिवसाः, युद्धस्य पूर्वभाविन्यः पश्चाद्भाविन्यश्च काश्चित्तिथयो घटनाश्च सूचीषु प्रस्तूयन्ते—

१. (महाभारतीययुद्धदिवसानां मास-पक्ष-तिथि-नक्षत्राणि)

युद्धदिवसाः	मासः	पक्षः	तिथिः	नक्षत्रम्	विशेषघटनाः
१.	कार्त्तिकः	कृष्णः	८	मघा (चन्द्रमाः)	गीताजयन्ती, विश्वरूपदर्शनम्, युद्धारम्भः, युधिष्ठिरसैन्यस्य विनाशः ।
२.	”	”	१०	उत्तराफाल्गुनी	—
३.	”	”	१३	स्वाती	—

४.	"	शुक्लः	१	अनुराधा	दुर्योधनभ्रातॄणां वधः
५.	"	"	३	मूलः	—
६.	"	"	४	पूर्वाषाढः	दुर्योधने भीमपराक्रमः
७.	"	"	६	श्रवणः	—
८.	"	"	७	धनिष्ठा	दुर्योधनभ्रातॄणाम् इरावतश्च वधः
९.	"	"	९	पूर्वाभाद्रपदः	भीष्मपराक्रमः
१०.	"	"	१० (द्वितीया)	रेवती	भीष्मपतनम्
११.	मार्गशीर्षः	कृष्णः	२	आर्द्रा	युधिष्ठिरस्य ग्रहणाय द्रोणस्य प्रयत्नः

२. (युद्धविरामस्य दिवसाः, तत्र च निमित्तानि)

क्रमसं०	मासः	पक्षः	तिथिः	नक्षत्रम्	निमित्तम्
१.	कार्त्तिकः	कृष्णः	९	पूर्वाफाल्गुनी	भीष्मपराक्रमेण पराभूतस्य युधिष्ठिरस्य वासुदेवादिभिः समं मन्त्रणा
२.	"	"	११	हस्तः	एकादशी-व्रतं भीष्मादेः
३.	"	"	१२	चित्रा	एकादशीव्रतस्य पारणा भीष्मादेः
३.	"	"	३०	विशाखा	अमावास्याश्राद्ध-दीपोत्सवयोः सर्वेषां व्यासक्तिः
५.	कार्त्तिकः	शुक्ल	२	ज्येष्ठा	भ्रातृवधसंतप्तस्य दुर्योधनस्य उत्साहभङ्गः।
६.	"	"	५	उत्तराषाढः	भीमस्य गदाप्रहारैर्दुर्योधनस्य व्यथा।
७.	"	"	८	शतभिषक्	भ्रातृवधसंतप्तस्य दुर्योधनस्य इरावद्वध-विषण्णानां पाण्डवानां चोत्साहाभावः
८.	"	"	१० (प्रथमा)	उत्तराभाद्रपदः	भीष्मपराक्रमदर्शनेन युधिष्ठिरस्य विजये नैराश्यम्, वासुदेवादिभिः समं मन्त्रणा, भीष्मसमीपे रात्रौ गमनं च।
९.	"	"	११	अश्विनी	भीष्माय जलदानकर्मणि अर्जुनस्य व्यासक्तिः
१०.	"	"	१२	भरणी	
११.	"	"	१३	कृत्तिका	
१२.	"	"	१४	रोहिणी	
१३.	"	"	१५	मृगशिरस्	

१४.	मार्गशीर्षः	कृष्णः	१	मृगशिरसोऽव-शेषः	द्रोणस्य सैनापत्येऽभिषेकः।
१५.	"	"	३	पुनर्वसुः	युधिष्ठिरग्रहणे विफलस्य द्रोणस्योत्साहाभावः।

३. (युद्धस्य पूर्ववर्तिन्यः काश्चिद् घटनास्तिथयश्च)

क्र.सं.	मासः	पक्षः	तिथिः	नक्षत्रम्	घटना
१.	द्वितीय-आश्विनः	शुक्लः	शुद्धद्वादश्य-नन्तरं त्रयोदशी	रेवती	पाण्डवराज्यप्रत्यानयनाय कुरून् प्रति प्रस्थितस्य भगवतः प्रस्थानदिनम्।
२.	कार्तिकः	कृष्णः	षष्ठी	पुष्यः	अगृहीतानुनये दुर्योधने भगवतः परावृत्य पाण्डवान् प्रत्यागमनम्, ससैन्यस्य दुर्योधनस्य पाण्डवानां च कुरुक्षेत्रं प्रति युद्धाय प्रयाणम्, बलभद्रागमनम्, तस्य तीर्थयात्रा, रुक्म्यागमनं च तत्र।
३.	"	"	सप्तमी	आश्लेषा	उभयोः सेनयोः कुरुक्षेत्रप्राप्तिः, पाण्डवोत्तेजनायोलूकस्य दूत्येन प्रेषणं पाण्डवसमीपे, भीष्मेण दुर्योधनं प्रति रथातिरथसंख्यानं च।
४.	"	"	अष्टमी	मघा	सूर्योदयात् पूर्वं भीष्मादीन् प्रति दुर्योधनस्य पाण्डवसैन्यप्रमापणप्रश्नः युधिष्ठिरस्य चार्जुनं प्रति कुरुसैन्यप्रमापणप्रश्नः। सूर्योदयानन्तरमुभयोः सैन्ययोर्युद्धार्थं संनाहः। दोषदर्शनात् स्वजनवधपराङ्मुखस्यार्जुनस्य विश्वरूपप्रदर्शनादिना भगवता कृष्णेन पुनः प्रोत्साहनम्।

४. जी० डबल्यू० कवीश्वराभिमता युद्धदिवसाः
(विक्रमपत्रिका, उज्जैन, मई-नवम्बर अं०, १९७१)

युद्धदिवसाः	मासः	पक्षः	तिथिः	नक्षत्रम्	विशेषः
१.	मार्गशीर्षः	कृष्णः	३०	चित्रा	गीताजयन्ती, बलरामयात्राया अष्टमो दिवसः।
२.	मार्गशीर्षः	शुक्लः	२	—	—
३.	"	"	४	—	—

४.	"	"	६	—	—
५.	"	"	८	—	—
६.	"	"	१०	—	—
७.	"	"	१२	—	—
८.	"	"	१४	—	—
९.	पौषः	कृष्णः	१	—	—
१०.	"	"	३	—	भीष्मपतनम् (भीष्म० ११२।१२)
११.	"	"	५	—	—
१२.	"	"	७	—	—
१३.	"	"	१०	—	अभिमन्युवधः, उत्तराया विलापे संवासकालस्य संकेतः।
१४.	"	"	१२	—	जयद्रथवधः।
१५.	"	"	१३	—	द्रोणवधः।
१६.	"	"	३०	—	—
१७.	पौषः	शुक्लः	२	—	कर्णवधः।
१७½.	"	"	४	—	मध्याह्ने शल्यवधः।
१८.	"	"	५	श्रवणः	भीमदुर्योधनयोर्गदायुद्धम्, दुर्योधनस्य निधनं च।

५. जी० डब्ल्यू० कवीश्वराभिमता युद्धविरामदिवसाः, तत्र च निमित्तानि (विक्रमपत्रिका, उज्जैन, मई-नवम्बर अं०, १९७१)

क्रमसं०	मासः	पक्षः	तिथिः	नक्षत्रम्	निमित्तम्
१.	मार्गशीर्षः	शुक्लः	१	स्वाती	—
२.	"	"	३	—	—
३	"	"	५	—	—
४.	"	"	७	—	—
५.	"	"	९	—	—
६.	"	"	११	—	—
७.	"	"	१३	—	—
८.	"	"	१५	कृत्तिका	[अस्मिन् पक्षे स्वाती-भरण्योर्मध्ये नक्षत्रमेकं लुप्तं स्यात्]

९.	पौषः	कृष्णः	२	—	—
१०.	"	"	४	—	द्रोणस्य सेनापतिपदेऽभिषेकः ।
११.	"	"	६	—	—
१२.	"	"	९	—	[तिथेरेकस्याः कस्याश्चिदत्र लोपोऽभिमतः]
१३.	"	"	११	—	—
१४.	"	"	१४	—	कर्णस्य सेनापतिपदेऽभिषेकः।
१५.	पौषः	शुक्लः	१	—	—
१६.	"	"	३	—	शल्यस्य सेनापतिपदेऽभिषेकः ।

६. जी० डब्ल्यू० कवीश्वर-दर्शिता युद्धस्य पूर्ववर्त्तिन्यः पश्चाद्वर्तिन्यश्च काश्चिद् महत्त्वपूर्णास्तिथयो घटनाश्च

(विक्रमपत्रिका, उज्जैन, मई—नवम्बर सं०, १९७१, पृ० ५२)

क्र.सं.	मासः	पक्षः	तिथिः	नक्षत्रम्	घटना
१.	मार्गशीर्षः	कृष्णः	७	पुष्यः	शान्तिवार्ताया असाफल्यम्, श्रीकृष्णस्य उपप्लव्यं प्रत्यागमनम्, बलरामस्य तीर्थयात्रारम्भः ।
२.	"	"	८-	आश्लेषा-	उभयोः सेनयोः कुरुक्षेत्रं प्रति प्रयाणम्,
	"	"	१३	उत्तरफल्गुनी (नक्षत्रैकस्य वृद्धिः)	शिविरादिनिर्माणम्, युद्धपूर्वाभ्यासः ।
३.	"	"	१४	हस्तः	युद्धवार्त्ताहररूपेण व्यासद्वारा संजयस्य नियुक्तिः ।
४.	पौषः	शुक्लः	५ (द्वितीया)	(धनिष्ठा ?)	सामूहिकी दाहक्रिया ।
५.	पौषः	शुक्लः	६ तः		मासं यावत् पाण्डवैरशौचपालनम् ।
	माघः	शुक्लः	५ पर्यन्तम्=१ मासः		
६.	माघः	शुक्लः	६-९		पाण्डवानां हस्तिनापुरे प्रवेशः, युधिष्ठिरस्य राज्याभिषेकः ।
७.	"	"	१०		युधिष्ठिर-श्रीकृष्णाभ्यां धर्मोपदेशार्थं भीष्मं प्रति प्रार्थनम्, आगामिनि दिवसे उपदेशस्याश्वासनं भीष्मेण ।

८.	” ”	११-१५	भीष्मद्वारा धर्मोपदेशः। ५८ तमरात्रेः समाप्तौ माघपूर्णिमायामुषसि भीष्मस्य प्राणोत्क्रमणम्।

महाभारतस्य बहवो व्याख्यानभूता ग्रन्था अद्यापि अप्रकाशिताः सन्ति। अत्र सरस्वतीभवनेऽपि विमलबोधरचिता अनेके ग्रन्थाः सन्ति सुरक्षिताः। मन्ये तेषां प्रकाशनेन विषयेऽत्रानभिज्ञातोऽपि कश्चिदुपकारः स्यात्। 'महाभारतयुद्धकालनिर्णयः' इति ग्रन्थे दर्शिता युद्धस्य युद्धविरामस्य च मास-तिथि-नक्षत्रविषयकाः पक्षाः, पक्षोपोद्बलकानि प्रमाणवचनानि च विद्वद्भिः समादरणीयानि स्युरित्याशास्पदम्।

विदुषां विधेयः
डॉ० जानकीप्रसादद्विवेदः
अनुसन्धानाधिकारी
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

(अज्ञातकर्तृकः)

महाभारतयुद्धकालनिर्णयः

श्रीगणेशाय नमः

अथ कस्मिन् मासे कस्यां वा तिथौ महाभारतयुद्धप्रारम्भस्ततसमाप्तिर्वेत्यत्र भगवतः कृष्णद्वैपायनस्य कांश्चिच्छ्लोकानुदाहृत्य व्याख्यास्यामः। तथाहि—

[1]कौमुदे मासि रेवत्यां शरदन्ते हिमागमे।
स्फीतसस्ययुते काले कल्पः कल्पवतां वरः॥ इति।

अस्यार्थः। कौमुदी कोजागरणपूर्णिमा तया युक्तः कौमुद आश्विनो मासः, तस्य रेवत्यां शुद्धद्वादश्यनन्तरत्रयोदश्याम्। शरदन्ते हिमागम इति। यद्यपि शरदन्तो हिमागमश्च कार्त्तिकान्ते सम्भवति तथापि तत्र संवत्सरे [2]आश्विनाधिक्याद् द्वितीयाश्विनशुद्धप्रतिपदि तुलासंक्रमणत्वात् कन्यातुलयोः [3]शरद्रूपत्वात तद्भागस्य जातप्रायत्वाद् द्वितीयाश्विनस्य कार्त्तिकस्थानापन्नत्वाद् आश्विनान्त एव शरदन्तत्वोक्तिः।

यत्तु [4]सर्वज्ञनारायण-[5]नीलकण्ठाभ्याम्—कुमुदानि सन्त्यस्मिन्निति व्युत्पत्तिमभ्युपगम्य कौमुदे कार्त्तिके मासि रेवत्यां शुद्धद्वादश्यामिति व्याख्यातम्। तन्न।

'[6]लोहाभिसारो निर्वृत्तः कुरुक्षेत्रमकर्दमम्' इत्युलूक[7]वाक्याद् देवीपक्षीयप्रतिपदमारभ्य दशमीपर्यन्तं क्रियमाणस्य लोहाभिसारकर्मणोऽचिरनिर्वृत्तत्वप्रतीतेर्विरोधान्तरस्य प्रदर्शयिष्यमाणत्वाच्च। इदं च पाण्डवराज्यप्रत्यानयनाय कुरून् प्रति प्रस्थितस्य भगवतः [8]प्रस्थानदिनम्। ततो नवमदिने प्रतिपदः क्षयकृष्णषष्ठ्यां पुष्ययुतायाम-

---

१. मभार०, उद्योग० ८१।७

२. १८८५ शकवत्सरे आश्विनोऽधिकमास आसीदिति श्रूयते। महाभारतीययुद्धवर्षे आश्विनस्याधिकमासे प्रमाणमन्वेषणीयं वर्तते।

३. चैत्रमासाद् वर्षारम्भे सम्मते चैत्रमासे च मीनराशौ भास्करे चरति सति आश्विनमासे कन्याराशिरायाति। चैत्रमासे वसन्तस्यारम्भः आश्विनमासे च शरदः, एतेन कन्यातुलयोर्भास्करे वर्तमाने शरद् ऋतुः प्रवर्तते। "शिशिरवसन्तावुदगयनस्थौ" (म०भा० २।२।३४) इति वचनानुसारेणोत्तरायणस्यारम्भः शिशिरात् प्रवर्तते, एतेनापि गणनया कन्यातुलयोः शरदृतुर्भवतीति ज्ञायते।

४. 'भारतार्थप्रकाश' नाम्नी टीका सर्वज्ञनारायणेन कृता, सा च प्रकाशिता नोपलभ्यते।

५. 'भारतभावदीप' नाम्नी संक्षिप्ता टीका नीलकण्ठेन कृता, सा च पूनातः प्रकाशिता लभ्यते।

६ मभार०, उद्योग० १५७।१८; १५८।११

७. दुर्योधनमातुलस्य शकुनेः पुत्रः।

८. 'कौमुदे मासि रेवत्याम्' इति श्लोकोक्तम्।

गृहीतानुनये दुर्योधने भगवतः परावृत्य पाण्डवान् प्रत्यागमनम् ।

[९]'प्रयाध्वं वै कुरुक्षेत्रं पुष्योऽद्येति पुनः पुनः' इति दुर्योधनवाक्यात् तस्यामेव ससैन्यस्य दुर्योधनस्य कुरुक्षेत्रं प्रति युद्धाय प्रयाणम् । तस्यामेव सन्ध्याया[१०]मुपप्लव्यक्रम-प्रत्यासन्नैः पाण्डवैः सह समागम्य भगवता दुर्योधनाभिप्रायनिवेदनम् । गृहीताभिप्रायाणां च तेषां कुरुक्षेत्रं प्रति युद्धाय निर्याणम्, तदैव बलभद्रागमनं तत्तीर्थयात्रा च—

[११]'पुष्येण सम्प्रयातोऽस्मि श्रवणे पुनरागतः' इति गदापर्वणि बलभद्रवाक्यात् । रुक्म्यागमनमपि तदैव—बलभद्रगमनानन्तरम् [१२]'एतस्मिन्नेव काले तु' इत्यादिना रुक्म्यागमनस्योद्योगे उक्तत्वात् ।

'उपप्लव्य' शब्दश्च शत्रुराज्यावस्कन्दनाय तत्क्षणनिर्मित उपकार्याप्राये परित्याग-समयविनाशनयोग्ये प्रदेशे रूढो विज्ञेयः । ततः सप्तम्यामश्ले[१३]पानक्षत्रे उभयोः सेनयोः कुरुक्षेत्रप्राप्तिः । [१४]उलूकस्य च पाण्डवोत्तेजनाय दूत्येन प्रेषणं [१५]भीष्मेण च दुर्योधनं प्रति रथातिरथसंख्यानम्, तदनन्तरदिनेऽष्टम्याम्—[१६]'प्रभातायां तु शर्वर्यां पुनरेव सुतस्तव' इत्यादिना सूर्योदयात् पूर्वमेव भीष्मादीन् प्रति दुर्योधनस्य पाण्डव-सैन्यप्रमापणप्रश्नोऽर्जुनं प्रति च युधिष्ठिरस्य कुरुसैन्यप्रमापणप्रश्नः ।

ततः सूर्योदयानन्तरम् [१७]'ततः प्रभाते विमले धार्तराष्ट्रेण चोदिताः' इत्युद्योग-पर्वणि संजयवाक्यात् [१८]'मघाविषयगः सोमस्तद्दिनं प्रत्यपद्यत' इति भीष्मपर्वणि तद्वाक्याच्च मघानक्षत्रयोगे उभयोः सैन्ययोर्युद्धार्थं संनाहः । [१९]दोषदर्शनात् स्वजनवध-पराङ्मुखस्य चार्जुनस्य [२०]विश्वरूपप्रदर्शनादिना पुनः प्रोत्साहनं युद्धप्रारम्भो भङ्गश्च युधिष्ठिरस्य सैन्यस्य ।

सन्ध्यायां नवम्यां [२१]पूर्वफल्गुनीनक्षत्रे भीष्मपराक्रमदर्शनादसम्भावितात्म-जयस्य युधिष्ठिरस्य वासुदेवादिभिर्मन्त्रविचारणादयुद्धम् ।

---

९. मभार०, उद्योग० १५०।३.
१०. विराटनगरसमीपस्थमेकं नगरम् ।
११. मभार०, गदा० ३४।६.
१२. मभार०, उद्योग० १५८।१-२.
१३. उद्योग० १५१।६७-६८; १५३।१७.
१४. द्र०-उद्योग०, अ० १६०-६३.
१५. द्र०-उद्योग०, अ० १६६-६८.
१६. उद्योग० १९३।१.
१७. उद्योग० १९५।१.
१८. भीष्म० १७।२.
१९. द्र०—भीष्म०, अ० २५.
२०. द्र०—भीष्म०, अ० २५-४२.
२१. भीष्म०, अ० ५०.

दशम्यामुत्तरफल्गुन्यां[२२] द्वितीययुद्धम् ।

तत एकादश्यां द्वादश्यां च क्रमाद् हस्तचित्रयोः सैन्यद्वयप्रधानभूतानां भीष्म-युधिष्ठिरप्रभृतीनामुपवासपारणयोर्व्यासक्तत्वादयुद्धम् । कृष्णैकादश्युपवासस्य गृहस्थ-विषयत्वाभावेऽपि—

[२३]शायिनीबोधिनीमध्ये या कृष्णैकादशी भवेत् ।
सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन ॥

इति वचनान्तरात् तथात्वावगमः ।

त्रयोदश्यां [२४]स्वातिनक्षत्रे तृतीययुद्धम् । चतुर्दशीशेषानन्तरममावास्यायां विशाखानक्षत्रेऽमाश्राद्धदीपोत्सवव्यासङ्गादयुद्धम् ।

[२५]सप्तमाच्चापि दिवसादमावास्या भविष्यति ।
संग्रामो युज्यतां तस्यां तामाहुः शक्रदेवताम् ॥

इति षष्ठ्यां कुरुभ्यः परावर्तमानेन भगवता कर्णं प्रति तद्दिनस्य जातप्रायत्वात् सप्तमीमारभ्य सप्त दिनानि गणयित्वाऽष्टमदिनेऽमावास्यायामिन्द्राग्निदेवत्यस्य द्विदेवत्य-स्यापि शक्रदेवताकत्वोक्तेः ।

यत्तु [२६]नीलकण्ठेन शक्रदेवताकं ज्येष्ठानक्षत्रमिति व्याख्यातम्, तन्न । पुष्याज्ज्ये-ष्ठाया एकादशीत्वेन सप्तमाच्चापीति वचनस्योक्तिसम्भवाभावात् । केषांचिन्नक्षत्राणां क्षयकल्पनाद्यन्तविपर्यासकल्पना वा पुनर्बुद्ध्यारोहं नाङ्गीकुरुतः ।

ननु सूर्योपरागनिमित्त एव युद्धाभावः किमर्थमिह नोक्तः । किं तत्र प्रमाणमिति चेत्—

[२७]चतुर्दशीं पञ्चदशीं भूतपूर्वां च षोडशीम् ।
चन्द्रसूर्यावुभौ ग्रस्तावेकमासि त्रयोदशीम् ॥
अपर्वणि ग्रहेणैतौ प्रजाः संक्षययिष्यतः ॥

इति धृतराष्ट्रं प्रति व्यासवाक्यम् । अस्यार्थः—ह्रासे चतुर्दशीं भूतपूर्वां चन्द्रसूर्यौ ग्रस्तौ साम्ये पञ्चदशीम्, वृद्धौ षोडशीमिदानीं त्वपर्वण्येकमास्यतिह्रासवशात्—

२२. भीष्म०, अ० ५०-५५.

२३. कस्य स्मृतिग्रन्थस्य वचनमिदमिति न ज्ञायते । शब्दकल्पद्रुमे 'स्मृत्यन्तरे पठ्यते' इति निर्देशोऽपि न निश्चयेन ग्रन्थविशेषं बोधयति ।

२४. भीष्म०, अ० ५६-५९.

२५. उद्योग०, १४२।१८.

२६. द्र०—नैल०, भीष्म० १७।२.

२७. भीष्म० ३।२८-२९.
पूर्वश्लोकस्योत्तरार्धमिदम्—
'इमां तु नाभिजानामि अमावास्यां त्रयोदशीम्' इति । ग्रहेणेति स्थाने 'ग्रहौ' इति पाठः समीचीनः ।

[२८]त्रयोदशीग्रहेणैतौ प्रजाः संक्षययिष्यतः। इति सर्वत्र "कालाध्वनोरत्यन्तसंयोगे" (पा० अ० २।३।५) द्वितीया, सप्तम्या व्यत्ययाद् वा। अपर्वत्वं चौत्पातिकत्वात् पर्वणोऽप्रशस्तत्वाद् 'अपशवो वा अन्ये गोअश्वेभ्यः' इत्यत्रेव नञोऽप्रशस्तार्थकत्वात् सूर्याचन्द्रमसोरुभयोर्ग्रहणाभिधानत्वममावास्यायां चन्द्रमसः सूर्यप्रवेशमात्राभिप्रायेणेति [२९]सम्प्रदायः। [३०]अन्ये पुनरेवं व्याचक्षते–अमावास्यायामेव सूर्योदयात् प्राक् चतुर्दशीशेषे दृश्यमानायाश्चन्द्रकलाया ग्रास इह विवक्षितः इति। [३१]अपरे तु इहैकमासीत्युक्त्या याऽस्मादेव पूर्वस्मिन् शुक्लपक्षे त्रयोदश्यामन्तरेणैव क्षयं चन्द्रग्रहणमुत्तरपक्षत्रयोदश्यां च सूर्यग्रहणं ततश्चापर्वणीत्युक्तिर्यथाश्रुतैवेति व्याचक्षते—इदमपर्वग्रहणं द्विविधम्-राहुकृतं त्वष्टृकृतं च। तथा च [३२]कठश्रुतिः—"यत्रापर्वणि राहुग्रहणं तत्र नरपतेर्वधमादिशेद्"। इति।

रामायणे [३३]आरण्यकाण्डे—

सकवन्धः सपरिघः स्वर्भानुश्च दिवाकरम्।
जग्राह कालपर्यन्तमपर्वणि महाग्रहः॥ इति।

[३४]सभापर्वणि च—

'राहुरग्रसदादित्यमपर्वणि महाग्रहः' इति। तत्र यदा सूर्याचन्द्रमसो राहुणा सहैकराशिगतत्वं सप्तमराशिगतत्वं वा तदा राहुकृतम्, अन्यदा तु त्वष्टृकृतम्। यदुक्तं ज्योतिःपराशरविष्णु[३५]धर्मोत्तरयोः—

अपर्वणि शशाङ्कार्कौ त्वष्टा नाम महाग्रहः।
आवृणोति तमः श्यामः सर्वलोकविपत्तये॥

इति किं वैक इति चेद् उच्यते—चतुर्दशीं पञ्चदशीमिति समनन्तरप्रदर्शितवाक्यादेवास्य पक्षस्य त्रयोदशतिथ्यात्मकत्वनिश्चयात्तदीयामावास्यायाश्चतुर्दशीशेषानन्तरभावित्वनिरूपणादुपरागकालस्य प्रतिपत्सन्धेर्द्वितीयसूर्योदयकाले सत्त्वेन पूर्वदिने पुण्यकालाभावात्। ग्रस्तोदयवशात् प्रतिपदि प्रातरेव स्नानदानादिकं विधायानन्तरं युद्धप्रारम्भे दोषो नास्तीत्यन्यदेतत्। त्वष्टृकृतोपरागवशाद् दिवा वाऽमावास्यां (यायां) सूर्यादर्शनकल्पनेऽपि शास्त्रीयोपरागाभावात् पुण्यकालाभावः। अस्तु वोपरागनिमित्तोऽपि तद्दिने युद्धाभावो न तु तदुत्तरप्रतिपद्यपि युद्धाभावकल्पना युक्ता,

---

२८. 'त्रयोदशीम्, ग्रहावेतौ' इति पाठो दृश्यते (भीष्म० ३।२८-२९)।

२९. सम्प्रदाये प्रचलितोऽयमर्थः कुत्र लिखित इति न ज्ञायते।

३०. 'अन्ये' शब्देन लक्षिता व्याख्याकाराः के? इति नास्ति स्पष्टम्, तथापि बहूनां व्याख्यातॄणां विदुषामत्र सम्मतिर्विज्ञायते।

३१. अत्रापि 'अपरे' शब्देन लक्षिता विद्वांसो न स्पष्टं वक्तुं शक्यन्ते।

३२.

३३. २८।१०, अत्र कश्चित् पाठभेदः।

३४. सभा० ७१।२६.

३५.

अतश्चतुर्थयुद्धमनुराधा[36]युतायां शुद्धप्रतिपदि। द्वितीयायां ज्येष्ठानक्षत्रे [37]भ्रातृवधसन्तप्तस्य दुर्योधनस्यानुत्साहादयुद्धम्। रात्रौ च भीष्मसमीपे गमनम्।

तृतीयायां [38]मूलनक्षत्रे पञ्चमदिनयुद्धम्।

चतुर्थ्यां [39]पूर्वाषाढनक्षत्रे षष्ठदिनयुद्धम्।

पञ्चम्यामुत्त[40]राषाढनक्षत्रे भीमसेनेन गाढप्रहारैर्जर्जरीकृतशरीरस्य दुर्योधनस्यानुत्साहादयुद्धम्। भीष्मेण विशल्यकरण्यौषधदानाद् रुगपाकरणम्।

षष्ठ्यां श्रवण[41]नक्षत्रे सप्तमयुद्धम्।

सप्तम्यां [42]धनिष्ठानक्षत्रेऽष्टमयुद्धम्। अष्टम्यां शतभिषजि भ्रातृवधसंतप्तस्येरावद्[43]वधविषण्णानां पाण्डवानां चायुद्धम्। [44]दुर्योधनस्य रात्रौ पुनर्भीष्मसमीपे गमनम्।

[45]पूर्वाभाद्रपदासु नवम्यां नवमयुद्धम्। [46]उत्तरभाद्रपदासु दशम्यां भीष्मपराक्रमदर्शनाज्जयाशापराङ्मुखस्य युधिष्ठिरस्य वासुदेवेन सह पुनर्मन्त्रविचारो रात्रौ भीष्मान्तिके गमनम्, तद्वधोपायश्च।

वृद्धिवशाद् द्वितीयदशम्यां रेवतीनक्षत्रे [47]दशमयुद्धम्, [48]भीष्मपतनं च।

एकादश्यां कार्त्तिकस्य याचितं च जलं त्वया।
अर्जुनेन समानीता गङ्गा बाणस्य वेगतः॥
तुष्टानि तव गात्राणि तस्माद्य दिनात्रधि।
पूर्णान्तं सर्वलोकास्त्वां तर्पयन्त्वर्घदानतः॥

इति सनत्कुमारसंहितावाक्यादेकादश्यादिदिनपञ्चकं भीष्मस्यातृप्तिजलदान[49]-

---

३६. भीष्म०, अ० ६०-६४.
३७. भीष्म० ६४।८६-६८।२०.
३८. भीष्म०, अ० ६९-७४.
३९. भीष्म०, अ० ७५-७९.
४०. भीष्म० ८०।३-८१/११.
४१. भीष्म०, अ० ८१-८६.
४२. भीष्म०, अ० ८७-९६.
४३. 'भ्रातृवधसंतप्तस्य' इत्यस्यानन्तरं 'दुर्योधनस्य' इति पाठोऽवशिष्टः स चात्र नितरामावश्यकोऽर्थपूर्तये प्रतीयते। ८८ अध्याये सुनाभादीनां दुर्योधनभ्रातॄणां वधो वर्णितस्तेनेदं सर्वं संगच्छते। भीष्मपर्वणः ९० अध्यायेऽर्जुनपुत्रस्येरावतो राक्षसेन वधः कृतः।
४४. भीष्म०, अ० ९७-९८.
४५. भीष्म०, अ० ९८-१०७.
४६. भीष्म०, १०७।७-५६-१०७.
४७. भीष्म०, अ० १०८-११८.
४८. भीष्म०, ११९।२६-८७-१२२.
४९. भीष्म०, अ० १२१-१२२.

व्यासक्तत्वादर्जुनस्यायुद्धम्। तदेवमश्विन्यादिमृगशिरोऽन्तं पञ्चसु नक्षत्रेष्वतिक्रान्तेषु मार्गशीर्षकृष्णप्रतिपदि मृगशीर्षशेषे [५०]द्रोणाभिषेकः। युधिष्ठिरस्य ग्रहणे प्रतिज्ञानं च द्रोणस्य।

द्वितीयायामार्द्रायुतायामेकादशं[५१] युद्धम्। [५२]तृतीयायां पुनर्वस्वोर्युधिष्ठिराग्रहणखिन्नस्य द्रोणस्यानुत्साहादयुद्धम्। अर्जुनस्य संग्रामाद् दूरेऽपनयनाय संशप्तकोद्योजनं तेषां शपथाश्च। चतुर्थीपञ्चम्योः [५३]पुष्याश्लेषायुतयोर्यावद् दूरमपनीतोर्जुनः प्रत्यावृत्य युधिष्ठिरं रक्षितुं न शक्नुयात् तावद्दूरे यन्त्रादिप्रधानसैन्यस्य प्रथमतः प्रस्थापनम्।

---

५०. द्रोण०, अ० ६-७.
५१. द्रोण०, अ० १२-१६.
५२. द्रोण०, अ० १७.
५३. द्रोण०, अ० १७.

परिशिष्टम्

पृ० १, टि० १. भगवतः कृष्णस्य प्रयाणम्

कौमुदे मासि रेवत्यां शरदन्ते हिमागमे।
स्फीतसस्ययुते काले कल्पः कल्पवतां वरः ॥
(मभार०-उद्योग० ८१।७)

पूनास्थभण्डारकरप्राच्यविद्याशोधसंस्थानीयसंस्करणे महाभारतस्य बहूनि पाठान्तराणि दृश्यन्ते। यथा—कामदे, कार्त्तिके, स्फीतसस्यसुखे काले कल्यः सत्त्ववतां वरः।

(टि०—उत्थानैकादशीपूर्वदशम्यामाश्विनकृष्णषष्ठ्यामिति विमलबोधपादाः)।

नैल०

कौमुदे कार्त्तिके रेवत्यामर्जुनस्य फल्गुनीजातस्य रेवती मैत्रतारा भवतीति प्रसिद्धम्।

मैत्रशब्दस्य पूर्वस्मिन श्लोके पाठो दृश्यते—

ततो व्यपेततमसि सूर्ये विमलवद्गते।
मैत्रे मुहूर्ते सम्प्राप्ते मृद्वर्चिषि दिवाकरे ॥ (८१।६)

नैल०

विमलवद्गते निर्मलाकाशगे मैत्रे जन्मर्क्षादष्टमतारायां दूतस्य हि स्वामिबलेनैव बलवत्त्वमित्यर्थः।

पृ० १, टि० ३. कन्यातुलयोः शरदृतुः

वसन्तर्तुर्मीनराशिस्थितसूर्यकालादारभ्यते चैत्रमासे, एवं मीनमेषयोर्वसन्तर्तुः वृषमिथुनयोर्ग्रीष्मर्तुः, कर्कसिंहयोर्वर्षर्तुः कन्या-तुलयोश्च शरदृतुर्वर्तते।

टि० ४-५. सर्वज्ञनारायणो नीलकण्ठश्च

'भारतार्थप्रकाश' नाम्नी टीका सर्वज्ञनारायणकृता, 'भारतभावदीप' नाम्नी च नीलकण्ठकृता दृश्यते, तत्र भारतभावदीपः १९३१ तमे क्रैस्ताब्दे पूनातः प्रकाशित उपलभ्यते, सर्वज्ञनारायणस्य नारायणसर्वज्ञस्य वा भारतार्थप्रकाशो नाद्यावधि प्रकाशनपथमानीतः, तथापि महाभारतानुशीलनपरा विद्वांसोऽनेकशस्तदीयवचनानि उद्धरन्ति। एवमप्रकाशितत्वान्न सा सुलभेति तदीयं वचनमत्रोद्धर्तुं न शक्यते। यद्यपि सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीय-सरस्वतीभवने उद्योग-भीष्म-शान्ति-स्वर्गारोहण-प्रभृतीनां केषांचित् पर्वणां टीकायास्तस्या हस्तलेखाः सन्ति सुरक्षितास्तथापि उद्योग-पर्वणोऽल्पांशे एव टीका सा दृश्यते हस्तलेखे।

भारतभावदीपटीकाया वचनं तु पूर्वं संबद्धश्लोके (टि० १) उपन्यस्तम्, तत्र कौमुदशब्दः कार्त्तिकार्थपरो व्याख्यातः, परं कौमुदशब्दस्य व्युत्पत्तिर्न दृश्यते।

टि० ६. लोहाभिसारः

युधिष्ठिरं प्रति युद्धसन्देशकथनप्रसङ्गे दुर्योधनस्य उलूकं प्रति वचनम्—

लोहाभिहारो निर्वृत्ततः कुरुक्षेत्रमकर्दमम् ।
पुष्टास्तेऽश्वा भृता योधाः श्वो युध्यस्व सकेशवः ॥
(मभार०-उद्योग० १५७।१८)

उलूकस्य वचने तु किञ्चित् पाठान्तरं वर्तते—

लोहाभिहारो निर्वृत्तः कुरुक्षेत्रमकर्दमम् ।
समः पन्था भृता योधाः श्वो युध्यस्व सकेशवः ॥
(मभार०-उद्योग० १५८।११)

अस्मिन् हस्तलेखे 'लोहाभिसार' इति पाठः सम्मतः । लोहं शस्त्रम्, अभिसार्यते प्रस्थाप्यतेऽत्रेति घञ् (करणाधिकरणयोश्च ३।३।११७) । अमरकोशादौ (२।८।९४) तु 'लोहाभिहार' इति प्रायेण पठ्यते—

लोहाभिहारोऽस्त्रभृतां राज्ञां नीराजनाविधिः ।

"लोहानामभिहारो यत्र । शस्त्रभृतां राज्ञां नीराजनाविधिः इत्यमरः । महानवमीदीक्षायामश्वादीनां नीराजने सति पश्चात् शस्त्रधारिणां राज्ञां यः शास्त्रोक्तो निर्मञ्छनप्रधानो विधिः प्रस्थानात् प्राक् स लोहाभिहारः । लोहस्य शस्त्रस्य अभिहारः । सर्वतो हरणमत्रेति बहुव्रीहिः । 'लोहाभिहार इत्युक्तो विधिर्नीराजनोत्तरः' इत्यमरमाला । 'लोहोऽस्त्री शस्त्रके लौहे' इति मेदिनी । ········ वाहनायुधादेर्निःशेषेण राजनं यत्र सा नीराजना, नीरस्य शान्त्युदकस्य अजनं क्षेपो यत्र सा नीराजना वा इति भरतः" इति शब्दकल्पद्रुमः ।

नंल०

लोहाभिसारः शस्त्राणां नीराजनादिकम्, तेषु मन्त्रेण देवतावाहनादिकं च । अकर्दममिति युद्धयोग्यत्वं भूमेरुक्तम् । (उद्योग० १६०।९३)

टि० ७. उलूकस्य परिचयः

शकुनिपुत्र उलूकः 'कैतव्य' इति नाम्नाऽपि व्यवह्रियते । अर्जुन-नकुल-सहदेवैः सह पृथग् युद्धमभूत्, सहदेवेनायं निपातितः ।

सेनानिवेशं संप्राप्तः कैतव्यः पाण्डवस्य ह ।
उलूक न भयं तेऽस्ति ब्रूहि त्वं विगतज्वरः ।
यन्मतं धार्तराष्ट्रस्य लुब्धस्यादीर्घदर्शिनः ॥ (उद्योग० १६१।१, ३)

उलूकस्तत आगम्य दुर्योधनममर्षणम् ।
अर्जुनस्य समादेशं यथोक्तं सर्वमब्रवीत् ॥ (उद्योग० १६३।५१-५२)

प्रेक्षतां प्रीतिजननं सिद्धचारणसेवितम् ।
उलूकस्तु महेष्वासं नकुलं युद्धदुर्मदम् ॥ (शल्य० २२।२८)

ततोऽस्यापततः शूराः सहदेवः प्रतापवान् ।
उलूकस्य महाराज भल्लेनापाहरच्छिरः ॥
स जगाम रथाद् भूमिं सहदेवेन पातितः ।
रुधिराप्लुतसर्वाङ्गो नन्दयन् पाण्डवान् युधि ॥ (शल्य० २८।३२-३४)

टि० ८. कृष्णप्रयाणदिवसः

'इदं च' इत्यनेन 'कौमुदे मासि' इति परामृश्यते । तत्र नीलकण्ठः—'कार्त्तिकशुक्लद्वादश्यां रेवत्यां कृष्णप्रयाणम्' इति व्याचष्टे (द्र०—भीष्म० १७।२)। अयं च ग्रन्थकारः—'आश्विनमासस्य शुद्धद्वादश्यनन्तरत्रयोदश्यां रेवत्यां कृष्णप्रयाणं मनुते ।

टि० ९. दुर्योधनस्यादेशः सेनायाश्च प्रयाणम्

आज्ञापयच्च राज्ञस्तान् पार्थिवान्नष्टचेतसः ।
प्रयाध्वं वै कुरुक्षेत्रं पुष्योऽद्येति पुनः पुनः ॥ (मभार०, उद्योग० १५०।३)
ततस्ते पृथिवीपालाः प्रययुः सहसैनिकाः ।
भीष्मं सेनापतिं कृत्वा संहृष्टाः कालचोदिताः ॥ ४ ।

नैल०

पुष्योऽद्येति । पुष्यनक्षत्रं हि अश्विन्याः पौर्णमास्या उपरि अष्टम्यां भवति । पूर्वमपि—'सप्तमाद् दिवसादूर्ध्वममावास्या भविष्यति, संग्रामं योजयेत् तस्याम्' इत्युक्तत्वात् ।

टि० १०. उपप्लव्यम्

उपप्लव्यम् = विराटराज्यस्यैकमुपनगरम्—"उपप्लव्यं विराटस्य" (मभार०-विराट० ७२।१४) ।

ग्रन्थकारोऽयं शत्रुराज्यावस्कन्दनाय तत्क्षणनिर्मिते उपकार्याप्राये परित्यागसमयविनाशनयोग्ये प्रदेशे रूढं मनुते उपप्लव्यशब्दम् । तदिदमुपप्लव्यनगरं महाभारते बहुत्र उद्धृतम् । तथाहि—

उपप्लव्ये निविष्टेषु पाण्डवेषु जिगीषया । (१।२।२१८)
आगम्य हास्तिनपुरादुपप्लव्यम् । (१।२।२३७)
उपप्लव्यं स गत्वा । (५।८।२५)
पाण्डुपुत्रान् उपप्लव्ये । (५।२२।१)
उपप्लव्यं ययौ द्रष्टुं पाण्डवानमितौजसः । (५।२३।१)
उपप्लव्यादथागम्य । (५।८४।१८)
उपप्लव्यादिह क्षत्तरुपयातो जनार्दनः । (५।८६।१)
उपप्लव्यं शार्ङ्गधन्वानम् (५।१३७।३२) ।
उपप्लव्ये निविष्टोऽपि धर्ममेव युधिष्ठिरः । (५।१४४।४)
आगम्य हास्तिनपुरादुपप्लव्यमरिन्दमः । (५।१४७।१)
उपप्लव्ये महर्षिर्मे कृष्णद्वैपायनोऽब्रवीत् । (९।६२।३१)

२

उपप्लव्यं गता सा तु श्रुत्वा सुमहदप्रियम् । (१०।११।५)
यदैवाकृतकामस्त्वमुपप्लव्यं गतः पुनः । (११।२५।३४)

नैल०

उपप्लव्यं विराटनगरसमीपस्थनगरान्तरम् । (विराट० ७२।१४)
उपप्लव्यं विराटनगरस्य प्रदेशविशेषम् । (उद्योग० ८।२५)
उपप्लव्याद् ग्रामात् । (उद्योग० ८४।१८)
उपप्लव्यं विराटनगरम् । (उद्योग० १३७।३२)
उपप्लव्ये विराटनगरे । (उद्योग० १४४।४)

टि० ११. बलभद्रस्य तीर्थयात्राया आरम्भस्समाप्तिश्च

चत्वारिंशदहान्यद्य द्वे च मे निःसृतस्य वै ।
पुष्येण सम्प्रयातोऽस्मि श्रवणे पुनरागतः ।
शिष्ययोर्वै गदायुद्धं द्रष्टुकामोऽस्मि माधव ॥ (शल्य० ३३।५)

नैल०

चत्वारिंशदहान्यद्य द्वे च मे निःसृतस्य वै ।
पुष्येण सम्प्रयातोऽस्मि श्रवणे पुनरागतः ॥ इति ।

ननु श्रवणेऽत्र युद्धसमाप्तिर्दृश्यते तदनुपातेन युद्धारम्भो मृगशीर्षे भवितुं युज्यते, अष्टादशाहानि युद्धमभूदिति वचनात् । एवं च युद्धारम्भं प्रकृत्य भीष्मपर्वणि सञ्जयवाक्यम्—'मघाविषयगस्सोमस्तद्दिनं प्रत्यपद्यत' इति मघायां युद्धारम्भप्रदर्शकं विरुध्यते । तथात्वे रेवत्यां युद्धसमाप्त्यापत्तेरित्युपक्रमोपसंहारयोर्विरोधो दुःसमाधेय इति चेत्, सत्यम् । उपसंहारस्य निर्णीतार्थकत्वात् तदनुरोधेनोपक्रमस्य नेयत्वान्मघाविषयग इत्यस्यायमर्थः—अत्र मघाशब्देन तत्सहचराः पितरो लक्ष्यन्ते 'मघानक्षत्रं पितरो देवता' इति श्रुतेरिति मघायां पितृसम्बन्धित्वावधारणात् । तेन युद्धे मृतानामुत्तमदेहप्रदानार्थं चन्द्रस्तदा पितृलोके सन्निहितोऽभूदिति । स्वर्गिणां दिव्यदेहलाभश्चन्द्राधीन इति शास्त्रप्रसिद्धम् । युद्धारम्भस्तु मृगशीर्षे इति भीष्मपर्वणि निपुणतरमुपपादितं तन्न विस्मर्तव्यम् । (शल्य० ३३।५)

ततो मन्युपरीतात्मा जगाम यदुनन्दनः ।
तीर्थयात्रां हलधरः सरस्वत्यां महायशाः ॥
मैत्रनक्षत्रयोगे स्म सहितः सर्वयादवैः ।
आश्रयामास भोजस्तु दुर्योधनमरिन्दमः ॥
युयुधानेन सहितो वासुदेवस्तु पाण्डवान् ।
रौहिणेये गते शूरे पुष्येण मधुसूदनः ॥ (शल्य० ३५।१३-१५)

नैल०

मैत्रनक्षत्रयोगे अनुराधायाम् । (१४)
पुष्येण हि पाण्डवेभ्यः प्रयाणमनुराधातस्तीर्थयात्रार्थमिति विवेकः । (१५)

टि० १२. बलरामयात्रा रुक्म्यागमनं च

एवमुक्त्वा महाबाहुरनुज्ञातश्च पाण्डवैः ।
तीर्थयात्रां ययौ रामो निवर्त्य मधुसूदनम् ॥ (उद्योग० १५७।३५)
एतस्मिन्नेव काले तु भीष्मकस्य महात्मनः ।
हिरण्यरोम्णो नृपतेः साक्षादिन्द्रसखस्य वै ॥
आकृतीनामधिपतिर्भोजस्यातियशस्विनः ।
दाक्षिणात्यपतेः पुत्रो दिक्षु रुक्मीति विश्रुतः ॥ (उद्योग० १५८।१-२)

टि० १३. उभयोः सेनयोः कुरुक्षेत्रप्राप्तिः

परिवार्य ययुः सर्वे वासुदेवधनञ्जयौ ॥
आसाद्य तु कुरुक्षेत्रं व्यूढानीकाः प्रहारिणः ।
पाण्डवाः समदृश्यन्त नर्दन्तो वृषभा इव ॥ (उद्योग० १५१।६७-६८)
प्रयाणं घुष्यतामद्य श्वोभूत इति मा चिरम् ।
ते तथेति प्रतिज्ञाय श्वोभूते चक्रिरे तथा ॥ (उद्योग० १५३।१७)

टि० १४. उलूकस्य दूत्यम्

उद्योगपर्वणि १६० तमेऽध्याये पाण्डवान् प्रति दुर्योधनेन उलूकस्य दूतरूपेण प्रेषणम्—

आहूयोपह्वरे राजन्नुलूकमिदमब्रवीत् ।
उलूक गच्छ कैतव्य पाण्डवान् सहसोमकान् ॥ ६ । इत्यादिवचनैः ।
१६१-६२ तमयोरध्याययोरुलूकेन सन्देशकथनं युधिष्ठिरादीन् प्रति—
सेनानिवेशं संप्राप्तः कैतव्यः पाण्डवस्य ह ।
समागतः पाण्डवेयैर्युधिष्ठिरमभाषत ॥ १ । इत्यादिवचनैः ।
१६३ तमेऽध्याये गुडाकेशादिभिः प्रतिवचनप्रदानम्—
दुर्योधनस्य तद् वाक्यं निशम्य भरतर्षभ ।
नेत्राभ्यामतिताम्राभ्यां कैतव्यं समुदैक्षत ॥ १ ।
स केशवमभिप्रेक्ष्य गुडाकेशो महायशाः ।
अभ्यभाषत कैतव्यं प्रगृह्य विपुलं भुजम् ॥ २ । इत्यादिना ।
१६४ तमेऽध्याये युधिष्ठिरेण सेनानिर्यापणम् ।
१६५ तमेऽध्याये दुर्योधनभीष्मसंवादः ।

टि० १५

१६६-६८ अध्यायेषु भीष्मेण रथातिरथसंख्यानम् ।

टि० १६. कौरवपाण्डवसैन्यप्रमापणप्रश्नः

सञ्जय उवाच—
प्रभातायां तु शर्वर्यां पुनरेव सुतस्तव ।
मध्ये सर्वस्य सैन्यस्य पितामहमपृच्छत ॥ (उद्योग० १९३।१)

टि० १७. सेनाया युद्धार्थं सन्नाहः

वैशम्पायन उवाच—
ततः प्रभाते विमले धार्तराष्ट्रेण चोदिताः।
दुर्योधनेन राजानः प्रययुः पाण्डवान् प्रति ॥ (उद्योग० १९५।१)

टि० १८ कुरुक्षेत्रे राज्ञामुपस्थितिः

यथा स भगवान् व्यासः कृष्णद्वैपायनोऽब्रवीत्।
तथैव सहिताः सर्वे समाजग्मुर्महीक्षितः ॥१।
मघाविषयगः सोमस्तद्दिनं प्रत्यपद्यत।
दीप्यमानाश्च सम्पेतुर्दिवि सप्त महाग्रहाः ॥२। (भीष्म०, अ० १७)

नेल०

'मघाविषयगः सोमस्तद्दिनं प्रत्यपद्यत' इति मघा पित्र्यं नक्षत्रं तस्य विषयो देशः पितृलोकस्तद्गतः सोमः कुरुपाण्डवयुद्धारम्भदिनमुक्तं भारतसावित्र्याम्—

हेमन्ते प्रथमे मासि शुक्लपक्षे त्रयोदशीम्।
प्रवृत्तं भारतं युद्धं नक्षत्रे यमदैवते ॥

प्रथमे मार्गशीर्षे अत्र त्रयोदशीशब्देन तद्युक्ता चतुर्दश्येव ग्राह्या। 'अर्जुनेन हतो भीष्मो माघमासेऽसिताष्टमी' इति, 'त्रयोदश्यां तु मध्याह्ने भारद्वाजो निपातितः' इति तत्रैव युद्धस्य दशमे पञ्चदशे चाह्नि हतयोर्भीष्मद्रोणयोरष्टमीत्रयोदशीसंयोगदर्शनात्।

अत्र पौषेऽपि माघशब्दो मकरायनाभिप्रायेण तदानीं तत्सम्भवाद् असिताष्टमीति च्छेदः। अन्यथा सप्तमी-द्वादश्योरेव तयोर्हननं प्राप्नोति। यत्तु अमावास्यायां दुर्योधनहननं तत्रैवोक्तम्, तत्राप्यमावास्याशब्द इष्टिदिने प्रतिपद्येव प्रयुक्तो वेदितव्यः। 'यमदैवते' इति भरणी न ग्राह्या, किं तु युग्मदैवतं मृगशीर्षमेव ग्राह्यम्। तस्य हि पूर्वदलं शुक्रदैवत्यत्वादासुरमुत्तरार्धं बुधदैवत्यत्वाद् दैवं तेन तत्रासुराणामुपरमो देवानामभ्युदयश्च सिध्यति। किं च—

चत्वारिंशदहान्यद्य द्वे च मे निःसृतस्य वै।
पुष्येण सम्प्रयातोऽस्मि श्रवणे पुनरागतः ॥

इति युद्धारम्भादष्टादशेऽह्नि तीर्थयात्रात आगतस्य बलदेवस्य वचनात् श्रवणे युद्धसमाप्तिर्दृश्यते। ततः प्राचीनेऽष्टादशर्क्षे मृगशीर्ष एव युद्धारम्भः सम्भवति, न त्वेकविंशे। भरण्यामष्टादशदिनमध्ये नक्षत्रत्रयक्षयस्य कल्पयितुमयुक्तत्वात्। कार्त्तिकीकृत्तिकायोगानुपातेन चतुर्दश्यां मृगस्यैव सम्भावनाच्च। एतेन युद्धारम्भं प्रकृत्य 'मघाविषयगः सोमस्तद्दिनं प्रत्यपद्यत' इति भीष्मपर्वणि सञ्जयवाक्यान्मघायां युद्धारम्भ इत्यपि निरस्तम्, बलदेववाक्यविरुद्धत्वात्। शब्दार्थस्तु मघापदेन तत्सहचराः पितरो लक्ष्यन्ते, तेन युद्धे मृतानामुत्तमदेहप्रदानार्थं चन्द्रस्तदा पितृलोके सन्निहितोऽभूदिति स्वर्गिणां दिव्यदेहलाभश्चन्द्राधीन इति शास्त्रप्रसिद्धेः। तथा द्वादश्यां रात्रियुद्धे

चन्द्रोदयकाले 'त्रिभागमात्रशेषायां रात्रौ युद्धमवर्तत' इत्युक्तं तत्र त्रिभागेत्यस्य त्रिमुहूर्तशेषायामित्यर्थः। तथा-'अष्टपञ्चाशतं रात्र्यः शयानस्याद्य मे गताः' इति भीष्मवचनं तु माघोऽयं समनुप्राप्तः, त्रिभागमात्रः पक्षोऽयमिति वाक्यशेषानुसारात्। अशतं शतहीनं यथा स्यात् तथा अष्टपञ्च अष्टपञ्चाशद् रात्रयो व्यतीता इति व्याख्येयम्। विलोमशोधनाद् अष्टपञ्चाशदूनं शतं रात्रयो द्वाचत्वारिंशद् रात्रयो व्यतीता इत्यर्थः। तथा च पौषकृष्णाष्टमीतो माघशुक्लपञ्चम्यां तावती दिनसंख्या पूर्यते, पक्षस्य च तृतीयो भागो गतो भवति, तत्राप्येकतिथिक्षयात्। पञ्चम्या द्विचत्वारिंशत्तमत्वं ज्ञेयम्। शेषो भवितुमर्हतीत्यत्र कार्यशेषो देहत्यागादिरेव शेषः, न तु पक्षशेष इति व्याख्या ज्ञेया।

तत्रायं निष्कर्षः—कार्त्तिकशुक्लद्वादश्यां रेवत्यां कृष्णप्रयाणम्, ततो मार्गशीर्षकृष्णपञ्चम्यां पुष्ये सेनयोर्निर्याणम्, ततः पञ्चम्या उपरि षष्ठीमारभ्य सप्त दिनानि गणयित्वा तदुपर्यष्टमेऽह्नि अमावास्या भविष्यतीत्यनेन त्रयोदशदिनात्मकोऽयं कृष्णपक्षो महोत्पातजनक इति सूचितम्। क्षीणयोश्च तिथ्योः पक्षान्तरे पुनर्वृद्ध्या संख्यापूरणं भवतीति मार्गशीर्षकृष्णपञ्चमीमारभ्य पौषशुक्लप्रतिपद् द्विचत्वारिंशी तिथिर्भवतीति बलदेववाक्योक्ता दिनसंख्या नक्षत्रसंख्या चानुगृहीता भवति। यत्तु—

सप्तमाच्चापि दिवसादमावास्या भविष्यति।
संग्रामं योजयेत् तत्र तां ह्याहुः शक्रदैवताम्॥

"प्रयाध्वं वै कुरुक्षेत्रं पुष्योऽद्येति पुनः पुनः"। इति दुर्योधनवाक्यम्। तत्र संग्राममित्यनेन संग्रामे जयसाधनं धाराबन्धादिकं तस्यां योजयेदित्युक्तम्। शक्रदैवतामित्यनेन तस्यां ज्येष्ठानक्षत्रयोग उच्यते, स च तिथिद्वयक्षयात् तत्रासम्भवन्नपि तत्र तिथिवदेव नक्षत्रक्षपाद् वा तिथिनक्षत्रयोराद्यन्तयोगाद् वा ज्ञेयमिति सर्वं समञ्जसम्।

महाग्रहा राहुकेत्वोरुपग्रहत्वात् सप्तैव। (भीष्म० १७।२)

टि० १९. अर्जुनस्य सम्मोहः, भगवतश्च प्रोत्साहनम्

भीष्मपर्व, अ० २५.

टि० २०.

ज्ञानकर्मादिरुपदेशः, भीष्मपर्व, अ० २५-३४.
विश्वरूपदर्शनम्, अ० ३५.
पुनः प्रोत्साहनम्, अ० ३५-४२.
युद्धप्रारम्भः, अ० ४४,
पूर्वाह्णयुद्धम्, अ० ४५-४६ (द्वन्द्वयुद्धम्, सङ्कुलयुद्धम्)।
अपराह्णयुद्धम्, अ० ४७, श्वेतयुद्धम्। अ० ४८, श्वेतवधो भीष्मस्य ब्रह्मास्त्रेण।
अ० ४९, शङ्खयुद्धम्।
युधिष्ठिरसैन्यस्य भङ्गः, प्रथमदिवसावहारश्च। (अ० ४९.)
ततो भीष्मः शान्तनवो नित्यं मण्डलकार्मुकः।
मुमोच बाणान् दीप्ताग्रानहीनाशीविषानिव ॥५०।

शरैरेकायनीकुर्वन् दिशः सर्वा यतव्रतः ।
जघान पाण्डवरथानादिश्यादिश्य भारत ॥५१।
ततः सैन्येषु भग्नेषु मथितेषु च सर्वशः ।
प्राप्ते चास्तं दिनकरे न प्राज्ञायत किञ्चन ॥५२।
भीष्मं च समुदीर्यन्तं दृष्ट्वा पार्था महाहवे ।
अवहारमकुर्वन्त सैन्यानां भरतर्षभ ॥५३।

टि० २१. युधिष्ठिरस्य मन्त्रविचारणा

भीष्मपराक्रमेण स्वसैन्यविनाशेन चिन्तितस्य युधिष्ठिरस्य श्रीकृष्णपार्श्वे गमनम्, भगवता कृष्णेन सह मन्त्रणा च । (भीष्म०, अ० ५०) ।

टि० २२. द्वितीयदिवसस्य युद्धम्

पूर्वफल्गुनीनक्षत्रस्य निर्देशो नास्ति, तथापि सेनाप्रयाणप्रसङ्गे मघानक्षत्रमुक्तम्, तदनन्तरं 'सूर्योदये सञ्जय के नु पूर्वम्' (अ० ५०।१) इति धृतराष्ट्रवचनाद् द्वितीयं दिनमुपस्थितमिति ज्ञायते । एतेन मघानन्तरं द्वितीये दिवसे पूर्वफल्गुनी प्रवृत्तेति वक्तुं शक्यते । तस्मिन् दिवसे युद्धं नाभूत् । सायं युधिष्ठिर-कृष्णयोः परस्परं मन्त्रणा । क्रौञ्चव्यूहनिर्माणं च (अ० ५०-५१) ।

द्वितीययुद्धदिवसे कलिङ्गराजवधो भीमेन । (अ० ५४)

द्वितीययुद्धदिवसावहारः—

एवमुक्त्वा ततो भीष्मो द्रोणमाचार्यसत्तमम् ।
अवहारमथो चक्रे तावकानां महारथः ॥४१।
ततोऽवहारः सैन्यानां तव तेषां च भारत ।
अस्तं गच्छति सूर्येऽभूत् सन्ध्याकाले च वर्तति ॥४३। (भीष्म०, अ० ५५)

टि० २४. तृतीययुद्धदिवसः

सञ्जय उवाच,
प्रभातायां च शर्वर्यां भीष्मः शान्तनवस्तदा ।
अनीकान्यनुसंयाने व्यादिदेशाथ भारत ॥ (अ० ५६।१)
अ० ५६, परस्परव्यूहरचना तृतीययुद्धदिवसे ।
अ० ५७, संकुलयुद्धं तृतीययुद्धदिवसे ।

तृतीययुद्धदिवसावहारः

विनेदतुस्तावतिहर्षयुक्तौ गाण्डीवधन्वा च जनार्दनश्च ।
ततो रविं संवृतरश्मिजालं दृष्ट्वा भृशं शस्त्रपरिक्षताङ्गाः ॥
स्वबाहुवीर्येण जिताः सभीष्माः किरीटिना लोकमहारथेन ।
इति ब्रुवन्तः शिबिराणि जग्मुः सर्वे गणा भारत ये त्वदीयाः ॥

(अ० ५९।१३१, १३८)

टि० २५. कर्णं प्रति भगवद्वाक्यम्

सप्तमाच्चापि दिवसादमावास्या भविष्यति ।
संग्रामो युज्यतां तस्यां तामाहुः शक्रदेवताम् ॥ (उद्योग० १४२।१८)

नैल०

संग्रामः संग्रामसाधनकलापः युज्यताम् एकीभूयावतिष्ठतां संग्रामारम्भस्तु दिनान्तरे एवेति वक्ष्यते ।

टि० २६. 'शक्रदेवताम्' पदस्यार्थो:

तत्र संग्रामम् इत्यनेन संग्रामे जयसाधनं धाराबन्धादिकं तस्यां योजयेदित्युक्तम् । शक्रदैवतामित्यनेन तस्यां ज्येष्ठानक्षत्रयोग उच्यते, स च तिथिद्वयक्षयात् तत्रासम्भवन्नपि तत्र तिथिवदेव नक्षत्रक्षयाद् वा तिथिनक्षत्रयोराद्यन्तयोगाद् वा ज्ञेयमिति सर्वं समञ्जसम् (नैल०, भीष्म० १७।२) ।

टि० २७. अपर्वणि ग्रहणम्

चतुर्दशीं पञ्चदशीं भूतपूर्वां च षोडशीम् ।
इमां तु नाभिजानामि अमावास्यां त्रयोदशीम् ॥
चन्द्रसूर्यावुभौ ग्रस्तावेकमासि त्रयोदशीम् ।
अपर्वणि ग्रहावेतौ प्रजाः संक्षपयिष्यतः ॥ (भीष्म० ३।२८-२९)

टि० ३२. तथा च कठश्रुतिः

कठश्रुत्युपनिषद उद्धरणानि यत्र तत्र प्राप्यन्ते, परं सा मोतीलाल-बनारसीदास-प्रकाशिते उपनिषत्संग्रहे, मद्रासस्थ—अड्यारपुस्तकालयात् प्रकाशिते 'अप्रकाशिता उपनिषदः' इति ग्रन्थे च मया मुद्रिता नोपलब्धा ।

टि० ३४. अपर्वणि ग्रहणम्

एवं तेषु नराग्र्येषु निर्यत्सु गजसाह्वयात् ।
अनभ्रे विद्युतश्चासन् भूमिश्च समकम्पत ॥
राहुरग्रसदादित्यमपर्वणि विशां पते ।
उल्का चाप्यपसव्यं तु पुरं कृत्वा व्यशीर्यत ॥
एवमेते महोत्पाता वनं गच्छति पाण्डवे ।
भारतानामभावाय राजन् ! दुर्मन्त्रिते तव ॥ (सभा० ७१।२५-२८)

टि० ३६. चतुर्थदिवसीययुद्धम्

सञ्जय उवाच—

व्युष्टां निशां भारत ! भारतानामनीकिनीनां प्रमुखे महात्मा ।
ययौ सपत्नान् प्रतिजातकोपो वृतः समग्रेण बलेन भीष्मः ॥
(भीष्म० ६०।१)

६१ अध्याये सांयमनिपुत्रस्य वधो धृष्टद्युम्नेन ।
६२ अध्याये भीमस्य युद्धम्, गजानीकस्य वधश्च ।
६३ अध्याये सात्यकिभूरिश्रवःसमागमः ।
६४ अध्याये भीम-भीमरथादीनां धृतराष्ट्रपुत्राणां वधः ।

चतुर्थदिवसीययुद्धावहारः

भीष्मः शान्तनवो भूयो भारद्वाजमभाषत ।
न रोचते मे संग्रामो हैडिम्बेन दुरात्मना ॥ ७४ ।
बलवीर्यसमाविष्टः ससहायश्च साम्प्रतम् ।
नैष शक्यो युधा जेतुमपि वज्रभृता स्वयम् ॥ ७५ ।
तन्न मे रोचते युद्धं पाण्डवैर्जितकाशिभिः ।
घुष्यतामवहारोऽद्य श्वो योत्स्यामः परैः सह ॥ ७७ ।
प्रयाताः शिविरायैव निशाकाले परन्तप । ८६ । (भीष्म०, अ० ६४)

टि० ३७. भ्रातृवधसंतप्तो दुर्योधनः

दुर्योधनस्तु नृपतिर्दीनो भ्रातृवधेन च ॥ ८६ ।
मुहूर्तं चिन्तयामास वाष्पशोकसमाकुलः ।
ततः कृत्वा विधिं सर्वं शिविरस्य यथाविधि ।
प्रदध्यौ शोकसन्तप्तो भ्रातृव्यसनकर्शितः ॥ ८७ । (भीष्म० अ० ६४)
६५ अध्याये दुर्योधनस्य निशाकाले भीष्मपार्श्वे गमनं तयोः संवादश्च ।
६६-६७ अध्याययोर्विश्वोपाख्यानश्रावणं भीष्मेण दुर्योधनाय ।
६८ अध्याये दुर्योधनभीष्मसंवादः—
एवमुक्त्वा तव पिता तूष्णीमासीद् विशाम्पते ।
व्यसर्जयच्च राजानं शयनं च विवेश ह ॥ १९ ।
राजा च शिविरं प्रायात् प्रणिपत्य महात्मने ।
शिश्ये च शयने शुभ्रे रात्रिं तां भरतर्षभ ॥ २० ।

टि० ३८. पञ्चमदिवसीययुद्धम्

सञ्जय उवाच—

व्युषितायां तु शर्वर्यामुदिते च दिवाकरे ।
उभे सेने महाराज ! युद्धायैव समीयतुः ॥ (भीष्म० ६९।१)
७०–७१ अध्याययोः संकुलयुद्धम् ।
७२–७३ अध्याययोर्द्वन्द्वयुद्धम् ।

पञ्चमदिवसीययुद्धावहारः

एतस्मिन्नेव काले तु सूर्येऽस्तमुपगच्छति ।
सर्वेषां चैव सैन्यानां प्रमोहः समजायत ॥ (७४।३६)

अवहारं ततश्चक्रे पिता देवव्रतस्तव।
सन्ध्याकाले महाराज सैन्यानां श्रान्तवाहनः ॥ ३७।
पाण्डवानां कुरूणां च परस्परसमागमे।
ते सेने भृशसंविग्ने ययतुः स्वं निवेशनम् ॥ ३८।
ततः स्वशिबिरं गत्वा न्यविशंस्तत्र भारत।
पाण्डवाः सृञ्जयैः सार्धं कुरवश्च यथाविधि ॥ ३९।

टि० ३९. षष्ठदिवसीययुद्धम्

सञ्जय उवाच—

ते विश्रम्य ततो राजन् सहिताः कुरुपाण्डवाः।
व्यतीतायां तु शर्वर्यां पुनर्युद्धाय निर्ययुः ॥ (भीष्म० ७५।१)
एवमेतं महाव्यूहं व्यूह्य भारत! पाण्डवाः।
सूर्योदये महाराज पुनर्युद्धाय दंशिताः ॥ १३।
७६ अध्याये धृतराष्ट्रस्य चिन्ता।
७७–७८ अध्याययोः संकुलयुद्धम्, द्रोणपराक्रमश्च।

षष्ठदिवसावहारः

अन्योऽन्यागस्कृतां राजन् यमराष्ट्रविवर्धनम्।
मुहूर्तास्तमिते सूर्ये चक्रुर्युद्धं सुदारुणम् ॥ ६०।
एवं भित्त्वा महेष्वासः पाण्डवानामनीकिनीम्।
कृत्वाऽवहारं सैन्यानां ययौ स्वशिबिरं नृप ॥ ६३।
धर्मराजोऽपि संप्रेक्ष्य धृष्टद्युम्नवृकोदरौ।
मूर्ध्नि चैतावुपाघ्राय प्रहृष्टः शिबिरं ययौ ॥ ६४।

टि० ४०.

ततस्तव सुतो राजंश्चिन्तयाऽभिपरिप्लुतः।
विस्रवच्छोणिताक्ताङ्गः पप्रच्छेदं पितामहम् ॥ (भीष्म० ८०।३)
संमोह्य सर्वान् युधि कीर्तिमन्तो व्यूहं च तं मकरं वज्रकल्पम्।
प्रविश्य भीमेन रणे हतोऽस्मि घोरैः शरैर्मृत्युदण्डप्रकाशैः ॥ (८०।५)
क्रुद्धं तमुद्वीक्ष्य भयेन राजन् संमूर्छितो न लभे शान्तिमद्य।
इच्छे प्रसादात्तव सत्यसन्ध प्राप्तुं जयं पाण्डवेयांश्च हन्तुम्।
एवमुक्त्वा ददावस्मै विशल्यकरणीं शुभाम् ॥१०।
ओषधीं वीर्यसम्पन्नां विशल्यश्चाभवत् तदा ।११। (भीष्म०, अ० ८१)

टि० ४१. सप्तमदिवसीययुद्धारम्भः

ततः प्रभाते विमले स्वेन सैन्येन वीर्यवान् ॥११।
अव्यूहत स्वयं व्यूहं भीष्मो व्यूहविशारदः।
मण्डलं मनुजश्रेष्ठो नानाशस्त्रसमाकुलम् ॥१२। (भीष्म०, अ० ८१)

सञ्जय उवाच—

ततो युधिष्ठिरो राजा मध्यं प्राप्ते दिवाकरे।
श्रुतायुषमभिप्रेक्ष्य प्रेषयामास वाजिनः ॥ (भीष्म० ८४।१)
ततः प्रववृते युद्धं व्यतिषक्तरथद्विपम्।
पश्चिमां दिशमासाद्य स्थिते सवितरि प्रभो ॥२८।
धृष्टद्युम्नोऽथ पाञ्चाल्यः सात्यकिश्च महारथः।
पीडयन्तौ भृशं सैन्यं शक्तितोमरवृष्टिभिः ॥२९। (भीष्म०, अ० ८६)

सप्तमदिवसीययुद्धावहारः

ततो दुर्योधनो राजा लोहितायति भास्करे।
अब्रवीत् तावकान् सर्वांस्त्वरध्वमिति भारत ॥४१।
युध्यतां तु तथा तेषां कुर्वतां कर्म दुष्करम्।
अस्तं गिरिमथारूढे अप्रकाशति भास्करे ॥४२।
अर्जुनोऽथ सुशर्मादीन् राज्ञस्तान् सपदानुगान्।
विजित्य पृतनामध्ये ययौ स्वशिबिरं प्रति ॥४६।
युधिष्ठिरोऽपि कौरव्यो भ्रातृभ्यां सहितस्तथा।
ययौ स्वशिबिरं राजा निशायां सेनया वृतः ॥४७।
दुर्योधनोऽपि नृपतिः परिवार्य महारणे।
भीष्मं शान्तनवं तूर्णं प्रयातः शिविरं प्रति ॥४९।
एवमेते महाराज तावकाः पाण्डवैः सह।
पर्यवर्तन्त सहिता निशाकाले परन्तप ॥५२।
ततः स्वशिबिरं गत्वा पाण्डवाः कुरवस्तथा।
न्यवसन्त महाराज! पूजयन्तः परस्परम् ॥५३। (भीष्म०, अ० ८६)

टि० ४२. अष्टमदिवसयुद्धम्

सञ्जय उवाच—

परिणाम्य निशां तां तु सुखं प्राप्ता जनेश्वराः।
कुरवः पाण्डवाश्चैव पुनर्युद्धाय निर्ययुः ॥ (भीष्म० ८७।१)

नैल०

परिणाम्य = गमयित्वा।
८८ अध्याये सुनाभादिधृतराष्ट्रपुत्रवधः।
तस्मात् त्वं शृणु तत्त्वेन यथा युद्धमवर्तत ॥१३।
मध्याह्ने सुमहारौद्रः संग्रामः समपद्यत।
लोकक्षयकरो राजंस्तन्मे निगदतः शृणु ॥१४।
ततः सर्वाणि सैन्यानि धर्मपुत्रस्य शासनात्।
संरब्धान्यभ्यवर्तन्त भीष्ममेव जिघांसया ॥१५। (भीष्म०, अ० ८९)

९० अध्याये अर्जुनपुत्रस्य इरावतो वधः।
९१-९२ अध्याययोर्घटोत्कचयुद्धम्।
९३ अध्याये संकुलयुद्धम्।
घटोत्कचेन सहिताः सिंहनादान् प्रचक्रिरे।
शङ्खदुन्दुभिनिर्घोषैः समन्तान्नेदिरे भृशम् ॥४९।
एवं तव बलं सर्वं हैडिम्बेन दुरात्मना।
सूर्यास्तमनवेलायां प्रभग्नं विद्रुतं दिशः ॥५०। (भीष्म०, अ० ९४)
९५ अध्याये भगदत्तयुद्धम्।
पुत्रं विनिहतं श्रुत्वा इरावन्तं धनञ्जयः।
दुःखेन महताविष्टो निःश्वसन् पन्नगो यथा ॥१।
युद्धं तु मे न रुचितं ज्ञातिभिर्मधुसूदन !
संचोदय हयान् शीघ्रं धार्तराष्ट्रचमूं प्रति ॥११।
अपराह्णे महाराज संग्रामः समपद्यत।
पर्जन्यसमनिर्घोषो भीष्मस्य सह पाण्डवैः ॥१५। (भीष्म०, अ० ९६)

अष्टमदिवसयुद्धावहारः

ग्रहनक्षत्रशबला द्यौरिवासीद् वसुन्धरा।
एवमेते महासेने मृदिते तत्र भारत ॥७७।
परस्परं समासाद्य तव तेषां च संयुगे।
तेषु श्रान्तेषु भग्नेषु मृदितेषु च भारत ॥७८।
रात्रिः समभवत्तत्र नापश्याम ततोऽनुगान्।
ततोऽवहारं सैन्यानां प्रचक्रुः कुरुपाण्डवाः ॥७९।
रजनीमुखे सुरौद्रे तु वर्तमाने महाभये।
अवहारं ततः कृत्वा सहिताः कुरुपाण्डवाः ॥ ८० । (भीष्म०, अ० ९६)

टि० ४३. अर्जुनस्य पुत्र इरावान्

अर्जुनेन नागराजसुतायाम् उलूप्यामुत्पन्नः पुत्र इरावान्।
तौ स जित्वा महाराज नागराजसुतासुतः।
पौरुषं ख्यापयंस्तूर्णं व्यधमत् तव वाहिनीम् ॥ (भीष्म० ८३।२३)

नैल०

नागराजः कौरव्यस्तस्य सुता उलूपी तस्याः सुत इरावान्।
अर्जुनस्य सुतः श्रीमानिरावान्नाम वीर्यवान्।
स्नुषायां नागराजस्य जातः पार्थेन धीमता ॥ ७।
ऐरावतेन सा दत्ता अनपत्या महात्मना।
पत्यौ हते सुपर्णेन कृपणा दीनचेतना ॥ ८।
भार्यार्थं तां च जग्राह पार्थः कामवशानुगाम्।
एवमेष समुत्पन्नः परक्षेत्रेऽर्जुनात्मजः ॥ ९। (भीष्म०, अ० ९०)

टि० ४४. रात्रौ दुर्योधनस्य भीष्मसमीपे गमनम्

स पूज्यमानः कुरुभिः कौरवाणां महाबलः ॥ २६ ।
प्रययौ सदनं राजा गाङ्गेयस्य यशस्विनः ।
अन्वीयमानः सततं सोदरैः परिवारितः ॥ २७ ।
संप्राप्य तु ततो राजा भीष्मस्य सदनं शुभम् ॥ ३४ ।
अभिवाद्य ततो भीष्मं निषण्णः परमासने ॥ ३५ । (भीष्म०, अ० ९७)

टि० ४५. नवमदिवसीययुद्धारम्भः

प्रविष्टः स निशां तां च गमयामास पार्थिव !
प्रभातायां च शर्वर्यां प्रातरुत्थाय तान् नृपः ॥ २६ ।
राज्ञः समाज्ञापयत सेनां योजयतेति ह ।
अद्य भीष्मो रणे क्रुद्धो निहनिष्यति सोमकान् ॥ २७ । (भीष्म०, अ० ९८)
ततः शान्तनवो भीष्मो निर्ययौ सह सेनया ।
व्यूहं चाव्यूहत महत् सर्वतोभद्रमात्मनः ॥ १ । (भीष्म०, अ० ९९)
१०० अध्याये अलम्बुषाभिमन्युसमागमः ।
१०१ अध्याये अलम्बुषाभिमन्युयुद्धम् ।
१०२ अध्याये भीमपराक्रमः ।
मध्यंदिने महाराज संग्रामः समपद्यत ।
लोकक्षयकरो रौद्रो भीष्मस्य सह सोमकैः ॥ (१०३।१)
१०३ अध्याये संकुलयुद्धम् ।
१०४ अध्याये वार्ष्णेययुद्धम् ।
मद्रराजरथं प्राप्तं मृत्योरास्यगतं यथा ।
अभ्यपद्यत संग्रामे युधिष्ठिरममित्रजित् ॥
ततो युद्धं महाघोरं प्रावर्तत सुदारुणम् ।
अपरां दिशमास्थाय पतमाने दिवाकरे ॥ (भीष्म० १०५।३४, ३५)

नवमदिवसयुद्धावहारः

महारथं भारतदुष्प्रकम्पं शरौघिणं प्रतपन्तं नरेन्द्रान् ।
भीष्मं न शेकुः प्रतिवीक्षितुं ते शरार्चिषं सूर्यमिवातपन्तम् ॥
विमृद्नतस्तस्य तु पाण्डुसेनामस्तं जगामाथ सहस्ररश्मिः ।
ततो बलानां श्रमकर्शितानां मनोऽवहारं प्रति संबभूव ॥
(भीष्म० १०६।८४, ८५)

सञ्जय उवाच—

युध्यतामेव तेषां तु भास्करेऽस्तमुपागते ।
सन्ध्या समभवद् घोरा नापश्याम ततो रणम् ॥ १ ।
ततो युधिष्ठिरो राजा सन्ध्यां संदृश्य भारत !
वध्यमानं च भीष्मेण त्यक्तास्त्रं भयविह्वलम् ॥ २ ।

स्वसैन्यं च परावृत्तं पलायनपरायणम् ।
भीष्मं च युधि संरब्धं पीडयन्तं महारथम् ॥ ३ ।
सोमकांश्च जितान् दृष्ट्वा निरुत्साहान् महारथान् ।
चिन्तयित्वा ततो राजा अवहारमरोचयत् ॥ ४ ।
ततोऽवहारं सैन्यानां चक्रे राजा युधिष्ठिरः ।
तथैव तव सैन्यानामवहारो ह्यभूत् तदा ॥ ५ ।
ततोऽवहारं सैन्यानां कृत्वा तत्र महारथाः ।
न्यविशन्त कुरुश्रेष्ठ संग्रामे क्षतविक्षताः ॥ ६ । (भीष्म० १०७।१-६)

टि० ४६. युधिष्ठिरस्य मन्त्रविचारः

१०७ अध्यायस्य ७-५६ श्लोकपर्यन्तं रात्रौ वृष्णिभिः सञ्जयैर्वासुदेवेन च सह पाण्डवानां विजयप्राप्त्यर्थं मन्त्रणा ।

तस्मिन् रात्रिमुखे घोरे पाण्डवा वृष्णिभिः सह ।
सृञ्जयाश्च दुराधर्षा मन्त्राय समुपाविशन् ॥ १० ।
ततो युधिष्ठिरो राजा मन्त्रयित्वा चिरं नृप !
वासुदेवं समुद्वीक्ष्य वचनं चेदमाददे ॥ १२ ।
कृष्ण पश्य महात्मानं भीष्मं भीमपराक्रमम् ।
गजं नलवनानीव विमृद्नन्तं बलं मम ॥ १३ ।

५७-१०७ श्लोकपर्यन्तं भीष्मेण सह तदीयसदने युधिष्ठिरादीनां मन्त्रणा तद्वधोपायवर्णनं च ।

आत्तशस्त्रो रणे यत्तो गृहीतवरकार्मुकः ।
मां पातयतु बीभत्सुरेवं तव जयो ध्रुवम् ॥ ८७ ।

टि० ४७. दशमदिवसयुद्धारम्भः

ततस्ते पाण्डवाः सर्वे सूर्यस्योदयनं प्रति ।
ताड्यमानासु भेरीषु मृदङ्गेष्वानकेषु च ॥
ध्मायत्सु दधिवर्णेषु जलजेषु समन्ततः ।
शिखण्डिनं पुरस्कृत्य निर्याताः पाण्डवा युधि ॥ (भीष्म० १०८।२-३)

१०८ अध्याये भीष्मशिखण्डिसमागमः ।
१०९ अध्याये भीष्मदुर्योधनसंवादः ।
११० अध्याये अर्जुनदुःशासनसमागमः ।
१११ अध्याये द्वन्द्वयुद्धम् ।
११२ अध्याये द्रोणाश्वत्थामसंवादः ।
११३ अध्याये भीमपराक्रमः ।
११४ अध्याये भीमार्जुनपराक्रमः ।
११५ अध्याये भीष्मोपदेशः ।
११६-११७ अध्याययोः संकुलयुद्धम् ।
११८ अध्याये भीष्मपराक्रमः ।

टि० ४८. भीष्मस्य पतनम्

एवं स पाण्डवः क्रुद्धः आत्तमात्तं पुनः पुनः।
धनुश्चिच्छेद भीष्मस्य सव्यसाची परन्तपः ॥ २६।
पित्रा तुष्टेन मे पूर्वं यदा कालीमुदावहम् ॥ ३४।
स्वच्छन्दमरणं दत्तमवध्यत्वं रणे तथा।
तस्मान्मृत्युमहं मन्ये प्राप्तकालमिवात्मनः ॥ ३५।
एवं ज्ञात्वा व्यवसितं भीष्मस्यामिततेजसः।
ऋषयो वसवश्चैव वियत्स्था भीष्ममब्रुवन् ॥ ३६।
यत्ते व्यवसितं तात तदस्माकमपि प्रियम्।
तत् कुरुष्व महाराज युद्धे बुद्धिं निवर्तय ॥ ३७।
एवमस्य धनूंष्याजौ चिच्छेद सुबहून्यथ।
ततः शान्तनवो भीष्मो बीभत्सुं नात्यवर्तत ॥ ५४।
दशमेऽहनि राजेन्द्र ! भीष्मार्जुनसमागमे।
आसीद् गाङ्ग इवावर्तो मुहूर्तमुदधेरिव ॥ ७६।
निहत्य समरे राजन् ! शतशोऽथ सहस्रशः।
न तस्यासीदनिर्भिन्नं गात्रे द्व्यङ्गुलमन्तरम् ॥ ८६।
एवंभूतस्तव पिता शरैर्विशकलीकृतः।
शिताग्रैः फाल्गुनेनाजौ प्राक्शिराः प्रापतद् रथात् ॥८७। (भीष्म०, अ० ११९)
किञ्चिच्छेषे दिनकरे पुत्राणां तव पश्यताम्।
हाहेति दिवि देवानां पार्थिवानां च भारत ॥ ८८।
पतमाने रथाद् भीष्मे बभूव सुमहास्वनः।
संपतन्तमभिप्रेक्ष्य महात्मानं पितामहम् ॥ ८९।
सह भीष्मेण सर्वेषां प्रापतन् हृदयानि नः।
स पपात महाबाहुर्वसुधामनुनादयन् ॥ ९०।
इन्द्रध्वज इवोत्सृष्टः केतुः सर्वधनुष्मताम्।
धरणीं न स पस्पर्श शरसङ्घैः समावृतः ॥ ९१।
शरतल्पे महेष्वासं शयानं पुरुषर्षभम्।
रथात् प्रपतितं चैनं दिव्यो भावः समाविशत् ॥ ९२।
अभ्यवर्षच्च पर्जन्यः प्राकम्पत च मेदिनी।
पतन् स ददृशे चापि दक्षिणेन दिवाकरम् ॥ ९३।
उत्तरायणमन्विच्छन् भीष्मः कुरुपितामहः ॥ ९७।
गमिष्यामि स्वकं स्थानमासीद् यन्मे पुरातनम्।
उदगायन आदित्ये हंसाः सत्यं ब्रवीमि वः ॥ १०५।
एवं कुरूणां पतिते शृङ्गे भीष्मे महौजसि।
पाण्डवाः सृञ्जयाश्चैव सिंहनादं प्रचक्रिरे ॥ ११०।

महोपनिषदं चैव योगमास्थाय वीर्यवान् ।
जपन् शान्तनवो धीमान् कालाकाङ्क्षी स्थितोऽभवत् ॥ १२२ ।
(भीष्म०, अ० ११९)

टि० ४९. भीष्मायार्जुनेन जलदानम्

१२० अध्यायेऽर्जुनो भीष्मायोपधानं दत्तवान्—

अतुष्यद् भरतश्रेष्ठो भीष्मो धर्मार्थतत्त्ववित् ।
उपधानेन दत्तेन प्रत्यनन्दद् धनञ्जयम् ॥ ४६ ।

१२१ अध्याये, सञ्जय उवाच—

व्युष्टायां तु महाराज ! शर्वर्यां सर्वपार्थिवाः ।
पाण्डवा धार्तराष्ट्राश्च उपातिष्ठन् पितामहम् ॥ १ ।
अभ्यभाषत धर्मात्मा भीष्मः प्रीतो धनञ्जयम् ॥ १७ ।
वेदनार्तशरीरस्य प्रयच्छापो ममार्जुन ॥ १९ ।
शीतस्यामृतकल्पस्य दिव्यगन्धरसस्य च ।
अतर्पयत् ततः पार्थः शीतया जलधारया ॥ २५ ।

१२२ अध्याये—

ततस्ते पार्थिवाः सर्वे जग्मुः स्वानालयान् पुनः ।
तूष्णींभूते महाराज ! भीष्मे शान्तनुनन्दने ॥ १ ।
श्रुत्वा तु निहतं भीष्मं राधेयः पुरुषर्षभः ।
ईषदागतसंत्रासस्त्वरयोपजगाम ह ॥ २ ।
इत्युक्तवति गाङ्गेये अभिवाद्योपमन्त्र्य च ।
राधेयो रथमारुह्य प्रायात् तव सुतं प्रति ॥ ३९ ।

टि० ५०. सैनापत्ये द्रोणस्याभिषेकः

स भवान् पातु नः सर्वान् देवानिव शतक्रतुः ।
भवन्नेत्राः पराञ्जेतुमिच्छामो द्विजसत्तम ॥ ४ ।
नक्षत्राणामिव शशी दितिजानामिवोशनाः ।
श्रेष्ठः सेनाप्रणेतृणां स नः सेनापतिर्भव ॥ ७ ।
जेष्यामि पुरुषव्याघ्र ! भवान् सेनापतिर्यदि ॥ ११ । (द्रोण०, अ० ६)
स एवमभ्यनुज्ञातश्चक्रे सेनापतिं ततः ।
द्रोणं तव सुतो राजन् विधिदृष्टेन कर्मणा ॥ ५ ।
प्रादुरासीत् कृते द्रोणे हर्षः सेनापतौ तदा ॥ ७ ।
सैनापत्यं तु संप्राप्य भारद्वाजो महारथः ।
युयुत्सुर्व्यूह्य सैन्यानि प्रायात् तव सुतैः सह ॥ १० । (द्रोण०, अ० ७)

टि० ५१. द्रोणस्य सैनापत्ये प्रथमदिवसयुद्धारम्भः

ततो दुर्योधनो राजा कर्णदुःशासनादिभिः ।
संमन्त्र्योवाच दुर्धर्षमाचार्यं जयतां वरम् ॥ ५ ।
ददासि चेद् वरं मह्यं जीवग्राहं युधिष्ठिरम् ।
गृहीत्वा रथिनां श्रेष्ठं मत्समीपमिहानय ॥ ६ । (द्रोण०, अ० १२)

एकादशयुद्धदिवसावहारः

नादृश्यत तदा राजंस्तत्र किंचन संयुगे ।
बाणान्धकारे महति कृते गाण्डीवधन्वना ॥ ४८ ।
सूर्ये चास्तमनुप्राप्ते तमसा चाभिसंवृते ।
नाज्ञायत तदा शत्रुर्न सुहृन्न च कश्चन ॥ ४९ । (द्रोण०, अ० १६)
ततोऽवहारं चक्रुस्ते द्रोणदुर्योधनादयः ।
तान् विदित्वा पुनस्त्रस्तानयुद्धमनसः परान् ॥ ५० ।
स्वान्यनीकानि बीभत्सुः शनकैरवहारयत् ।
ततोऽभितुष्टुवुः पार्थं प्रहृष्टाः पाण्डुसृञ्जयाः ॥ ५१ । (द्रोण०, अ० १६)

टि० ५२. युधिष्ठिराग्रहणेन खिन्नो द्रोणः

कृत्वाऽवहारं सैन्यानां द्रोणः परमदुर्मनाः ।
दुर्योधनमभिप्रेक्ष्य सव्रीडमिदमब्रवीत् ॥ २ ।
उक्तमेतन्मया पूर्वं न तिष्ठति धनञ्जये ।
शक्यो ग्रहीतुं संग्रामे देवैरपि युधिष्ठिरः ॥ ३ ।
शृण्वतां सर्वभूतानामुच्चैर्वाचो बभाषिरे ।
सर्वे धनञ्जयवधे प्रतिज्ञां चापि चक्रिरे ॥ २८ ।
संशप्तकाश्च मां राजन्नाह्वयन्ति महामृधे ॥ ३९ ।
एष च भ्रातृभिः सार्धं सुशर्माऽऽह्वयते रणे ।
वधाय सगणस्यास्य मामनुज्ञातुमर्हसि ॥ ४० । (द्रोण०, अ० १७)


टि० ५३ अर्जुनस्य दूरेऽपनयनम्

परिणाम्य निशां तां तु भारद्वाजो महारथः ।
उक्त्वा सुबहु राजेन्द्र ! वचनं वै सुयोधनम् ॥ १ ।
विधाय योगं पार्थेन संशप्तकगणैः सह ।
निष्क्रान्ते च तदा पार्थे संशप्तकवधं प्रति ॥ २ । (द्रोण०, अ० २०)
[संशप्तकवधपर्व द्रोणपर्वणोऽङ्गभूतं १७-३२ अध्यायेषु द्रष्टव्यम्]

परिशिष्टम्

[ग्रन्थभागे संक्षेपेण टिप्पणीषु दर्शितस्य विषयस्येह विस्पष्टमवबोधनाय तत्संबद्धानि महाभारतीयवचनानि, तदनु नीलकण्ठकृत-भारतभावदीपटीकांशोऽपि च 'नैल०' इति संकेतेन समुद्धृत:, यथावश्यकं स्वगिराऽपि किञ्चित् क्वचिद् व्याख्यातं च]

टिप्पणी	पृ० सं०
१, ३, ४-५	७
६, ७	८
८, ९, १०	९
११	१०
१२, १३, १४, १५, १६	११
१७, १८	१२
१९, २०	१३
२१, २२, २४	१४
२५, २६, २७, ३२, ३४, ३६	१५
३७, ३८	१६
३९, ४०, ४१	१७
४२	१८
४३	१९
४४, ४५	२०
४६, ४७	२१
४८	२२
४९. ५०	२३
५१, ५२, ५३	२४



रजिस्टर्ड न्यूजपेपर्स एक्ट के अन्तर्गत

विज्ञप्ति

१.	प्रकाशन का नाम	सारस्वती सुषमा
२.	प्रकाशन की तिथि	त्रैमासिक
३.	प्रकाशक का नाम	भागीरथप्रसाद त्रिपाठी
	राष्ट्रियता	भारतीय
	पता	सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी
४.	सम्पादक का नाम	भागीरथ प्रसाद त्रिपाठी
	राष्ट्रियता	भारतीय
	पता	सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी
५.	मुद्रक का नाम	श्री रमाशंकरपंड्या
	राष्ट्रियता	भारतीय
	पता	तारा प्रिंटिंग वर्क्स, कमच्छा, वाराणसी
६.	स्वामित्व	सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी

मैं भागीरथप्रसाद त्रिपाठी घोषित करता हूँ कि उल्लिखित विज्ञप्ति मेरी जानकारी के अनुसार बिलकुल ठीक है।

हस्ताक्षर
भागीरथप्रसाद त्रिपाठी
अनुसन्धानसंस्थाननिदेशकः
सं० सं० वि० वि०, वाराणसी—२२१००२.

सारस्वती सुषमा

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयानुसन्धानपत्रिका

१. एषा देशे विदेशे च लब्धप्रसरा त्रैमासिकी संस्कृतपत्रिका ।

२. अस्याः प्रकाशनं प्रतिवर्षं ज्येष्ठ-भाद्रपद-मार्गशीर्ष-फाल्गुनपूर्णिमासु भवति ।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धानप्रवृत्तेः समालोचनाप्रवृत्तेश्चोद्बोधनं प्रोत्साहनं चास्ति ।

४. अस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाना निबन्धाः प्रकाश्यन्ते ।

५. प्रकाशितनिबन्धस्य प्रतिमुद्रणानां पञ्चविंशतिः, पत्रिकायाश्च सोऽङ्को दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति ।

६. अस्यां पत्रिकायां विशिष्टानां हिन्दीसंस्कृताङ्ग्लग्रन्थानां समालोचनाः प्रकाश्यन्ते । तदर्थं ग्रन्थकृद्भिर्ग्रन्थस्य द्वे प्रतिकृती प्रेषयितव्ये ।

७. 'कुलसचिव, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, वाराणसी-२२१००२ (उ०प्र०) इति सङ्केतेन ('बैंकड्राफ्ट' अथवा 'पोस्टल आर्डर' इत्येतेनैव) मूल्यं प्रेषणीयम् ।

८. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः "सम्पादक, सारस्वती सुषमा, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी—२२१००२ (उ० प्र०)" इति सङ्केतेन विधेयः ।



प्रकाशकः—निदेशकः, अनुसन्धानसंस्थानम्, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी-२२१००२ (उ० प्र०) ।
मुद्रकः—तारा प्रिंटिंग वर्क्स, कमच्छा, वाराणसी ।

सुसङ्ग्राह्याः केचन शोधप्रबन्धाः

ग्रन्थनाम		मूल्यम्
१. अथर्ववेदे शान्तिपुष्टिकर्माणि—	श्रीमत्या मायामालवीयया वैदिकवाङ्मयस्यानुशीलनं कृत्वा विरचितो विविधैरानुसन्धानिकनिष्कर्षैः समेधितोऽयं प्रवन्ध.—	८-००
२. पाणिनीयधातुपाठसमीक्षा—	डॉ० भागीरथप्रसादत्रिपाठिना विरचिता। लेखकेन प्रायः समस्तसंस्कृतधातुपाठा उपजीव्यत्वेनोरीकृत्य समीक्षिताः। आधुनिकगवेषणापूर्णैर्निर्णयैः प्रवन्धोऽयं समुल्लसति। प्रबन्धस्यास्य महत्त्वमङ्गीकृत्यैवोत्तरप्रदेशीयशासनेनेयं पुरस्कृता—	१८-५०
३. पाणिनीयव्याकरणे प्रमाणसमीक्षा—	प्राचीनव्याकरणविभागाध्यक्षेण श्रीमता रामप्रसादत्रिपाठिना विरचिता। इयं गवेषणाप्रधानैस्तात्त्विकैः, अथ च शास्त्रीयगभीरानुशीलनतथ्यैः समेधिता, उत्तरप्रदेशीयराज्यशासनेन पुरस्कृता च—	२६-२५
४. प्रक्रियाकौमुदीविमर्शः—	डॉ० आद्याप्रसादमिश्रेण लिखितः। श्रीरामचन्द्राचार्यविरचिताम् 'प्रक्रियाकौमुदीम्' उपजीव्यत्वेनाधारीकृत्य लेखकेन गवेषणापूर्णवहुविधानुसन्धानिकनिष्कर्षा इह सन्निवेशिताः—	८-००
५. ग्रहगणितमीमांसा—	डॉ० मुरारिलालशर्मणा विरचिता। इह भारतीयग्रहगणितस्य पाश्चात्यग्रहगणितस्य च तुलाबोधकमनुशीलनं कृतं वर्तते। अस्यास्तात्त्विकं महत्त्वमङ्गीकृत्यैव राज्यशासनेन पुरस्कृता—	५-५०
६. सूर्यग्रहणम्—	डॉ० कृष्णचन्द्रद्विवेदिना विरचितम्। इह सूर्यग्रहणस्यार्वाचीनां पद्धतिमनुसृत्यानुसन्धानिकाः सिद्धान्ता समुपन्यस्ता लेखकेन। अस्य वैज्ञानिकं महत्त्वमूरीकृत्यैव उत्तरप्रदेशीयशासनेनेदं पुरस्कृतम्—	१२-००
७. प्राच्यभारतीयम् ऋतुविज्ञानम्—	श्रीधुनीरामत्रिपाठिना संरचितम्। इह लेखकेनानुसन्धानिकं पर्यवेक्षणं कृतम् ऋतुविज्ञानस्य। अस्याभिनवं मूल्यमाकलय्यैव राज्यशासनेन पुरस्कृतम्—	१८-००

प्रकाशकः— निदेशकः, अनुसन्धानसंस्थानम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

पञ्जीकरणसंख्या—६९८१/५७

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

अभिनवप्रकाशनानि

ग्रन्थनाम	मूल्यम्
१. शुक्लयजुर्वेदकाण्वसंहिता— ाध्यशतिः [वेदः] संहितेयं सायणभाष्य-सहिता प्रकाशिता—	२२-००
२. वाक्यपदीयम्—तृतीयकाण्डस्य द्वितीयो भागः [व्याकरणम्] ग्रन्थरत्नमिदं हेलाराजप्रणीतया प्रकाशव्याख्यया तथा च श्रीरघुनाथशर्मविरचितया 'अम्बाकर्त्री'-व्याख्यया विभूष्य प्रकाशितम्—	१०७-००
३. व्याकरणदर्शनप्रतिमा [व्याकरणम्] आचार्यरामाज्ञापाण्डेयविरचितेऽस्मिन् ग्रन्थे व्याकरणशास्त्रस्य दार्शनिकपदार्थानां मौलिकं खलु समालोचनं कृतं वर्तते—	३३-६०
४. महाभाष्यनिगूढाकूतयः [व्याकरणम्] अनुसन्धानप्रबन्धोऽयं नूनम् आनुसन्धानिकफलश्रुतिभिः समेधितो वर्तते। लेखकः सम्पादकश्च—डॉ० देवस्वरूपमिश्रः—	२६-८०
५. वैयाकरणानाम् अन्येषां च मतेन शब्दस्वरूपतच्छक्तिविचारः [व्याकरणम्] अनुसन्धानप्रबन्धोऽयं विदुषा डॉ० कालिकाप्रसादशुक्लेन लिखितः। प्रबन्धेऽस्मिन् शब्दस्वरूपतच्छक्तिविषये गवेषणात्मकं विश्लेषणं विहितम्—	२६-५०
६. धात्वर्थविज्ञानम् [व्याकरणम्] गवेषणाप्रबन्धोऽयं बहुभाषाज्ञेन गवेषणामर्मज्ञेन अनुसन्धानसंस्थाननिदेशकेन डॉ० भागीरथप्रसादत्रिपाठिना विरचितः। प्रबन्धेऽस्मिन् धात्वर्थविज्ञानानि प्रकामं समुल्लसन्ति—	२७-००
७. बौधायनशुल्बसूत्रम् [शुल्वशास्त्रम्] ग्रन्थोऽयं श्रीव्यंकटेश्वरदीक्षितविरचितया बौधायनशुल्बमीमांसाख्यया तथा च श्रीद्वारकानाथयज्वप्रणीतया बौधायनशुल्बसूत्रव्याख्यानाख्यया टीकयाऽथ च प्रभूतैः संवादात्मकैः रेखाचित्रैश्च सनाथीकृतः। सम्पादकः—श्रीविभूतिभूषणभट्टाचार्यः—	७५-००
८. तन्त्ररत्नम्—पञ्चमो भागः [मीमांसादर्शनम्] पार्थसारथिमिश्रविरचितः टुप्टीकासनाथितो मीमांसाग्रन्थोऽयं साम्प्रतं सम्पादकपण्डितपट्टाभिरामशास्त्रि-विरचितया तात्त्विकया भूमिकया पाठभेदादिभिश्च विभूष्य प्रकाशितः—	४६-६०
९. तन्त्रसंग्रहः—तृतीयो भागः [तन्त्रशास्त्रम्] तन्त्रशास्त्रस्य विविधतन्त्र-संग्रहात्मकोऽयं ग्रन्थो बहुविधैरनुसन्धानात्मकैर्भूमिका-टिप्पण-परिशिष्टादि-भिश्च समुल्लसति—	९२-२०
१०. रुद्रयामलम्—[तन्त्रशास्त्रम्] तन्त्रशास्त्रस्य प्राणभूतमिदं ग्रन्थरत्नं विविधैः किल गवेषणापूर्णैः भूमिका-टिप्पण-परिशिष्टैश्च समलङ्कृत्य प्रकाशितम्—	

प्राप्तिस्थानम्–प्रकाशनविभागः, अनुसन्धानसंस्थानम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी-२२१००२